सिद्धान्तकौमुदी
उत्तरार्धः

११

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धान्त कौमुदी
(उत्तरार्द्ध) १६५ पत्राणि

अशुद्ध

अः रामचन्द्र

कौमुदी उत्तरार्द्ध तिङन्त

सि० कौ० उ० ति०

१

…ध्वर्थे प्रतिजेछयालकारइत्युक्तेः
लकाररूपकर्मणि लकारः। अथ
…प्रयोजपक र्मणि च कपदार्थे योगा
…र्थधातुकर्मण्येव लकारः।

श्रीगणेशायनमः॥श्रीवार्हतीवरैर्गुण्यैर्महर्षिभिरहर्दिवं।तोरूयमानोप्यगुणोविभुर्वि
जयतेतरां॥१॥पूर्वार्द्धेकथितास्तुर्यपंचमाध्यायवर्त्तिनः।प्रत्ययाःअथकथ्यंतेतृतीयाध्या
यगोचराः॥२॥तत्रादौदशलकाराःप्रदर्श्यंते।लट्‌लिट्‌लुट्‌लृट्‌लेट्‌लोट्‌लङ्‌लिङ्‌लु
ङ्‌लृङ्‌एषुपंचमोलकारश्छंदोमात्रगोचरः।वर्त्तमानेलट्‌।वर्त्तमानक्रियावृत्तेर्धातो
र्लट्‌स्यात्‌।अटावितौ।लः कर्मणिचभावेचाकर्मकेभ्यः।लकाराः सकर्मकेभ्यःकर्मणिक
र्त्तरिचस्युरकर्मकेभ्योभावेकर्त्तरिच।लस्य।अधिकारोयं।तिप्तस्झिसिप्थस्थमिब्वस्म
स्तातांझथासाथांध्वमिड्वहिमहिङ्‌।एतेष्टादशलस्यादेशाःस्युः।लः परस्मैपदं।लादेशाः

सम० १

१

परस्मैपदसंज्ञाः स्युः। तङानावात्मनेपदं। तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञा
पवादः। अनुदात्तङित आत्मनेपदं। अनुदात्तेत उपदेशे यो ङित्तदंताच्च धातोर्लस्य स्थाने आत्म
नेपदं स्यात्। स्वरितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मनेपदं स्या
त्कर्तृगामिनि क्रियाफले। शेषात्कर्तरि परस्मैपदं। आत्मनेपदनिमित्तहीनाद्धातोः कर्त्त
रि परस्मैपदं स्यात्॥ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। तिङ उभयोः पदयोस्त्रयस्त्रि
काः क्रमादेतत्संज्ञाः स्युः। तान्येकवचनद्विवचनबहुवचनान्येकशः। लब्धप्रथमादिसंज्ञानि ति
ङस्त्रीणि त्रीणि प्रत्येकं एकवचनादिसंज्ञानि स्युः। युष्मद्युपपदे समानाधिकरणे स्थानिन्य

पि मध्यमः। तिङ्वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमानेऽपि प्रयुज्यमाने च मध्यमः स्यात्। प्रह
से च मन्योपपदे मन्यतेरुत्तम एकवच्च। मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति
मध्यमः स्यात्परिहासे गम्यमाने मन्यतेरुत्तमः स्यात् स चैकार्थस्य वाचकः स्यात्। अस्मद्यु
त्तमः। तथाभूतेऽस्मद्युत्तमः स्यात्। शेषे प्रथमः। मध्यमोत्तमयोरविषये प्रथमः स्यात्। भू
सत्तायां। कर्तृविवक्षायां भू ति इति स्थिते। तिङ्शित्सार्वधातुकं। तिङः शितश्च धात्वधिका
रोक्ता एतत्संज्ञाः स्युः। कर्तरि शप्। कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्। शपावितौ।
सार्वधातुकार्धधातुकयोः। अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्। अवादेशः। भवति। भ

तः।भौ तः।अल्पयावयव स्य अस्या तादेशः स्यात्।–अतोगुणे।भवंति।भवसि।भवथः।भवथ।–अतोदी
र्घोयञि।–अतोंगस्यदीर्घः स्यायञादौ सार्वधातुके परे।भवामि।भवावः।भवामः।स भवति।तौ भ
वतः।ते भवंति।त्वं भवसि।युवां भवथः।यूयं भवथ।–अहं भवामि।–आवां भवावः।वयं भवामः।एहि
मन्ये उदनं भोक्ष्यसे भुक्तः सोतिथिभिः।एतं एतवा मन्ये उदनं भोक्ष्ये पे भोक्ष्यं भोक्ष्ये भोक्ष्यावहे इ
त्यादि मन्यसे मन्ये पे मन्यध्वे इत्यादि रर्थः।युष्मद्युपपदे इत्याद्यनुवर्त्तते नेह नाए तु भवान्
मन्यते उदनं भोक्ष्य इत्यादि।प्रहासे किं यथार्थकथने माभूत्।परोक्षे लिट्।भूतानद्यतनपरोक्षा
र्थवृत्ते र्धातोर्लिट् स्यात्।जस्यति बादयः।लिङ्।लिङादेशस्तिङार्द्ध धातुक संज्ञ एव स्यान्न

तु सार्वधातुकसंज्ञः। तेन श्नबादयो न। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। लिटस्तिबा
दीनां नवानां णलादयो नव स्युः। भू अ इति स्थिते। भुवो वुग्लुङ्लिटोः। भुवो वुगागमः स्याल्लु
ङ्लिटोरचि। नित्यत्वाद्वुग्गुणवृद्धी बाधते। एकाचो द्वे प्रथमस्य। अजादेर्द्वितीयस्येत्यधिकृत्य।
लिटि धातोरनभ्यासस्य। लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूता
दचः परस्य तु द्वितीयस्य। भूव् भूव् इति स्थिते। पूर्वोऽभ्यासः। अत्र ये द्वे तयोः पूर्वोऽभ्याससंज्ञः स्या
त्। हलादिः शेषः। अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यंते। इति वलोपः। ह्रस्वः। अभ्या
सस्याचो ह्रस्वः स्यात्। भवतेरः। भवतेरभ्यासोकारस्य अः स्यात् लिटि। अभ्यासे चर्च्च। अ

ण्यासेऽज्लो वरः स्युर्ऊशश्चा। ऽज्लोऽजशः स्वयां तु वरः। तत्रापि प्रकृतिजस्यां प्रकृतिजशः प्रकृति
वरां प्रकृतिवर इति विवेकः। अंतरतम्यात्। भ सिद्धवदत्राभात्। इतऊर्द्ध्वमापादपरिसमा
प्तेराभीयं। समानाश्रये तस्मिन्कर्त्तव्ये तदसिद्धं स्यात्। इति वुकोऽसिद्धत्वाद्वुवङ्। प्राप्तो वुग्वु
टावुवङ्यणोः सिद्धो वक्तव्यो। बभूव। बभूवतुः। बभूवुः। आर्द्धधातुकस्येड्वलादेः। वलादेरार्द्ध
धातुकस्य इडागमः स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम। अनद्य
तने लुट्। भविष्यत्यनद्यतने धातोर्लुट् स्यात्। स्यतासी ऌलुटोः। ऌ इति ऌङ्ऌटोर्ग्रहणं। धा
तोः स्यतासि एतौ प्रत्ययौ स्तः। ऌलुटोः परतः। शबाद्यपवादः। आर्द्धधातुकं शेषः। तिङ्शिद्गो

सि॰कौ॰उ॰ति॰

४

न्यो धातोरिति विहित प्रत्ययएतत्संज्ञः स्यात्। लुट्। लुटः प्रथमस्य डारौरसः। डारौरसः ए
ते क्रमात्स्युः। डित्वसामर्थ्यादभस्यापि टेर्लोपः। पुगंतलघूपधस्य च। पुगंतस्य लघूपध
स्य चांगस्येको गुणः स्यात्सार्वधातुकार्द्धधातुकयोः। येनना व्यवधानं तेन व्यवहितेपि वचन
प्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः। भवित् आ अत्रेको गुणे प्राप्ते।
दीधीवेवीटां। दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। भविता। तासस्त्योर्लोपः। तासेरस्तेश्च सलोपः
स्यात्सादौ प्रत्यये परे। रि च। रादौ प्रत्यये प्राग्वत्। भवितारौ। भवितारः। भवितासि। भवितास्थः।
भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः। लृट् शेषे च। भविष्यदर्थाद्धातोर्लृट् स्यात् क्रि राम

४

याप्यां क्रियायाम सत्यां सत्यां वा स्यः इट् । भविष्यति । भविष्यतः । भविष्यंति । भविष्यसि । भ
विष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः । लोट् । विध्यादिष्वर्थेषु लोट् स्यात् ।
आशिषि लिङ्लोटौ । एरुः । लोट इकारस्य उः स्यात् । भवतु । तुह्योस्तातङ् । आशिष्यन्यतरस्यां ।
ःआशिषि तुह्योः तातङ्वा स्यात् । अनेकाल्त्वात् सर्वादेशः । यद्यपि ङित्वेत्ययमपवादस्तथाप्य
नन्यार्थं ङित्वेषु नङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणप्रयर्थं तया संभवत्व
योजनङ्कारे तातङि मंथरं प्रवृत्तः परेण बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वात् । भ
वतात् । लोटो लङ्वत् । लोटो लङ इव कार्यं स्यात् । तेन तामादयः सलोपश्च । तथाहि । तस्थस्थमि

यांतांतंताम ः। ङित्। तस्थस्थमिपां तांतंतामः। ङितश्चतुर्णां तामादयः क्रमात्स्युः। नित्यंङितः। सकारान्तस्य ङिदुत्तमस्य नित्यं
लोपः स्यात्। अलोन्त्यस्येति सस्य लोपः। भवताम्। भवन्तु। सेर्ह्यपिच्च। लोटः सेर्हिः स्यात्सोपि
च्च। अतोहेः। अतः परस्य हेर्लुक् स्यात्। भव। भवतात्। भवतं। भवत। मेर्निः। लोटो मेर्निः स्या
त्। आडुत्तमस्य पिच्च। लोडुत्तमस्याडागमः स्यात्स पिच्च। हिन्योरुत्वंन। इकारोच्चारणसामर्थ्या
त्। भवानि। भवाव। भवाम। अनद्यतने लङ्। अनद्यतनभूतार्थवृत्तेर्लङ् स्यात्। लुङ्लङ्
लृङ्क्ष्वडुदात्तः। एषु परेष्वंगस्याडागमः स्यात्स चोदात्तः। इतश्च। ङितो लस्य परस्मैपदमिका
रांतंयत्तस्य लोपः स्यात्। अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अभवत। अभ

राम
५

वां॰अभवाव॰अभवाम।विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्।एष्वर्थेषु धातो
त्येषुवाव्येषुवालिङ् स्यात्।विधिः प्रेरणं।भृत्यादेर्निकृष्टस्यप्रवर्त्तनं।निमंत्रणंनियोगकर
णं।आवश्यकेश्राद्धभोजनादौदौहित्रादेःप्रवर्त्तनं।आमंत्रणंकामचारानुज्ञा।अधीष्टंसत्कार
पूर्वकोव्यापारः।प्रवर्त्तनायांलिङ्।वत्सुएंप्घूगुपादानंप्रपंचार्थं।यासुट् परस्मैपदेषूदात्तो
ङिच्च।लिङः परस्मैपदानांयासुडागमः स्यात्सचोदात्तोङिच्च।ङित्त्वोक्तेर्ज्ञायते के विदनुबंध
कार्येष्वनल्विध्याविति प्रतिषेध इति।आदेशस्यस्थानवत्त्वःङित्त्वमपीहलिंगं।सुट् तिथोः।लिङ
स्तकारथकारयोः सुट् स्यात्।सुटा यासुट् न बाध्यते।लिङो यासुट् का रस्य सुडिति विषयभेदा

त्। लिङः सलोपोऽनन्त्यस्य। सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्यापि
निवृत्तिः। सुटः श्रवणं त्वाशीर्लिङि स्फुटतरं तु तत्रात्मनेपदे। अतो येयः। अतः परस्य सार्वधातु
कावयवस्य यास् इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। सार्वधातुके किं। चिकीर्ष्यात्। भव्ये
ऽपवादन्यायेन हि अतो लोप एव बाध्येत। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्। भवेतां। झेर्जुस्।
लिङो झेर्जुस् स्यात्। उस् इत्। उस्यपदान्तात्। अपदान्तादवर्णात् उसि पररूपमेकादेशः स्या
त्। इति प्राप्ते परत्वान्नित्यत्वाच्च अतो येयः इति प्राप्तं वाः। यद्यप्यंतरंगत्वात्पररूपं न्याय्यं तथापि
यासः इत्येतस्य इय् इति व्याख्येयं एवं च सलोपस्यापवाद इय्। अतो येय इत्यत्र तु संधिर

वः। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवेम। लिङाशिषि। आशिषि लिङ्। स्तिङा
ईत्यादिकसंज्ञः स्यात्। किदाशिषि। आशिषि लिङो यासुट् किः स्यात्। स्कोरिति सलोपः। क्ङि
ति च। गित्किन्ङिनिमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्तां। भूयासुः। भूयाः।
भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। लुङ्। भूतार्थे धातोर्लुङ् स्यात्। माङि लुङ्। स
र्वलकारापवादः। स्मोत्तरे लङ् च। स्मोत्तरे माङि लुङ् स्याल्लङ् च। च्लि लुङि। एषा बाध्यपवादः। च्लेः सिच्।
हृवावितो। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। एभ्यः सिचो लुक् स्यात्। गापाविहेणादे
शपिवती गृह्येते। भूसुवोस्तिङि। भूसुव एतयोः सार्वधातुके तिङि परे गुणो न स्यात्। अभू

सिचोऽपृक्ते। सि च्॰ अस्स्चेति समाहारद्वंद्वः। सिच्छब्दस्य सौत्रं भत्वं॰ अस्तीत्यव्ययेन कर्मधारयः।
ततः पंचम्याः सौत्रो लुक्। विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात्। इति प्रा
प्ते नेह। सिचो लुक्सत्वात्। अभूत्। हलः किं। एधिषि। अभूतां। सिजभ्यस्तविदिभ्यश्च। सिचोऽभ्य
स्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात्। इति प्राप्ते। आतः। सिज्लुकि आदंतादेव झेर्जुस्
स्यात्। अभूवन्। अभूः। अभूतं। अभूत। अभूवं। अभूव। अभूम। नमाङ्योगे। अडाटौ
न स्तः। मा भवान्भूत्। मा स्म भवत्। मा स्म भूत्। लिङ्निमित्ते लृङ् क्रियातिपत्तौ। हेतुहेतुमद्भावादि
लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायां। अभविष्यत्। अ

भविष्यतोः।ऽप्रभविष्यन्।ऽप्रभविष्यः।ऽप्रभविष्यतां।ऽप्रभविष्यत।ऽप्रभविष्यं।ऽप्रभविष्याव।ऽप्रभ
विष्याम। तेप्राग्धातोः। तेजत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः।ऽप्राणिजोद्रु। उपसर्गस्थान्नि
मित्तात्परस्य जोडादेशस्य स्थानीयस्य नस्य णः स्यात्। प्रभवाणि। दुरः षत्वणत्वयोरुपसर्गत्वप्रति
षेधो वक्तव्यः। दुः स्थितिः। दुर्भवानि।ऽअंतः शब्दस्याङ्कि विधिणत्वेषूपसर्गत्वं वाच्यं।ऽअन्तर्भवाणि।
शेषे विभाषा। करवादावषांत उपदेशे। उपदेशे कादिरवादिषांतवर्जे गदनदादेरन्यस्मिन्धातौ
परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात्। प्रणिभवति। प्रनिभवति।ऽह्युपसर्गाणा
मसमस्तत्वेपि संहिता नित्या। तदुक्तं। संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे

वाक्ये तु सा विवक्षामपेक्षते इति। सत्ताद्यर्थनिर्देशश्चोपलक्षणं। प्रागा स्वर्गो भवतीत्यादावुत्प
षत इत्याद्यर्थात्। उपसर्गास्त्वर्थविशेषस्य द्योतकाः। प्रभवति। पराभवति। संभवति। अनुभव
ति। अभिभवति। उद्भवति। परिभवतीत्यत्र विलक्षणार्थावगतेः। उक्तं च। उपसर्गेण धात्वर्थो ब
लादन्यः प्रतीयते। प्रहाराहारसंहारविहारपरिहारवदिति। एध वृद्धौ। कथ्यंताः षड्विंशादनुब
न्धेतः। इति आत्मनेपदानां टेरे। इतोनस्यात्मनेपदानां टेरेत्वं स्यात्। एधते। सार्वधातुकम्
पित्। अपित्सार्वधातुकं ङित् स्यात्। आतो ङितः। अतःपरस्य ङितामाकारस्य इय् स्यात्। एधे
ते। एधंते। थासः से। इतोनस्य थासः सेस्यात्। एधसे। एधेथे। एधध्वे। अतो गुणे। एधे

ञ्चावहे। एध्यामहे। इजादेश्च गुरुमतोऽनृच्छः। इजादिर्यो धातुर्गुरुमाननृच्छत्यन्यस्ततः आम् स्याल्लिटि। आ च्छ
मोऽमकारस्यनेत्वं। आस्कासोराम्विधानाल्लुप्तापकात्। आमः। आमः परस्य लुक्स्यात्। कृञ्चानु
प्रयुज्यते लिटि। आमन्तात्लिटिपरः कृभ्वस्तयोऽनुप्रयुज्यन्ते। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति
सूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते। तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति अ
कारेण प्रत्याहारग्रहणम्। कृभ्वस्ति आमः। तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवा
चित्वात्तदर्थयोरभेदान्वयः। संपदिस्तु प्रत्याहारेऽन्तर्भूतोऽप्यनन्वितार्थत्वान्न प्रयुज्यते। कृञस्तु क्रि
याफले परगामिनि परस्मैपदे प्राप्ते। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। आम्प्रत्ययो यस्मादित्यतद्गु

सि०कौ०उ०ति०

६

ण संविज्ञानो बहुव्रीहिः। आम्प्रकृत्यात्तुल्यमनुप्रयुज्यमानात्कृञो ऽप्यात्मनेपदं स्यात्। इह पूर्ववदित्य
नुवर्त्य वाक्यभेदेन संबध्यते। पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति। तेन कर्तृगे ऽपि फले इंदांचका
रेत्यादौ न तङ्। लिटस्तझयोरेशिरेच्। लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः। एकारोच्चारणं
ज्ञापकं तङः आदेशानां टेरेत्वं नेति। तेन ङारो रसान। रूपसिद्धिस्थिते। असंयोगाल्लिट् कित्। असंयो
गात्परो ऽपित् लिट् कित् स्यात्। क्ङिति चेति निषेधात् सार्वधातुकार्धधातुकयोरिति गुणो न। द्वित्वात्पर
त्वाद्यणि प्राप्ते। द्विर्वचने ऽचि। द्वित्वनिमित्ते ऽचि परे अच आदेशो न स्याद्द्वित्वे कर्तव्ये। उरत्। अभ्या
सस्य ऋवर्णस्य अत् स्यात् प्रत्यये परे। प्रत्यये किं। ववृश्च। रपरत्वं। हलादिः शेषः। कुहोश्चुः। अभ्यासक

राम
६

वर्गे हकारयोश्च वर्गादेशः स्यात्। एधांचक्रे। एधांचक्राते। एधांचक्रिरे। एकाच उपदेशेऽनुदात्तात्।
उपदेशे यो धातुरेकाजनुदात्तश्च ततःपरस्यार्द्धधातुकस्येण्न स्यात्। उपदेशे इत्युभयान्वयि। ए
काच इति किं। यङ्लुग्व्यावृत्तिर्यथा स्यात्। स्मरंति हि। श्तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च। य
त्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि। एतच्चेह चैकाज्ग्रहणेन ज्ञाप्यते। अवयवत्वे चैकत्वविवक्ष
यातद्धातौ ग्रहणे न च सिद्धे एकग्रहणसामर्थ्यादनेकाचोऽप्युपदेशो व्यावर्त्यते। तेन वधेर्हन्युपदेशे ए
काचोऽपि न निषेधः। आदेशोपदेशेऽनेकाच्त्वात्। अनुदात्तश्चानुपदमेव संग्रहीष्यते। एधांच
कृषे। एधांचकृषे। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। इण्णंतादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्द्धन्यः।

सि॰कौ॰उ॰ति॰

१०

स्यात्‌। एधांचकृढ्वे। एधांचक्रे। एधांचकृवहे। एधांचकृमहे। एधांबभूवाऽस्तु प्रयोगसामर्थ्यादस्तेर्भू-
भावो न। अन्यथा हि कृञ्वानुप्रयुज्यत इति कृभ्वितिवा ब्रूयात्‌। अत आदेः। अभ्यासस्यादेरतो दीर्घः
स्यात्‌। पररूपापवादः। एधामास। एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधिता-
से। एधितासाथे। धि च। धादौ प्रत्यये परे सलोपः स्यात्‌। एधिताध्वे। ह एति। तासस्त्योः सस्य हः स्या-
देति परे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यंते। एधिष्यसे। ए-
धिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमेतः। लोट एकारस्य आम् स्या-
त्‌। एधतां। एधेतां। एधंतां। सवाभ्यां वामौ। सवाभ्यां परस्य लोडेतः क्रमाद्वऽमू एतौ स्तः। एध-

राम

१०

स्वा। एधेथां। एधध्वं। एतरे। जोउत्तमस्य एतरेस्यादामोपवादः। एधै। एधावहै। एधामहै। आउआ
दीनां। अजादीनामाडूस्यात्स्तुआदिष्टु। अटोपवादः। आटस्वावे। ऐधत। ऐधेतां। ऐधंत। ऐधथाः। ऐधे
थां। ऐधध्वं। ऐधे। ऐधावहि। ऐधामहि। लिङः सीयुट् सलोपः। एधेत। एधेयातां। झस्यरन्। लिङो
झस्यरन्स्यात्। एधेरन्। एधेथाः। एधेयाथां। एधेध्वं। इटोत्। लिङादेशस्येटोस्यात्। एधेय। एधे
वहि। एधेमहि। आशीर्लिङि। आर्द्धधातुकत्वात् लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्ष
त्वं। एधिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय।
एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां। आत्मनेपदेष्वनतः। अनकारात्परस्यात्मनेपदेषु झस् राम

सि॰कौ॰उ॰ति॰
११

स्यक्षतृड़ित्यादेशः स्यात् । एधिषत । एधिष्ठाः । एधिषाथां । इणः षीध्वंलुङ्लिटां धोऽङ्गात् । एधिढ्वं ।
इड्भिन्न एव इणिह गृह्यत इति मते तु एधिध्वम् । ढ्ययोर्व्यस्य मस्य वा द्वित्वविकल्पात् षोडश रूपाणि ।
एधिषि । एधिष्वहि । एधिष्महि । एधिष्यत । एधिष्येतां । एधिष्यंत । एधिष्यथाः । एधिष्येथां । ए
धिष्यध्वं । एधिष्ये । एधिष्यावहि । एधिष्यामहि । उदात्तत्वादुदात्तादेरिट् । अस्संगादनुदात्ताः संग्रहं तो
ऊदृदंतैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीश्रिभिः । वृङ्वृञ्भ्यां च विनैकाचोऽजंतेषु निहताः स्मृताः ॥ श
क्लृपच्मुच्रिच्वच्विच्सिच्प्रच्छित्यज्निजिर्भजः । भंज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रंज्विजिर्
स्वंजिसंज्सृजः ॥ अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद् । शद्सदी स्विद्यतिः स्कंदिह

रामशिव
११

दी क्रुध् क्षुधि बुध्यती॥३॥बंधिर्युधिरुधीराधिव्यध्शुधःसाधिसिध्यती।मन्यहन्नाप्क्षिप्
छुपितप्तिपस्तृप्यतिदृप्यती॥४॥लिप्लुप्वप्शप्स्वप्सृपियभ्रभ्लभ्गम् नम्यमोरमिः।क्रु
शिर्दंशिदिशीदृश्मृश्रिश्रुश्लिश्विश्स्पृशःकृषिः॥५॥त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्शिष्
शुष्श्लिष्यतयोघसिः।वसतिर्दह्दिहिदुहोनह्मिह्रुह्लिह्वहिस्तथा॥६॥अनुदात्ताहलंतेषुधा
तवोद्व्यधिकंशतं।लुदादौमतभेदेनस्थितौयौवतुरादिषु॥७॥तृप्दृपीतौवारयितुंश्यनानिर्देश
आदृतः॥८॥किंवा।स्विद्यपद्योसिध्यबुध्योमन्यपुष्यश्लिषःश्यना।वसिःशपालुकायोगेनिर्दिष्टो
न्यनिवृत्तये॥९॥निजिर्विजिर्शक्लृइतिसानुबंधाःसमीतथा।विंदतिश्चांद्रदौर्गादेरिष्टोभा

ब्येपिदृश्यते॥९॥व्याघ्रभूत्यादयस्त्वेनंनेहपेहुरितिस्थितं।एंडिमस्त्री॰अदिपदोतु दृष्टुधः सुबिल्
सुषीरितिषिः॥१०॥भाष्यानुक्तानवेहोक्ता व्याघ्रभूत्यादिसंमतेः॥११॥स्पर्द्धसंघर्षे।संघर्षः पराभि
भवेच्छा।धात्वर्थेनोपसंग्रहादकर्मकः।स्पर्द्धते।शर्पूर्वाः खयः।॰अभ्यासस्य शर्पूर्वाः खयः शि
ष्यन्ते।हलादिःशेषइत्यस्यापवादः।पस्पर्द्धे।स्पर्द्धिता।स्पर्द्धिष्यते।स्पर्द्धतां।॰अस्पर्द्धत।स्पर्द्धे
त।स्पर्द्धिषीष्ट।॰अस्पर्द्धिष्ट।॰अस्पर्द्धिष्यत॥२॥गाधृप्रतिष्ठालिप्सयोर्ग्रंथे च।गाधते।जगाधे॥४॥
बाधृलोडने।लोडनंप्रतिघातः।बाधते॥५॥नाधृनाधृयाच्ञोपतापैश्वर्याशीःषु।॰आशिषिनाथ
इतिवाच्यं।॰अस्याशिष्येवात्मनेपदंस्यात्।नाथते।॰अन्यत्रनाथति।नाधते॥६॥दधधारणे। राम १२३

दधते॥८॥ अत एकहल्मध्येऽनादेशादेर्लिटि। लिटि णि मितादेशादिकं न भवति यद्दंगं तदव
यवस्या संयुक्तहल्मध्यस्थस्याकारस्य एकारः स्याद् अभ्यासलोपश्च किति लिटि। थलि च सेटि।
प्रागुक्तं स्यात्। आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते। शसिदयोः प्रतिषेधवचनाज्ज्ञापकात्।
तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे। देधाते। देधिरे। अतः किं। दिदि
वतुः। तपरः किं। ररासे। एकेत्यादि किं। तत्सरतुः। अनादेशादेः किं। बकणतुः। लिटः आदेशविशेष
णादिह स्यादेव। नेमिथ। सेहे। स्कुदि आप्रवणे। आप्रवणमुत्प्लवनमुद्धरणं वा। इदितो नुम्धातोः।
स्कुंदते। चुस्कुंदे॥९॥ श्विदि श्वैत्ये। अकर्मकः। श्विंदते। शिश्विंदे॥१०॥ वदि अभिवादनस्तुत्योः। वंद

ते। ववंदे। ११। भदि कल्याणे सुखे च। भंदते। बभंदे। १२। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। मंदते।
ममंदे। १३। स्पदि किंचिच्चलने। स्पंदते। पस्पंदे। १४। क्लिदि परिदेवने। शोके इत्यर्थः। सकर्मकः। क्लिंद
ते। चिक्लिंदे। १५। मुद हर्षे। मोदते। १६। दद दाने। ददते। न शसददवादिगुणानां। शसेर्ददेर्वका
रादीनां गुणशब्देन भावितस्य च योकारस्तस्य एत्वाभ्यासलोपौ न। दददे। दददाते। दददिरे। १७।
ष्वद स्वर्द आस्वादने। अयमनुभवे सकर्मकः रुचावकर्मकः। धात्वादेः षः सः। धातोरादेः षस्य सः
स्यात्। सात्पदाद्योरिति षत्वनिषेधः। अनुस्वदते। सस्वदे। स्वर्दते। सस्वर्दे। १९। उर्द माने क्रीडा
च१ यां च। उपधायां च। धातो रुपधाभूतयो रेफवकारयो र्हल्परयोः परत इको दीर्घः स्यात्। ऊर्दते। राम

ऊर्द वक्रे।२०।कुर्द खुर्द गुर्द गुद क्रीडायामेव।कूर्दते।२१।खूर्दते।गूर्दते।२२।गोदते।जुगुदे।२४।
षूद क्षरणे।सूदते।सुषूदे।सेकृसृप सृ स्ल सृजू स्त्र स्त्यान्ये दंत्याऽन्तस्थादयः।एकाचः षोपदेशाः
षष्क ष्विद् ष्वद् ष्वंज् ष्वपृ ष्मिङः। दंत्यः केवलं दंत्यः न तु दंत्योष्ठजो पि।ष्वष्कादीनां ष्ठ यग्रहणं तद्।
२५।ह्राद अव्यक्ते शब्दे।ह्रादते।जह्रादे।२६।ह्लादी सुखे च।वाद्यर्थे दे।ह्लादते।२७।स्वाद आस्वादने।स्वा
दते।२८।पर्द कुत्सिते शब्दे।गुद रवदित्यर्थः।पर्दते।२९।यती प्रयत्ने।यतते।येते।३०।युतृ जुतृ भासने।
योतते।युयुते।जोतते।जुजुते।३२।विथृ वेथृ याचने।विविथे।विवेथे।३३।श्रथि शैथिल्ये।श्रंथते।
३४।ग्रथि कौटिल्ये।ग्रंथते।३५।कत्थ श्लाघायां।कत्थते।३६।एधादयो नुदात्तेतो गताः।अथाष्ट क १४

त्रिंशत्तवर्गीयांताः परस्मैपदिनः॥ अत सातत्यगमने। अतति। अत आदेः। आत। आततुः। आतुः।
लुङि। आतिस्सूई। दितिस्थिते। इट ईटि। इटः परस्य सस्य लोपः स्यात् ईटि परे। सिज्लोपे एकादेशे
सिद्धो वाच्यः। आतीत्। आतिष्टां। आतिषुः। वदव्रजहलंतस्याचः। वदेर्व्रजेर्हलंतस्य चांगस्या
चः॥ नेटि। वृद्धिः स्यात् सिचि परस्मैपदेषु। इति प्राप्ते। नेटि। इडादौ सिचि प्रागुक्तं न स्यात्। माभवा
न अतीत्। अतिष्टां। अतिषुः। चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टां। अचेतिषुः।
१९। च्युतिर् आसेचने। सेचनमार्द्रीकरणं। आङीषदर्थेभिव्याप्तौ वा। इर इत्संज्ञा वाच्या। च्योत
ति। चुच्योत। इरितो वा। इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदे परे। अच्युतत्। अच्योतीत्। ४०।

श्रि

श्चु । तिर्क्षरणे । श्चोतति । चुश्चोत । अश्चुतत् । अश्चोतीत् । यकाररहितोप्ययं । श्चोतति । ॥ मन्थवि
लोडने । यासुट् किदाशीति किल्वादनिदितामिति नलोपः । मथ्यात् । ॥ कुथिपुथिलुथिमथिहिंसासं
क्लेशयोः । इदित्वान्नलोपो ना कुंथ्यात् । मंथ्यात् । ॥ षिध गत्यां । सेधति । सिषेध । सेधिता । असे
धीत् । सात्पदाद्योरिति निषेधे प्राप्ते उपसर्गात्सुनोति सुवति स्यति स्तौति स्तोभति स्थासेनयसेधसि
चसंजस्वंजां । उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात् । सदिरप्रतेः । प्रतिभिन्नादुपसर्गात्सदेः सस्य षः
स्यात् । स्तंभेः । स्तंभेः सौत्रस्य सस्य षः स्यात् । योगविभाग उत्तरार्थः । किं वा । अप्रतेरिति नानुवर्त्तते । बा
ढुप्रतिष्टंभविरुद्धमन्युः । अवाच्चालंबनाविदूर्ययोः । अवात्स्तंभेरेतयोरर्थयोः षत्वं स्यात् । वेश्चस्वनोभो

जने।व्यवाभ्यासस्य नतेः षः स्याङ्गो जने। परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जां। परिनिवि
भ्यः परेषामेषां सस्य षः स्यात्। निषेधति। प्राक् सितादड्व्यवायेपि। सेवसितेत्यत्र सित शब्दात्प्रा
ग्ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्। न्यषेधत्। न्यषेधीत्। न्यषिषेधत्। स्थादिष्वभ्या
सेन चाभ्यासस्य। सेन व्यवायेपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादीनां। निषिषेध। नि
षिषिधतुः। सेधतेर्गतौ। गत्यर्थस्य सेधतेः षत्वं न स्यात्। गंगां विसेधति। ०। षिधू शास्त्रे मांग
ल्ये च। शास्त्रं शासनं। स्वरतिसूतिसूयतिधूञूदितो वा। स्वरत्यादेरूदितश्च परस्य वलादेरार्द्धधा
तुकस्येड्वा स्यात्। झषस्तथोर्द्धोधः। झषः परयोस्तथोर्द्धः स्यान्न तु दधातेः। जस्त्वं। सिषेद्ध। सिषेधिथ।

प्राक्सितात्स्थादि
षभ्या ४

राम
१५

सेद्धा। सेधिता। सेत्स्यति। सेधिष्यति। असैत्सीत्। झलो झलि। झलः परस्य सस्य लोपः स्यात् झलि। असै
द्धां। असैत्सुः। असैत्सीः। असैद्धं। असैद्ध। असैत्सं। असैत्स्व। असैत्स्म। पक्षे असेधीत्। असेधिष्टा
मित्यादि। ४८। खादृ भक्षणे। ऋकार इत्। खादति। चखाद। ४९। खद स्थैर्ये हिंसायां च। चाद्भक्षणे।
स्थैर्ये ऽकर्मकः। खदति। अत उपधायाः। उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे। चखा
द। णलुत्तमो वा। उत्तमो णल् वा णित् स्यात्। चखाद। चखद। अतो हलादेर्लघोः। हलादेर्लघोरकारस्य
इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्। अखादीत्। अखदीत्। ५०। बद स्थैर्ये। पवर्गीयादिः। बद
ति। बबाद। बेदतुः। बेदिथ। गद व्यक्तायां वाचि। गदति। जगाद। नेर्गद नद पत पद घु मा स्यति हन्ति याति

वातिद्यतिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्या
त्गदादिषु परे। प्रणिगदति। रद विलेखने। विलेखनं भेदनं। रराद। पद्मा। णद अव्यक्ते शब्दे। णो नः।
धातोरादेर्णस्य नः स्यात्। णोपदेशास्त्वनर्द्दनाटिनाथ्नाध्नन्दनक्कनॄनृतः। नाटेर्दीर्घोर्हस्य पर्युदासा
द्वयादि णोपदेशत्वात्तवर्गवत् धातनाच्यतेर्न नर्दोस्यके विलोपदेशतामाहुः। उपसर्गादसमा
सेऽपि णोपदेशस्य। उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात् समासेऽसमा
सेऽपि। प्रणिनदति। ५७। अर्द गतौ याचने च। अन्तः। आदेः। तस्मान्नुड् द्विहलः। द्विहलो धातोर्दीर्घीभूता
दकारात्परस्य नुट् स्यात्। आनर्द। आर्दीत्। ५५। नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति।

गर्दति। जगर्द। ५७। तर्द हिंसायां। तर्दति। ५८। कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति। ५९। खर्द दं
दशूके। दंशहिंसादिरूपायां दंदशूकक्रियायामित्यर्थः। खर्दति। चखर्द। ६०। अति अदि बंधने। अंत
ति। आनंत। अंदति। आनंद। ६१। इदि परमैश्वर्ये। इंदति। इंदांचकार। ६२। विदि अवयवे। पवर्गतृ
तीयादिः। बिंदति। अवयवं करोतीत्यर्थः। ६४। भिदीति पाठांतरं। ६५। गडि वदनैकदेशे। गण्डति।
अंतस्थादयः पंचैते न तिङ्विषया इति काश्यपः। अन्ये तु तिङमपीछंति। ६६। णिदि कुत्सायां। निन्दति।
प्रणिन्दति। ६७। टुनदि समृद्धौ। आदिर्ञिटुडवः। उपदेशेऽजनुनासिक इत् इति। ततः स्युः। नन्दति। इति त्वा
न्नलोपो न। नन्द्यात्। ६८। चदि आह्लादे। चचंद। ६९। त्रदि चेष्टायां। तत्रंद। ७०। कदि क्रदि क्लदि आ

कानेरोदनेवाच्वकंदा ७१ वर्क्रंदा ७२ रावर्जांदा ७३ रूक्षि दिपरिदेवने । विक्लिंदा ७४ मुञ्च मुञ्चौ । मुमुञ्च ।
न लोपः सुप्यात् । ७५ । अथ कवर्गीयांताः स्तुदन्तेतो द्विचत्वारिंशत् । शीकृ सेचने । तालव्यादिः ।
दन्त्यादिरित्येके । शीकते । शिशीके । ७६ । लोकृ दर्शने । लोकते । लुलोके । ७७ । श्लोकृ संघाते । संघातो ग्रं
थः । स च ग्रह्यमानस्य व्यापारो ग्रंथितुर्वा । आद्ये ऽकर्मको द्वितीये सकर्मकः । श्लोकते । ७८ । द्रेकृ
ध्रेकृ शब्दोत्साहयोः । उत्साहे वृद्धिरौद्धत्यं चादिः । द्रेके । दिद्रेके । ७९ । रेकृ शंकायां । रेकते । ८० । सेकृ
स्रेकृ स्रकि श्रकि श्लकि गतौ । त्रयो दंत्यादयः । द्वौ तालव्यादी । अषोपदेशत्वान्न षः । सिसेके । ८१ ।
शकि शंकायां । शंकते । शशंके । ८२ । अकि लक्षणे । अंकते । आनंके । ८३ । वकि कौटिल्ये । वंकते । ८४ ।

मकि मण्डने। मंकते।९०। कक लौल्ये। लौल्यं गर्वश्चापलं च। ककते।९१। कुक वृक आदाने। को
कते। चुकुके। वर्कते। ववर्के।९२। चकतृप्तौ प्रतीघाते च। चकते। चेके।९४। ककि वकि श्वकि त्र
कि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। कंकते। डुढौके। तुत्रौ
के। स्तुख्वात्कृष्टिष्ट्वष्कती नांस्त्व प्रतिषेधो वक्तव्यः। ष्वष्कते। पष्वष्के। अत्र तृतीयं दंत्यादिमेके। ल
घि भोजने निवृत्तावपि।१०९। अघि वघि मघि गत्याक्षेपे। आक्षेपो निंदा गतौ गत्यारंभे चेत्य
न्ये। अंघते। आनंघे। वंघते। मंघते। मघि कैतवे च।११०। राघृ लाघृ द्राघृ सामर्थ्ये। राघते। श्राघृ द्रत्य
पि के चित्। द्राघृ आयामे च।११५। श्लाघृ कत्थने। श्लाघते।११७। अथ परस्मैपदिनः।५०। पंचाशत्। फक्क

नीचैर्गतौ। नी चेर्गति मंदगमनं। ऽऽ सघ वहगर स्वा। फक्कति ।११८। तक हसने। तकति ।११९। तकि कृ
छ्रजीवने। तंकति ।१२०। बुक्क भषणे। भषणं श्वरवः। बुक्कति ।१२१। कख हसने। प्रनिकखति ।१२२।
दुखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः ।१२३। शाखृ श्लाखृ व्याप्तौ। शाखति ।१२४। उख
उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अ
गि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयांताः ।१५। पंचदश। तृतीयां
तास्त्रयोदश। दहस्वांतेषु। रिख त्रख त्रिखि शिखि इत्यपि चतुरः केचित्पठंति। अभ्यासस्याऽ
सवर्णे। अभ्यासस्य इवर्णे वर्णयोरियङुवङौ ऽसवर्णे ऽचि। उवोख। सन्निपातपरिभाषया द्

ज्ञादेरित्यात्वम्॥ अरवत्तुः॥ ऊरवुः॥ इह सवर्णे दीर्घस्याभ्यासस्य ग्रहणेन ग्रहणं ह्रस्वः प्राप्तो न भवति।
सकृत्प्रवृत्तत्वात्॥ आंगत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः॥ वर्णादांगं बलीय
इति न्यायात्॥ परत्वाच्च॥ रंखति। वव रवत्तुः॥ वंखति। मे रवत्तुः॥ त्वगि कंपने।१६३। युगि जुगि बुगि
वर्जने। युंगति।१६४। घघ हसने। घघति। जघाघ।१६५। मघि उ मंडने।१६६। शिघि आघ्राणे।१६७। अ
थ चवर्गीयांताः॥ तत्रानुदात्तेत एकविंशतिः॥ वर्च दीप्तौ।१६८। षच सेचने सेवने च। सचते। सेचे। स
चिता।१६९। लोचृ दर्शने। लोचते। लुलोचे।१७०। शच व्यक्तायां वाचि। शेचे।१७१। श्वच श्वचि गतौ।
श्वचते। श्वंचते।१७२। कच बंधने। कचते।१७४। कचि काचि दीप्तिबंधनयोः। कंचते। कांचते। मच मु

विकल्कने। कल्कनं दंभः शाठ्यं वा कथनमित्यन्ये। मेचे। मुमुचे। मवि धारणे। छुश्चाय पूजनेषु। ममं
चे। पवि व्यक्तीकरणे। पंचते।१८०। षुच प्रसादे। स्तोचते। तुष्टुचे।१८१। ऋज गतिस्थानार्जनोपार्ज
नेषु। ऋर्जते। नुट्द्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वात् नुट्। आनृजे।१८२। ऋजि
भृजी भर्जने। ऋञ्जते। उपसर्गादृतीति वृद्धिः। प्रार्ञ्जते। ऋञ्जांचक्रे। आनृञ्जिषे। भर्जते। बभृजे। अभ
र्जिष्ट।१८४। एजृ भ्रेजृ भ्राजृ दीप्तौ। एजांचक्रे।१८७। ईज गतिकुत्सनयोः। ईजांचक्रे।१८८। अथ ७२।
द्विसप्ततिर्वृत्यन्ताः परस्मैपदिनः। शुच शोके। शोचति।१८९। कुच शब्दे तारे। कोचति।१९०। कु
ञ्च कुञ्च कौटिल्याल्पीभावयोः। अनिदितामिति नलोपः। कुच्यात्। कुच्यात्।१९२। लुञ्च अपनय

ने।१९३। ऋम्बु गति पूजनयोः। ऋम्ब्यात्। गतो नेलोपः। पूजायां तु ऋंब्यात्। १९४। मवं तु वंतु नंतु
त्वंतु म्रुंतु स्लुंतु म्रुतु म्लुतु गत्यर्थाः। वव्यात्। वव्यात्। नव्यात्। त्वव्यात्। ऋम्बुं वीत्। ऋम्लुं वी
त्। २०। गृदस्तं गुतु क्लुतु म्लुतु गुतु ग्लुतु ग्लुंतु श्विभ्य वा एभ्य स्लेरङ्वा स्यात्। ऋम्लुवत्। ऋम्लो वीत्।
ऋम्लुवत्। ऋम्लो वीत्। २०। ह्म्लु म्लु स्लु कुञ्जु खुञ्जु स्तेयकरणे ह्नुयो वा। ऋयुवत्। ऋम्लो वीत्। ह्नु स्लो वा।
ऋस्लुवत्। ऋस्लो वीत्। ऋको जीत्। ऋखो जीत्। ग्लुंचु षस्ज गतो। ऋड्डा। ऋस्लुवत्। ऋग्लुंचु वीत्। सस्य स्तु
त्वे न श्चः। जस्त्वे न जः। सज्जति। ऋयमात्मने पदपि। सज्जते। २०। गुजि अव्यक्ते शब्दे। गुंजति। गुंज्यात्। १९०
अर्च पूजायां। ऋानर्च। म्लेछ अव्यक्ते शब्दे। अस्फुटे अपशब्दे वेत्यर्थः। म्लेछति। मिम्लेछ। २११। लछ

सि॰कौ॰ उ॰ ति॰
२०

तेनदीर्घाभावान्नुट्।ऽआंछातपरकरणंसुखमुखार्थमितिमतेतुनुट्।ऽआनांछ।ह्रीछलज्जायां।२

ज्जोछिलक्षणे।लजछ।लजोंछ।२१२।वाछिइच्छायां।वांछति।आछिआयामे।आंछति।अतःआदेरि

त्यत्रतपरकरणंस्वाभाविकह्रस्वपरिग्रहार्थं।जिह्रीछ।हुर्छाकौटिल्ये।कौटिल्यमपसरणमितिमै

त्रेयः।उपधायांचेतिदीर्घः।हूर्छति।मुर्छामोहसमुच्छ्राययोः।मूर्छति।स्फुर्छाविस्तृतौ।स्फूर्छति।युछ

प्रमादे।युछति।२४०।उछिउंछे।उंछःकणशआदानंकणिशाद्यर्जनंशिलमितियादवः।उंछति।

उछीविवासे।विवासःसमाप्तिः।प्रायेणायंविपूर्वः।व्युछति।ध्रजध्रजिध्वजध्वजिध्वज

ध्वजिगतौ।ध्रजति।ध्रंजति।धर्जति।ध्वंजति।ध्वजति।ध्वंजति।कूजअव्यक्तेशब्दे।चुकूज।अर्जषर्ज

अर्जने।अर्जति।आनर्ज।२३०।सर्जति।ससर्ज।गर्जशब्दे।गर्जति।तर्जभर्त्सने।तर्जति।कर्जव्यथने।खर्ज

र्त्स

राम
२०

षूञ् ने वा व[redacted]कर्जी। वर्ज्वर्जी। ऽञ्ज गतिक्षेपणयोः। ऽञ्जति। ऽप्रजेर्यघञपोः। ऽप्रजे वीः। स्य यमादेशः
स्यादाई ध्यातुक विषये घञ मपं ववर्जी यि त्वा। वज्ञा दा वाई ध्यातुके वेष्यते। विवाय। विव्यतुः। विव्युः। ऽअत्र
वकारस्य हल्परत्वात् अपध्यायां वेति दीर्घप्राप्तेः वः परस्मिन्निति स्थानिवद्भावे नावृपरत्वं। न व न प
दान्तेति निषेधः स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्युक्तेः। पजिए काव दतीणिनिषेधे
प्राप्ते। कस्म व स्तु दु सुस्तु वो जिहीर भ्योलिट दृणे न स्यात्। क्रादीनां वतुर्ण्णं ग्रहणं नियमार्थं। प्र
कृत्याश्रयः प्रत्यया श्रयो वा या वा निणि निषेधः स लिटि वेत्तर्हि क्रादिभ्य एव नान्येभ्य इति। तत चतु
र्ण्णं घलिभारद्वाज नियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य वेटो निषेधार्थं। ऽप्रवैस्व स्ता। १

ठस्यनिटोनित्यं।उपदेशेऽजंतोयोधातुस्तासौनित्यानिट्ततःपरस्यथलइडेनस्यात्।उपदेशेऽ
त्वतः।उपदेशेऽकारवतस्तासौनित्यानिटःपरस्यथलइडेनस्यात्।सतोभारद्वाजस्य।तासौनित्या
निटस्वरंतादेवथलोनेट्भारद्वाजस्यमतेना।तेनान्यस्यादेव।अथमत्रसंग्रहः।अजंतोऽकारवान्वा
यस्तास्यनिट्थलिवेडयं।ऋदंतईदृङ्नित्यानिट्क्राद्यन्योलिटिसेड्भवेत्।नचस्तुद्रुवादीनामपिथलि
विकल्पःशंक्यः।अचस्तास्वदितिउपदेशेत्वतइति चयोगद्वयप्रापितस्यैवहिप्रतिषेधस्यभारद्वाज
नियमोनिवर्त्तकः।अनंतरस्येतिन्यायात्।विवयिथ।विवेथ।आजिथ।विव्यथुः।विव्य।विवाय।वि
व्यिव।विव्यिम।वेता।अजिता।वेष्यति।अजिष्यति।अजतु।आजत्।आजेत्।वीयात्।सिचिवृद्धिः

परस्मैपदेषु। इगंतांगस्य वृद्धिः स्यात् परस्मैपदपरे सिचि। अवैषीत्। आजीत्। अवेष्यत्।
आजिष्यत्। तेज पालने। तेजति। खज मंथे। खजति। खजि गतिवैकल्ये। खंजति। एज कंपने। ए
जांचकार। २४० टुओस्फूर्जा वज्रनिर्घोषे। स्फूर्जति। पुस्फूर्ज। क्षि क्षये। अकर्मकः। अंतर्भावितण्य
र्थस्तु सकर्मकः। क्षयति। चिक्षियतुः। चिक्षियुः। चिक्षयिथ। चिक्षेथ। चिक्षियिम। क्षेता। अकृत्सा
र्वधातुकयोर्दीर्घः। अजंतांगस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः। क्षीयात्। अ
क्षैषीत्। क्षीज अव्यक्ते शब्दे। कूजिना सहायं पठितुं युक्तः। चिक्षीज। लज लजि भर्त्सने। लाज लाजि
भर्त्सने च। जज जजि युद्धे। तुज हिंसायां। तोजति। तुतोज। २५० तुजि पालने। गज गजि गृज गृजि

मुज मुजि शब्दार्थाः। गज मदने च। वज व्रज गतौ। वदव्रजेति वृद्धिः। अव्राजीत्। अथ टवर्गीयान्ताः। शा
डंताः अनुदात्तेतः षट्त्रिंशत्। अट्ट अतिक्रमे हिंसयोः। दोपधोयं। तोपध इत्येके। अट्टते। आनट्टे।
वेष्ट वेष्टने। चेष्ट चेष्टायां। अचेष्टिष्ट। गोष्ट लोष्ट संघाते। जुगोष्टे। लुलोष्टे। घट्ट चलने। जघ
ट्टे। स्फुट विकसने। स्फोटते। पुस्फुटे। अठि गतौ। अंठते। आनंठे। वठि एकचर्यायां। ववंठे। मठि
कठि शोके। शोक इह आध्यानं। मंठते। कंठते। २७। मुठि पालने। मुंठते। हेठ विबाधायां। जिहेठे। एठ
ठ च। एठांचक्रे। हिडि गत्यनादरयोः। हिंडते। जिहिंडे। हुडि संघाते। जुहुंडे। कुडि दाहे। चुकुंडे। व
डि विभाजने। मडि च। भडि परिभाषणे। परिहासः सनिंदोपालंभश्च परिभाषणं। पिडि संघा

४४ शाइक्ता घायं॥ अथ॰ आटवगीयां तस्मा [illegible] रस्मै पदिनः॥ शौट्टगर्वे॥ शौटति॥ शु शौट॥ योट्टबंधने॥ योटति॥४

तो॥२८॥ मुडि मार्जने॥ मार्जनं शुद्धिर्न्यंच्छा व स्था॥ मुडते॥ तुडितोडने॥ तोडनं दारणं हिंसनं वा॥ तुडते॥
ऊडि वरणे॥ हरणे इत्येके॥ वडिकोपे॥ श्रडि रुजायां॥ तडि ताडने॥ पडि गतौ॥ कडि मदे॥ खडि मंथे॥ हेडृ
होडृ अनादरे॥ जिहेडे॥ २८॥ जुहोडे॥ वाडृ आप्लाव्ये॥ वघ्नादि॥ आप्लाव्यमाप्लवः॥ वाडते॥ द्राडृ ध्राडृ विश
रणे॥ ओं लेडृ लेडृ उन्मादे॥ द्वितीयो ऽन्तः॥ ठान्तमध्ये पाठस्त्वर्थ साम्यात् पतिवत्॥ लेडति॥ लेडति॥ क
टे वर्षावरणयोः॥ चकाट॥ सिचि॥ अतो ऽल्लादेर्लघोरिति वृद्धेः प्रासायां॥ ह्ल्यंतक्षण श्वसजागृणि
श्व्येदितां॥ ह्मयांतस्य क्षणश्वसेदितां॥ ह्ल्यंतस्य च्वयते रेदितश्च वृद्धिर्न स्यादि ऽजादेः॥ सिचि॥ अकटीत्॥ ऽ॥
अट पटगतौ॥ आट॥ आटतुः॥ आटुः॥ पपाट॥ पेटतुः॥ पेटुः॥ रट परिभाषणे॥ लट बाल्ये॥ शट रुजावि

शटएगत्यवसादनेषु। वट वेष्टने। ववाट। ववटतुः। ववटुः। ववटिथ। किट खिट त्रासे। शिट षिट
अनादरे। शेटति। शिशेट। सेटति। सिषेट। ३१ जट झट संघाते। भट भृतौ। तट उच्छ्राये। खट कांक्षायां।
णट नृत्तौ। पिट शब्दसंघातयोः। हट दीप्तौ। षट अवयवे। लुट विलोडने। अंतोयमित्येके। २०। चिट
परप्रेष्ये। विट शब्दे। बिट आक्रोशे। वशादिः। हिट इत्येके। इट किट कटी गतौ। एटति। केटति। कटति।
ईकारः श्वीदितो निष्ठायामितीण्निषेधार्थः। केचित्तु इदितं मत्वा नुमिच्छंते कंटतीत्यादि वदंति।
अंते वद्ददीदिति प्रश्लिष्या अयति। इयाय। इयतुः। इयुः। इययिथ। इयेथ। इयाय। इयय। दीर्घस्य ॥ राम ॥
त्विजादेरित्यानिजयां चकारेत्यादि उदाहरंति। मडि भूषायां। कुडि वैकल्ये। कुंडति। कुंडतइ ॥२३॥

तितुदाहेगतं। मुटमुटमर्दने। ॥ तुड़ि ऽप्यीभावे। त्रुड़ि खंडने। त्रुंडति। चुड़ि चेत्येके। चुंड़ति। रुटि
लुटि स्तेये। रुंटति। लुंटति। रुठि लुठि इत्येके। रुड़ि लुडीत्यपरे। स्फुटिर् विशरणे। इरित्वाद्वा। ऽस्फु
टत्। ऽस्फोटीत्। स्फुटी त्यपि के वित्। इदित्वान्नुम्। स्फुंटति। पठ व्यक्तायां वाचि। पेठतुः। पेठिथ।
ऽपपठीत्। ऽपाठीत्। वठ स्थौल्ये। ववठतुः। ववठिथ। मठ मदनिवासयोः। कठ कृच्छ्रजीवने। रठ
परिभाषणे। ॥ हठ प्लुति शठत्वयोः। बलात्कार इत्येके। हठति। जहाठ। रुठ लुठ उठ उपघा
ते। उठति। ऊठ इत्येके। ऊठति। ऊठां चकार। पिठ हिंसा संक्लेशनयोः। शठ कैतवे च। शुठ प्रतिघा
ते। शोठति। शुठाति स्वामी। शुंठति। कुठि च। कुंठति। लुठि ऽऽलस्ये प्रतीघाते च। शुठि शोषणे।

सि॰ कौ॰ ५०॰ तिन्वा॰ ५०

२८

३५०। रुठि लुठि गतौ। वुड्ड भावकरणे। भावकरणमभिप्रायस्तवनं। वुड्डति। वुवुड्ड। अड्ड अभि
योगे। अड्डति। आनड्ड। कड्ड कार्कश्ये। कड्डति। वुड्डादयस्त्रयो दोपधाः। तेन क्विपि वुत् अत् कत् इ
त्यादि। क्रीडृ विहारे। विक्रीडते। तुडृ तोडने। तोडति। तुतोड। हुडृ इत्येके। हूडृ हूडृ होडृ गतौ। हूड्यात्।
ऊड्यात्। होड्यात्। ३६०। रौडृ अनादरे। रोडृ लोडृ उन्मादे। अड उद्यमे। अडति। आड। आडतुः। आ
डुः। लड विलासे। लडति। लडयोर्लजयोश्चैकत्वस्मरणं द्रलतीति स्थाप्यादयः। कड मदे। क
डति। कडि इत्येके। कंडति। गडि वदनैकदेशे। गंडति। इति टवर्गीयांताः। अथ पवर्गीयांताः। तत्रानु राम
दात्तेतः स्तोभत्यंताश्चतुस्त्रिंशत्। तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः। आद्योनुदात्तः। स्तीर २८

स्वामी त्वयं सेडिति बभ्राम। तेपृ तेपते। तितिपे। क्रादिनियमादिट्। तितिपिषे। तेप्ता। तेप्स्यते। लिङ्सि
चावात्मनेपदेषु। इक्समीपाद्धलः परो झलादिर्लिङ् आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः। कित्वा
न्न गुणः। तिप्सीष्ट। तिप्सीयास्तां। तिप्सीरन्। अतिप्त। अतिप्साताम्। अतिप्सत। तितेपे। तिष्टिपे।
तिष्टिपाते। तिष्टिपिरे। ष्टू०। तिष्टेपे। तिष्टेपाते। तिष्टेपिरे। तेपृ कंपने च। ग्लेपृ दैन्ये। ग्लेपते। टुवे
पृ कंपने। वेपते। केपृ गेपृ ग्लेपृ च। चात्कंपने गतौ च। स्वत्वविभागादिति स्वामी। मैत्रेयस्तु चका
रमंतरेण पठित्वा कंपन इत्यपेक्षत इत्याह। ग्लेपेरर्थभेदात् पुनःपाठः। मेपृ रेपृ लेपृ गतौ।
रू०। त्रपूष् लज्जायां। त्रपते। तॄफलभजत्रपश्च। एषामत एकादेशोऽभ्यासलोपश्च स्यात् किति लि

ॐ

अंवाः
त्रयः अकौरिकारमकारार्थस्प
त्र्यंबकः

अवकौ

सेदिषपलिवा। त्रेपाते। त्रेपिरे। ऊदित्वाद्दिट्‌वा। त्रपिता। त्रप्ता। त्रपिषीष्ट। त्रप्सीष्ट। कपिवलजनो। कं
पते। ववकंपे। रविः। नविः। अविरप्रारे। ररम्भे। जजम्भे। आनंबे। लविः। अववस्त्रंससने। वा। कवव वर्णे। ववकवे।
क्ली। वः। अप्याप्रौं। विक्लीवे। क्षीवमदे। क्षीवते। क्षीभत्कत्थने। क्षीभते। वीभत्वा। रूई०। रेभृप्राद्दे। रिरे
भे। अभिरभी। कु विलपघेते। अम्रते। रम्रते। ष्टभिस्कभिप्रतिवंधे। स्तंभते। उत्तंभते। उदःस्थास्तं
भोरितिपूर्वसवर्णः। विस्तंभते। स्तम्भे रितिषत्वं तु न भवति। सुविधौ निर्दिष्टस्य सो त्रस्यैवतत्र
ग्रहणात्। तद्वाजंतुस्थास्तंभोरितिपवर्गीयोपधपाठः। स्तन्भेरितितवर्गीयोपधपाठस्त्वेतिमाध
वः। केचिद्दस्यटकारः अपदेशिकइत्याहुः। तन्भते। ष्टंभते। टष्टंभे। जभीजृभिगात्रविनामे। रधिजृ



स्तंभुस्तुंभुइत्यस्तेनिर्दिष्टस्यतेधनार्थस्यैतत्पर्थः। एनत्रु दःजे पदोरूपरिभाषयालभ्यते॰
सौत्रोहिधातुर्नकारोपधइतिप्रतिपत्तिकः॥ इदित्वान्नमित्त्वष्टभिलौसिलिकृते
नविस्तंभ इत्यादौषत्वं नः उदस्थास्तंभोरित्यत्रतुमकारोपधस्यग्रहणेनोभयोरपिग्रह
णंतुतंभतइतितदपरोपंतुल्यं। मकारस्यैवभयत्रेला। सालिकत्वात्‌ जस्तंभु इत्यत्र विधाये
केपि सोत्रस्येवग्रहणमितिदीक्षितोक्तासानवैधेनेनैतरवादमीमांसावेधपधा
सोविफलइत्यवगतिमाति॥

नोरचि। एतयोर्नुमागमः स्यादचि। जंभते। जजंभे। जंभिता। अजंभिष्ट। जंभते। जजंभे। शल्भ
कत्थने। शशल्भे। वल्भ भोजने। दंत्योष्ठ्यादिः। ववल्भे। गल्भ धार्ष्ट्ये। गल्भते। स्रंभु प्रमादे। ताल-
व्यादिर्दंत्यादिश्च। श्रंभते। स्रंभते। ष्टुभु स्तंभे। स्तोभते। विष्टोभते। तुष्टुभे। व्यष्टोभिष्ट। ४०। अथ
परस्मैपदिनः। गुपू रक्षणे। गुपूधूपविच्छिपणिपनिभ्य आयः। एभ्य आयप्रत्ययः स्यात् स्वा-
र्थे। पुगंतेति गुणः। सनाद्यंता धातवः। सनादयः कर्मणिङंताः प्रत्यया अंते येषां ते धातुसंज्ञाः
स्युः। धातुत्वात्तिबादयः। गोपायति। आयादय आर्द्धधातुके वा। आर्द्धधातुकविवक्षायामायाद-
यो वा स्युः। कास्प्रत्ययादाममंत्रे लिटि। कास्धातोः प्रत्ययांतेभ्यश्चाम् स्याल्लिटि न तु मंत्रे।

गोपायतेर्नइत्याहोस्वरे
आयप्रत्यये अकाराविवक्षायाः ...
लिंदङ्ग्रंपेस्याप्तनरं॥

नतु औ अतु इत्यादि रि
भाष्ये तु अपनीयेत्यनुक्तेरद्वावचारेत्यर्थे ओं चकारेत्याद्येवेति ते

काऽस्यनेकाज्ग्रहणं कर्त्तव्यं। अत्र प्रत्ययग्रहणमपनीय तस्थानेऽनेकाच इति वाच्यमित्यर्थः। अ
तो लोपः। आर्द्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्द्धधातुके परे। गो
पायांचकार। गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। ऊदित्वाद्वेट्। जुगोपिथ। जुगो
प्थ। गोपायिता। गोपिता। गोप्ता। गोपाय्यात्। गुप्यात्। अगोपायीत्। अगोपीत्। अगौप्सी
त्। धूप संतापे। धूपायति। धूपायां चकार। दुधूप। धूपायिता। धूपिता। जप जल्प व्य
क्तायां वाचि। जप मानसे च। चप सान्त्वने। षप समवाये। समवायः संबन्धः सम्यगवबोधो वा।
सपति। रप लप व्यक्तायां वाचि। चुप मन्दायां गतौ। चोपति। चुचोप। चोपिता। तुप तुम्प त्रुप त्रु

प्सतुफतुप्सत्रुफत्रुप्सहिंसार्थाः। तोपति। त्तुतोप। ४१०। त्तुंपति। त्तुत्तुंप। त्तुत्तुंपतुः। संयोगात्स्वरस्या
जितः कित्वाभावान्नलोपोनकिदाशिषीति कित्वान्नलोपः। तुप्यात्। प्रात्तुंपतोगविकर्त्तरीतिपार
स्करादिगणेपाठात्सुट्। प्रस्तुंपतिगोः। स्तिपानिर्देशाद्यङ्लुकिनाप्रतोत्तुंपीति। त्रोपति। त्रुंपति। तो
फति। त्तुंफति। त्रोफति। त्रुंफति। इहाद्यौ द्वौ पंचमषष्ठौ वनीरेफाः। अन्येसरेफाः। आद्याश्चत्वारः
प्रथमांताः। ततोद्वितीयांताः। अष्टावप्युकारवंतः। पर्प रफ रफि अर्व पर्व लर्व बर्व मर्व कर्व खर्व
गर्व शर्व षर्व चर्व गतौ। आद्यः प्रथमांतः। ततोद्वितीयांतौ। ततएकादशात्ततीयायांताः। द्वितीयतृती
योमुरुका सर्वे सेपधाः। पर्पति। पपर्प। रफति। रंफति। ४२०। अर्वति। आनर्व। पर्वति। लर्वति। बर्व

सि०कौ०ति०
२७

ति। पवर्गीयादिर्द्वयं। मर्वति। कर्वति। खर्वति। गर्वति। शर्वति। सर्वति। ४२०। चर्वति। कुवि आच्छादने। कुं-
वति। लुवि तुवि अर्दने। लुंवति। तुंवति। जुवि वक्त्रसंयोगे। जुंवति। षृभु षृम्भु हिंसार्थौ। सर्भति। स-
सर्भ। सर्भिता। सृम्भति। ससृम्भ। सृभ्यात्। षिभु षिम्भु इत्येके। सेभति। सिम्भति। शुभ शुम्भ भाषणे।
भासन इत्येके। हिंसायामित्यन्ये। अपानुनासिकान्ताः। तत्र कम्यन्ता अनुदात्तेतो दश। घिणि घु-
णि घृणि ग्रहणे। तुमः। णुत्वं। घिण्णते। जिघिण्णे। [illegible]। घुण्णते। जुघुण्णे। घृण्णते। जघृण्णे। घुण घू-
र्ण भ्रमणे। घोणते। घूर्णते। इमौ तुदादौ परस्मैपदिनौ। पण व्यवहारे स्तुतौ च। पन च। स्तुतावि- राम
त्येव संबध्यते पद पद्भिर्देशात्। पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः। व्यवहारे तु। पणते। पे-

भादिसु साहचर्यं नाभ्युपगच्छति। तथा च प्रायुङ्क्त न चोपलेभे वणिजां पणायामिति।। व्यवहार इत्यर्थः २७

णे। पणिते इत्यादि। स्तुतावनुबंधस्य केवले चरितार्थत्वादाय प्रत्ययांतान्नात्मनेपदं। पणाय
ति। पणायां चकार। पेणे। पणायितासि। पणितासे। पणायात्। पणिषीष्ट। पनायति। पनायां
चकार। पेने। भाम क्रोधे। भामते। बभामे। क्षमूष् सहने। क्षमते। चक्षमे। चक्षमिषे। चक्षंसे। चक्ष
मिध्वे। चक्षमिवहे। म्वोश्च। मांतस्य धातोर्नकारादेशः स्यान्मकारे वकारे च परे। णत्वं। चक्षण्वहे च
क्षमिमहे। चक्षण्महे। क्षमिष्यते। क्षंस्यते। क्षमेत। आशिषि। क्षमिषीष्ट। क्षंसीष्ट। अक्षमिष्ट।
अक्षंस्त। कमु कांतौ। कांतिरिच्छा। कमेर्णिङ्। स्वार्थे। ङित्वात्तङ्। कामयते। अयामंताल्वाय्येत्न्वि
ष्णुषु। आम् अंत आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्याद्वक्ष्यमाणलोपापवादः। काम

अनुनासिकस्य क्वि... संतापूर्वकस्य विधेरनित्यत्वान्न दीर्घः

नामंताल्वाय्येति वक्तव्ये ऽयविधानं ... नेल्यपिलघुपूर्वादिति सूत्रार्थं

यांचङ्को। आयादय आर्द्धधातुके वा। चकमे। कामयिता। कमिता। कामयिष्यते। कमिष्यते। णि
श्रिद्रुस्रुभ्यः कर्त्तरि चङ्। एयंतात् स्यादिभ्यश्च चङ् स्यात् कर्त्तर्थे लुङि परे। का म् इ अ ते इति स्थि
ते। णेरनिटि। अनिडादावार्द्धधातुके परे णेर्लोपः स्यात्। परत्वाद् दरने कार्वङ्ढति यणि प्राप्ते। एय
ल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेनेति वार्त्तिकं। णिलोपस्य तु पावय
तेः पाक्षिदित्यादि क्ति ञंतमवकाश इति भावः। वस्तुतस्तु निटीति वचनसामर्थ्यादार्द्धधातु
कमात्रमस्य विषयः। तथा चेयङादेरपवाद एवायं इयङ्। अत तक्षत्वायणः आदिटतांगु
णः। कारणा। वृद्धिः। कारकः। दीर्घः। कार्यते। णौ चङ्युपधाया ह्रस्वः। चङ्परे णौ यदंगं तस्यो

णध्यायाङ्गस्वः स्यात्। चङि। चङि परे ऽनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तो ऽजादे
स्तु द्वितीयस्य। सन्वल्लघुनि चङ्परे ऽनग्लोपे। चङ्परे इति बहुव्रीहिः। सर्वाङ्गस्येति वचनमथाव
र्तते। अङ्गसंज्ञानिमित्तं यच्चङ्परं णि इति यावत्। तत्परं यल्लघु तत्परो यो ऽङ्गस्याभ्यासस्तस्य
सनीव कार्यं स्यात् णावग्लोपे ऽसति। अथवाऽङ्गस्येति नानुवर्त्तते। चङ्परे यदङ्गं तस्य यो ऽभ्यासो
लघुपरस्तस्येत्यादि प्राग्वत्। सन्यतः। अभ्यासस्यात इकारः स्यात् सनि। दीर्घो लघोः। लघो
रभ्यासस्य दीर्घः स्यात् सन्वद्भावविषये। अचीकमत। णिङ्भावपक्षे। कमेश्च्लेश्चङ् वक्तव्यः। णेर
भावान्न दीर्घसन्वद्भावौ। अचकमत। संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते। तत्रैव दीर्घः

सन्व ह्वनाने काश्चिति माधवः ।१। वकारस्य पर्यायस्तू एलै स्यादेनोङ्गं ह्रि रुच्यते । किं तस्यावयवः
कश्चित्तस्मादेकाश्चिदं द्वयं ।२। वस्तुतोङ्गस्यावयवो योभ्यास इति वर्णनात् । ऊ एलै दीर्घपर्याय
तो द्वयं स्यादिति मन्महे ।३। वकारस्तो तू भयमिदं न स्यास्या ब्व्यवस्थया । एवे विष्लेषं संनिहितं ज
घुनीत्यङ्गमेव वा ।४। इति व्याख्याविकल्पस्य कैयटे नैव वर्णनात् । एवे इत्सोपेपि संबंधस्त्वगिता
मपि सिद्धये ।५। अथ कम्यनाग्निं शात् परस्मैपदिनः । अ एल इ एल व एल भ एल म एल क एल क्ष एल त्र
एल भ्र एल ध्व एल शश्चार्थाः । अ एल ति ।४५। इ एल ति । व एल ति । वकारादित्वादेत्वाभ्यासलोपो न । वव
एलतुः । ववलिथ । धलिरपि केचित्पठन्ति । घ एल ति । उ एल अपनयने । उ एल ति । उ एलं वकारा ।४६।

शोणृ वर्णगत्योः। शोणति। सुश्रोणा। श्रोणृ संघाते। श्लोणृ च। घ्रोणृ द्वयस्त्रयोऽमी ताजयो

श्मादयः। पैणृ गतिप्रेरणश्लेषणेषु। पिपेण। ध्रण शब्दे। उपदेशे नांतोयं। रक्षाभ्यामि

तिणत्वं। ध्रणति। नोपदेशफलं यङ्लुकि। दंध्रंति। वणे त्यपि केचित्। वेणृतुः। वेणिथ।

कनी दीप्तिकांतिगतिषु। चकान। ष्टन वन शब्दे। स्तनति। वनेषण संभक्तौ। वनेरर्थभेदा

त्पुनः पाठः। सनति। ससान। सेनतुः। येविभाषा। जनसनखनामात्वं वा स्यात् घात्क्ङितीति।

सायात्। सन्यात्। ४७०। अम गत्यादिषु। कनी दीप्तिगतीत्यत्र गतेः परयोः शब्दसंभक्त्यो

रादिशब्देन ग्रहः। अमति। आम। द्रम हम्म मी मृ गतौ। द्रमति। दद्राम। हम्मतेति न कृञिः। मृ

इमीत्। जहंम। मीमति। मिमीम। अयं शप्। चा। चमु छमु जमु [redacted]मु अदने। ष्ठिवु क्लमु
चमां शिति। एषामचो दीर्घः स्यात् शिति। आङि चम इति वक्तव्यं। आचामति। आङः किं।
चमति। विचमति। अचमीत्। जिमि केचित् पठंति। जेमति। क्रमु पादविक्षेपे। वा भ्राश भ्ला
श भ्रमु क्रमु क्लमु त्रसि त्रुटि लषः। एभ्यः श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे। क्रमः
परस्मैपदेषु। क्रमेर्दीर्घः स्यात् परस्मैपदे शिति। क्राम्यति। क्रामति। चक्राम। क्राम्यतु।
क्रामतु। स्नुक्रमोरनात्मनेपदनिमित्ते। अत्रैवेट्। अक्रमीत्। अपरे वस्यंता। अनुदा
त्तेतः। अय वय पय मय चय तय णय गतौ। अयते। दयायासश्च। दय। अय। आस् एभ्य

५ षष्ठी द्विवचनस्यार्थः ५
२ स्नुक्रमोरित्यत्र वलादेरार्धधातुकस्येट् २
अनात्मनेपदनिमित्तभावस्त्पेव स्नुक्र
मो[redacted]॥ अन्येन निमित्त इति
व्यत्ययेन द्विवचनस्थाने व्यत्ययेनै
कवचनं॥ परंतु स्नुक्रमोरिति षष्ठीः स्थाने प्रथमेत्याहुः

ःनाम्न्या द्विरेफे । अयां चक्रे । अयेता । अयिषीष्ट । विभाषेटः । इणः परो य इट् ततः परे षी
ध्वं लुङ्लिटोर्धस्य वा मूर्द्धन्यः स्यात् । अयिषीढ्वं । अयिषीध्वं । आयिष्ट । आयिढ्वं । आयि
ध्वं । उपसर्गस्यायतौ । अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् । प्लायते । पला
यते । निस्दुसो रुत्वस्यासिद्धत्वान्न लत्वं । निरयते । दुरयते । निर्दुरोस्तु । निलयते । दु
लयते । प्रत्यय इति लिङ्गे रूपं । अथ कथमुदयति विततोर्द्ध्वरश्मिरज्जाविति माघः । इट्कि
रकोऽन्त्यत्र प्रश्लिष्टस्य भविष्यति । यद्वा अनुदात्तेत्वलक्षणमात्मनेपदमनित्यं । चक्षि
ङः ङित्करणात् ज्ञापकात् । ४८० । वादित्वात् । वयये । पेये । मेये । वेये । तेये । प्रणयते । नेये । दय

दानगतिरक्षणे हिंसादानेषु। आदानं ग्रहणं। दयांचक्रे। रयगतौ। ऊयीतंतु संताने। ऊयां
चक्रे। पूयीविशरणे दुर्गंधे च। पूयते। पुपूये। क्नूयी शब्दे उंदे च। चुक्नूये। क्ष्मायी विधू
नने। चक्ष्माये। स्फायी ओप्यायी वृद्धौ। स्फायते। पस्फाये। प्यायते। लिटि यङि
च प्यायः पी भावः स्यात्। पुनः प्रसंगविज्ञानात् पी शब्दस्य द्वित्वं। एरनेकाच इति यण्। पि
प्ये। पिप्याते। पिप्यिरे। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यां। एभ्यश्चिण्। एक
स्यादेकवचने तशब्दे परे। चिणो लुक्। चिणः परस्य लुक् स्यात्। अप्यायि। अप्यायिष्टा। ता
यृ संतानपालनयोः। संतानः प्रबंधः। तायते। ततायो। अतायि। अतायिष्ट। शल चलनसं

वरणयोः। शेलो वल वल्ल संवरणे संचरणे च। ववले। ववल्ले। मल मल्ल धारणे। मेले। मम
ल्ले। ५०। भल भल्ल परिभाषणहिंसादानेषु। बभले। बभल्ले। कल शब्द संख्यानयोः। कल
ते। चकले। कल्ल अव्यक्ते शब्दे। कल्लते। अशब्दे इति स्वामी। अशब्दस्तूष्णीं भाव इति वा। तेवृ देव
देवने। तितेवे। दिदेवे। षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने। परिनिविभ्य इति षत्वं। परिषे
वते। सिषेवे। अयं सोपदेशोपीति न्यासकारादयः। तद्भाष्यविरुद्धं। गेवते। जिगेवे। जिग्ले
वे। पिपेवे। ५१०। मेवते। शेवृ षेवृ केवृ रेवृ इत्यप्येके। रेवृ प्लवगतौ। प्लवगतिः प्लुतगतिः। रेव
ते। अप्यावत्यंताः परस्मैपदिनः। मव्य बंधने। ममव्यौ। सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। हय गतौ।

मव्यात
हलोयमामितिलोपः

ऽहयीत्। यांतत्वान्न वृद्धिः। ष्टुच्य अभिषवे। अवयवानां शिथिलीकरणं सुरायाः संधानं वा
ऽभिषवः स्नानं वा। ष्टुष्टुच्या। ष्टुच्य इत्येके। हर्य गतिकांत्योः। जहर्य। प२०। अल भूषणपर्याप्ति
वारणेषु। अलति। आल। अतो ल्रांतस्य। इति लुप्तषष्ठीकं। अतः समीपो यो ल्रौ तदंताग
स्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। नेटीति निषेधस्यातो हलादेरिति विकल्पस्य वा
पवादः। मा भवानालीत्। अयं स्वरितेदित्येके। तन्मतेऽलते इत्याद्यपि। ञिफला विशरणे।
तॄफलेत्येत्वं। फेलतुः। अफालीत्। मील श्मील स्मील क्ष्मील निमेषणे। निमेषणं संको
चः। द्वितीयस्तालव्यादिः। तृतीयो दंत्यादिः। पील प्रतिष्टंभे। प्रतिष्टंभो रोधनं। नील वर्णे। शि

निरनुबंधकपरिभाषया। अत्पर विधिप्रवि
षयत्वादिति केचित्॥ तत्कः किं वंसा वर्ति
कत्वेऽस्या पक्षमिति मेत्वे तृफ त्रपश्चेति चकारेण
स्य संग्रहः॥ लोपकालिंङ्गं न सर्वत्रेत्यनाप्रवृत्ति
रिति तुतत्वंऽह धेनत्वानुबंधानुच्चारणादिति।

नीऌ। ष्मीऌ समाधौ। ष्मीऌति। कीऌ बंधने। ५३० कूऌ आवरणे। मूऌ रुजायां संघोषे वा। तू
ऌ निष्कर्षे। निष्कर्षो निष्कोषणं तद्वां तत्र तस्य बाह्निःसारणं। तूतऌ। पूऌ संघाते। मूऌ प्र स्थानःसमूहः
तिष्ठायां। फऌ निष्पत्तौ। फेऌतुः। फेलुः। बुद्ध भावकरणे। भावकरणमभिप्रायाविष्कारः। फु
ल्ल विकसने। चिऌ त्रापि चिल्ये भावकरणे वा। तिऌ गतौ। तेऌति। तिल्लेत्येके। तिल्लति। ५४०
वेऌृ वेऌृ केऌृ खेऌृ क्ष्वेऌृ वेल्ल चलने। पंच सदितः षष्ठो लोपधः। पेऌृ फेऌृ शेऌृ गतौ।
षेऌृ इत्येके। स्खऌ संचलने। वस्खाऌत्। अस्खालीत्। ५५० खऌ संचये। गऌ अदने। ग
ऌति। अगालीत्। षऌ गतौ। सऌति। दऌ विशरणे। श्वऌ श्वल्ल आशुगमने। शश्वाऌ। अ

ष्ठालीत्। शष्ठल्ल। अष्ठल्लीत्। खोलृ खोर्ऋ गतिप्रतिघाते। खोलति। खोर
ति। धोर्ऋ गतिचातुर्ये। धोरति। त्सर छद्मगतौ। त्सरति। अत्सारीत्। ५६०॥
क्मर हूर्छने। चक्मार। अभ्र वभ्र मभ्र चर गत्यर्थाः। चरतिर्भक्षणेऽपि। अ
भ्रति। आनभ्र। मा भवानभ्रीत्। अंगात्परे रेफस्यातः समीपत्वाभावान्न
वृद्धिः। ष्ठिवु निरसने। ष्ठिवुक्लमिचमां शिति दीर्घः। ष्ठीवति। अस्य द्वितीयस्य थकार
ष्ठकारो वेति वृत्तिः। तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। दा। जिचा

ष्ठीव्यात्। जि जये। अयमजंतेषु पठितुं युक्तः। जयत्युत्कर्षप्राप्तिः। अकर्मको

यो। जयति। सन्लिटोर्जेः। जयतेः सन्लिटोर्निमित्तयो अभ्यासात्तः परस्य कुत्वं स्यात्। जिगाय।
जिग्यतुः। जीयात्। अजैषीत्। जीव प्राणधारणे। जिजीव। पीव मीव तीव नीव स्थौल्ये। पिपीव।
मिमीव। ५७०। तितीव। निनीव। क्षीवु क्षेवु निरसने। उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः। ऊर्वी
वकारान्त उपधायां वा। तुतूर्व। गुर्वी उद्यमने। गूर्वति। ५८०। मुर्वी बन्धने। पुर्व पर्व मर्व पूरणे। चर्व
अदने। भर्व हिंसायां। कर्व खर्व गर्व दर्पे। अर्व शर्व षर्व हिंसायां। आनर्व। ५९०। शर्वति। सर्वति।
इवि व्याप्तौ। इन्वति। इन्वांचकार। पिवि मिवि णिवि सेवने। तृतीयो मूर्द्धन्यो णत्वादि इत्येके। सेव
न इति तरंगिण्यां। पिन्वति। पिपिन्व। हिवि दिवि धिवि जिवि प्रीणनार्थाः। हिन्वति। दिन्वति। धिन्वि

कृण्व्योरच्च॥ अनयोरकारोन्तादेशः स्यादु प्रत्ययश्च शब्विषये॥ अतो लोपः॥ तस्य स्थानिवद्भावा
ल्लघूपधगुणो न॥ उ प्रत्ययस्य पित्सु गुणः॥ धिनोति॥ धिनुतः॥ धिन्वन्ति॥ लोपश्चास्यान्यतरस्यां
म्वोः॥ असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वास्यान्म्वोः परयोः॥ धिन्वः॥ धिनुवः॥
धिन्मः॥ धिनुमः॥ मिपि तु परत्वाद्गुणः॥ धिनोमि॥ उतश्च प्रत्ययादसंयोगपूर्वात्॥ असंयोगपूर्वो
यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक्स्यात्॥ धिनु॥ नित्यत्वादुकारलोपात्पूर्वमाट्॥ धिन
वाव॥ धिनवाम॥ अधिन्वतीत्यादि॥ ५॥ रिवि रवि धवि गत्यर्थाः॥ रिण्वति॥ रण्वति॥ धन्वति॥ कृवि हिं
साकरणयोश्च॥ वकारादतो॥ कृणोतीत्यादि धिनोतिवत्॥ अयं स्वादौ च॥ मव बन्धने॥ मेवतुः॥

मेवुः। ऽममवीत्। ऽममावीत्। ऽअवरक्षण गतिकांतिप्रीतितृप्ति ऽअवगमप्रवेशश्रवण स्वा
म्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु ऽअवति। ऽआवामाभवानवी
त्। धावु गतिशुद्ध्योः। स्वरितेत्। धावति। धावते। दधाव। दधावे। ऽअथोष्मांता ऽआत्मनेपदिनः।
धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे। वृक्ष वरणे। वृक्ष
ते। ववृक्षे। ६१०। शिक्ष विद्योपादाने। शिक्षते। भिक्ष भिक्षायामलाभे लाभे च। भिक्षते। क्लेश
ऽअव्यक्तायां वाचि। बाधने इति दुर्गः। क्लेशते। चिक्लेशे। दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे। दी
क्ष मौंड्येज्योपनयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे। ईक्ष दर्शने। ईक्षांचक्रे। ईष गतिहिं

सादर्शनेषु। ईषांचक्रे। भाष व्यक्तायां वाचि। भाषते। वर्ष स्नेहने। दंतोष्ठ्यादिः। ववर्षे। गेषृ अन्वि
च्छायां। गेषते। जिगेषे। अन्विच्छा अन्वेषणं। जिगेषे। १२०। येषृ प्रयत्ने। जेषृ णेषृ एषृ प्रेषृ गतौ। जे
षते। नेषते। एषांचक्रे। पिप्रेषे। रेषृ हेषृ ह्रेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे।
रेषते। हेषते। ह्रेषते। कासृ शब्दकुत्सायां। कासांचक्रे। भासृ दीप्तौ। बभासे। १३०। णासृ रासृ श
ब्दे। नासते। प्रणश्यते। णसकौटिल्ये। नसते। भ्यस भये। भ्यसते। बभ्यसे। आङः शसि इच्छा
यां। आशंसते। आशशंसे। ग्रसु ग्लसु अदने। जग्रसे। जग्लसे। ईह चेष्टायां। ईहांचक्रे। बहि महि वृ
द्धौ। बंहते। बबंहे। मंहते। १४०। अहि गतौ। अंहते। आनंहे। गर्ह गल्ह कुत्सायां। जगर्हे। जगल्हे। बर्ह

वल्ह आध्यान्ये। उ ष्यादा। वर्ह वल्ह परिभाषणे। हिं सा छादने षु। दंतोष्यादी। के वित्तु पूर्वयो
र्दंतोष्यादिता मनयोरोष्यादितां वाङ्कः। स्निह गतौ। पिस्निहे। वेह जेह वाह प्रयत्ने। आद्यो दंतो
ष्यादिः अंतः केवलोष्यादिः। उभावप्योष्यादा इत्येके। दंतोष्यादी इत्यपरे। जेहतिर्गत्यर्थोपि।
६५। णवबाहो। ऊह निरूक्षये। निक्षेप इत्येके। कान्त दीप्तौ। वकाशो। ऊह वितर्के। ऊहां चक्रे। गाहू
विलोडने। गाहते। जगाहे। जगाहिषे। जघाक्षे। जगाहिढ्वे। जगाहिध्वे। जगाढ्वे। गाहिता। ढो ढे लो
पः। ढस्य लोपः स्यात् ढे परे। गाढा। गाहिष्यते। घाक्ष्यते। गाहिषीष्ट। घाक्षीष्ट। अगाढ। अगा
हिष्ट। अघाक्षातां। अघाक्षत। अगाढाः। अघाढ्वं। अघाक्षि। ग्रहू ग्रहणे। गर्हते। जग्रहे। रूडुप

ये भ्योऽनिटः कित्वं गुणात्पूर्वविप्रतिषेधेन। जगृहिषे। जघृक्षे। जघृढ्वे। गर्हिता। गर्ढा। गर्हि
ष्यते। घर्क्ष्यते। गर्हिषीष्ट। घृक्षीष्ट। लुङि। अगर्हिष्ट। इडभावे। शल इगुपधादनिटः क्सः।
इगुपधो यः शलंतस्तस्मादनिटश्च्लेः क्सादेशः स्यात्। अघृक्षत। क्सस्याचि। अजादौ तङि
क्सस्य लोपः स्यात्। अजेौत्यस्य। अघृक्षातां। ग्लह। ग्लहते। गुषि कांतिकरणे। गुंषते। जुगुं
षे। केचिद्गुषेत्युपधं पठंति। अथार्हत्यंताः परस्मैपदिनः। घुषिर् अविशब्दने। विशब्दनं
प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके। शब्दे इत्यन्ये पेठुः। घोषति। घोषिता। इरित्वाद्वा। अघु
षत्। अघोषीत्। अक्ष व्याप्तौ। अक्षोऽन्यतरस्यां। अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधा

लुके परे। पक्षे श्नपू। अक्ष्णोति। अक्ष्णुतः। अक्ष्णुवंति। अक्षति। अक्षतः। अक्षंति। आन
क्ष। आनक्षिथ। आनष्ठ। अक्षिता। अष्टा। अक्षिष्यति। स्कोरिति कलोपः। षढोः कः सि। अ
क्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवं। अक्ष्णुयात्। अक्ष्यात्।
अक्ष्यास्तां। ऊदित्वाद्वेट्। नेटि। मा भवान क्षीत्। आक्षिष्टां। आक्षिषुः। ६८ मा भवेत् मा भवा
नाक्षीत्। आष्टां। आक्षुः। ६९ तक्षू त्वक्षू तनूकरणे। तनूकरणे तक्षः। श्नुः स्याद्वा रावि
षये। तक्ष्णोति। तक्षति काष्ठं। ततक्षिथ। ततष्ठ। अतक्षीत्। अतक्षिष्टां। अताक्षीत्। अता
ष्टां। तनूकरणे किं। वाग्भिः संतक्षति। भर्त्सयतीत्यर्थः। उक्ष सेचने। उक्षांचकार। रक्ष पालने।

।ऌक्ष तुबने। प्रऌक्षति। तक्ष त्वक्षणे। क्ष गतौ। तक्षति। स्नक्षति। नक्षति। वक्ष रोषे। संघातेइ
त्येके। मक्ष संघाते। मक्षइत्येके। ६७० तक्ष त्वचने। त्वचनं संवरणं त्वचो ग्रहणं वा। पक्ष परिग्र
ह इत्येके। सूर्क्ष आदरे। सुसूर्क्षी। अनादर इति काशिकोपपाठः। अवज्ञावहेलन मसूर्क्षणमि
त्यमरः। काक्षि वाक्षि माक्षि कांक्षायां। द्राक्षि ध्राक्षि ध्वाक्षि घोर वाशिते च। चूष पाने। चुचूषा त
पतुषे। ६८०। तूष तुष्टौ। पूष वृद्धौ। मूष स्तेये। लूष रूष भूषायां। सूष प्रसवे। तालव्योष्मादिः। यूष हिंसा
यां। जूष च। भूष अलंकारे। भूषति। ऊष रुजायां। ऊषां चकार। ईष उञ्छे। ६९०। कष खष शिष
जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्मादिः। वका

षा। वरवाषा। शिशेषा। शिशेषिषा। शेष्टा। क्त्तः। अशिशत्। अशेक्ष्यत्। जेषतुः। जरुषतुः। शेषतुः।
ववषतुः। मेषतुः। तीषसहलुभरुषरिषः। इह त्यादेपरस्य तादेशाड्धातुकस्येड् स्यात्। रो
षिता। रोष्टा। रोषिष्यति। रेषिता। रेष्टा। रेषिष्यति। ७०। भष भर्त्सने। इह भस्सनं ष्वरव। भ
षति। बभाष। ऊहाहा। उषति। अवविद्माग म्भ्यो न्यतरस्यां। एभ्यो लिघ्यास्वा स्यात्। उषांचकार।
उवोष। ऊषतुः। उवोषिथ। निषु विषु मिषु सेचने। निनेष। क्रादिनियमादिट्। विवेषिथ। विवे
षिव। वेष्टा। वेक्ष्यति। अविक्षत्। पुष पुष्टौ। पोषति। पोषिता। पोषिष्यति। अपोषीत्। अनिट्
पुपुष्येति श्यनानिर्देशादयं सेट्। अतो न क्तः। अड्विष्योदैवादिकस्य ग्रहणं नाड्। श्रिषु श्लि

श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता। अयमपि सेट्। अनि
ट्सु दैवादिकस्यैव ग्रहणमिति कैयटादयः। यत्तु अनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं। तत्त
त्वोक्तिविरोधादुपांतरविरोधाच्चोपेक्ष्यं। पुप्रोष। पुप्लोष॥ ७१०॥ पृषु वृषु मृषु सेचने। मृषु स
हने च। इतरौ हिंसासंक्लेशनयोश्च। पर्षति। पपर्ष। वृष्यात्। घृषु संघर्षे। हृषु अलीके। तुस
ह्रस ह्लस रस शब्दे। तुतोस। जह्रास। जह्लास। ररास। लस श्लेषण क्रीडनयोः॥ ७२०॥ घस्लृ अ
दने। अयं न सार्वत्रिकः। लिट्यन्यतरस्यामित्यदेर्घस्लादेशविधानात्। तत्र यत्र लिंगं वचनं
वास्ति तत्रैवास्य प्रयोगः। अत्रैव पाठः। परस्मैपदे लिंगं। ऌदित्करणमङर्थं। अनिट्कारि

कासृ पाठेवलो पाई व्यातुके। कादविलु विश्रिष्यो पातनं। वसति। वस्ता। सस्याई व्यातुके। स
स्यतः स्यासा दा वाई व्यातुके। घस्यति। वसतु। अवसत्। वसेत्। लिंगाध भावादाशिष्यस्या
प्रयोगः। पुषादिद्युताद्य्लृदितः परस्मैपदेषु। स्यन्विकरणे पुषादेर्द्युतादेर्लृदितश्च परस्य
च्लेरङ् स्यात् परस्मैपदेषु। अवसत्। जर्ज चर्च झर्झ परिभाषणे हिंसातर्जनेषु। पिस पेस ग
तौ। पिपिसतुः। पिपेसतुः। हसे हसने। एदित्वान्न वृद्धिः। अहसीत्। णिश समाधौ। तालव्योष्ठ्यां
तः। प्रणेशति। मिश मश शब्दे रोषकृते च। तालव्योष्ठ्यांतौ। ॥२४॥ शव गतौ। दंतोष्ठ्यांतः। तालव्यो
ष्ठ्यादिः। शवति। अशावीत्। अशवीत्। शश प्लुतगतौ। तालव्योष्ठ्याद्यंतः। शशाश। शेशतुः।

शेरतुः। शेशिषे। शसु हिंसायां। दंत्योष्मांतः। नशसदद इत्येत्वं न। शशसतुः। शशसुः। शशसिथ। शंसु
स्तुतौ। अयं दुर्गतावपीति दुर्गः। नृशंसो घातुकः। क्रूर इत्यमरः। शशंस। आशिषि न लोपः। शस्या
त्। चह परिकल्कने। कल्कनं शाठ्यं। अचहीत्। मह पूजायां। अमहीत्। रह त्यागे। रहि गतौ। रंहति।
रंह्यात्। दृह दृहि वृह वृहि वृद्धौ। दर्हति। ददर्ह। ददृहतुः। दृंहति। ७४०। वर्हति। वृंहति। वृहि शब्दे च।
वृंहितं करिगर्जितं। वृहिर् इत्येके। अवर्हीत्। अवृंहीत्। तुहिर् दुहिर् उहिर् अर्दने। तोहति। तु
तोह। अतुहत्। अतोहीत्। अदुहत्। अदोहीत्। अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेति। उहति।
उवोह। ऊहतुः। उहिता। मा भवानुहत्। औहीत्। अर्ह पूजायां। आनर्ह। अथ कृपूपर्यंता अनुदा

त्तेतः। द्युतदीप्तौ। द्योतते। द्युतिस्वाप्योः संप्रसारणं। अनयोरभ्यासस्य संप्रसारणं स्यात्। दि
द्युते। दिद्युताते। द्योतिता। द्युभ्यो लुङि। द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्। पुषादीति सू
त्रेण परस्मैपदेऽङ्। अद्युतत्। अद्योतिष्ट। श्विता वर्णे। श्वेतते। शिश्विते। अश्वितत्। अश्वेति
ष्ट। ञिमिदा स्नेहने। मेदते। मिदेर्गुणः। मिदेरिको गुणः स्यादिसंज्ञकशकारादौ। एश। आदिरिति ना
भावान्नानेन गुणः। मिमिदे। अमिदत्। अमेदिष्ट। ञिष्विदा स्नेहनमोचनयोः। मोहनयो
रित्येके। स्वेदते। सिष्विदे। अस्विदत्। अस्वेदिष्ट। ञिक्ष्विदा चेत्येके। अक्ष्विदत्। अक्ष्वेदिष्ट।
७५० रुच दीप्तावभिप्रीतौ च। रोचते सूर्यः। हरये रोचते भक्तिः। अरुचत्। अरोचिष्ट। घुट प

शि॰ कौ॰ उ॰ ति॰
४०

रिवर्त्तने। घोटते। जुघुटे। अघुटत्। अघोटिष्ट। रुट लुट लुठ प्रतिघाते। अरुटत्। अरोटिष्ट।
शुभ दीप्तौ। क्षुभ संचलने। णभ तुभ हिंसायां। आद्योऽभावेपि। नभंताम् अन्यके समे। माभूवन्न
न्यके सर्वे इति निरुक्तं। अनभत्। अनभिष्ट। अतुभत्। अतोभिष्ट। इमौ दिवादौ क्र्यादौ चा स्रं
सु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। अङि नलोपः। अस्रसत्। अस्रंसिष्ट। नास्त्रसल्क
रिणां ग्रेवमिति रबुकाब्धे। ७७१। भ्रंसु इत्यपि केचित्पठन्ति। अत्र तृतीय एवताल्यान्त इत्यन्ये।
भ्रंसु भ्रंसु अधःपतने इति दिवादौ। स्रंभु विश्वासे। अस्रभत्। अस्रंभिष्ट। दंत्यादिरयं। ता
लव्यादिस्तु प्रमादे गतः। वृतु वर्त्तने। वर्त्तते। ववृते। वृद्भ्यः स्यसनोः। वृतादिभ्यः परस्मैपदं

राम
४०

वा स्या। स्ये स नि वा। न वृद्भ्यश्चतुर्भ्यः। एभ्यः सकारादेरार्द्धधातुकस्येण्न स्यात्तङानयोरभा
वे। वर्त्स्यति। वर्त्तिष्यते। अवृतत्। अवर्त्तिष्ट। अवर्त्स्यत्। अवर्त्तिष्यत। वृधु वृद्धौ। शृधु शब्दकु
त्सायां। इमौ वृतिवत्। स्यंदू प्रस्रवणे। स्यंदते। सस्यंदे। सस्यंदिषे। सस्यंत्से। सस्यंदिध्वे। सस्यं
ध्वे। स्यंदिता। स्यंता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वपक्षे इण्मतं तरंगमपि विकल्पं बाधि
त्वा वृत्तुर्थ्यह एव सामर्थ्यान्न वृद्भ्य इति निषेधः। स्यंत्स्यति। स्यंदिष्यते। स्यंत्स्यते। स्यंदिषीष्ट। स्यं
त्सीष्ट। द्युद्भ्यो लुङीति परस्मैपदपक्षे। ऋदित्त्वान्नोपः। अस्यदत्। अस्यंदिष्ट। अस्यंत्त। अस्यं
त्साताम्। अस्यंत्स्यत्। अस्यंदिष्यत। अस्यंत्स्यत। अनुविपर्यभिनिभ्यः स्यंदतेरप्राणिषु। ष

सि॰ कौ॰ उ॰ ति॰
४२

न्यः परस्या प्राणिकर्तृकस्य स्यंदतेः सस्य षो वा स्यात्। अनुष्यंदते। अनुस्यंदते वा जलं। अ
प्राणिषु किं। अनुस्यंदते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यंदते इत्यत्रापि प
क्षे षत्वं न वत्वे वा प्राणिषु नेत्युक्तौ तु न स्यात्। रुपू सामर्थ्ये। कृपो रो लः। कृपवः इति छेदः। कृ
पेति लुप्तषष्ठीकं। तत्रावर्त्तते। कृपो यो रेफस्तस्य लः स्यात्। कृपेर्ऋकारस्यावयवयो रः रेफ
सदृशस्तस्य लकारसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे चक्लृप्से। इत्यादि स्यंदिवत्।
लुटि च क्लृपः। लुटि स्य सनोश्च कृपेः परस्मैपदं वा स्यात्। तासि च क्लृपः। कृपेः परस्य तासेः स राम
कारादेरार्द्धधातुकस्य वेण्न स्यात् तङानयोरभावे। कल्प्तासि। कल्प्तास्थः। कल्पितासे। कल्प्ता ४१

४ं

सो। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट। कॢप्सीष्ट। अकॢपत्। अकल्पिष्ट। अ
कॢप्त। अकल्प्स्यत्। अकल्पिष्यत। अकल्प्स्यत। इति वृतः। संपूर्णो द्युतादिर्वृतादिश्चेत्य
र्थः। अथ त्वरत्यंतास्त्रयोदशानुदात्तेतः षितश्च। घट चेष्टायां। घटते। अघटि। घटादयो मित
इति वक्ष्यमाणे न मित्संज्ञा। तत्फलं तु णौ मितां ह्रस्वः इति चिण्णमुलो दीर्घोऽन्यतरस्यामिति
च वक्ष्यते। घटयति। विघटयति। कथं तर्हि कमलवनोद्घाटनं कुर्वते ये प्रविघाटयिता समुत्प
तन्हरिदश्वः कमलाकराणि वेत्यादि। घट संघात इति चौरादिकस्येदं। न च तस्यैवार्थ
विशेषे मित्वार्थमनुवादोऽयमिति वाच्यं। नान्ये मितोऽहेताविति निषेधात्। अहेतौ स्वार्थे णि

चित्रपादिषु वक्ष्यति रित्यानुशारदयो मितो नेत्यर्थः। व्यथ भय संचलनयोः। व्यथते। व्यथो
लिटि। व्यथोभ्यासस्य संप्रसारणं स्यात्। हलादिशेषापवादः। यस्य हलादिशेषेण नि-
वृत्तिः। विव्यथे। ११० प्रथ प्रख्याने। पप्रथे। प्रस विस्तारे। पप्रसे। म्रद मर्दने। स्खद स्खदने।
स्खदनं विद्रावणं। क्षजि गतिदानयोः। मित्वसामर्थ्यादनुपधात्वेपि चिण्णमुलो हितिदीर्घवि-
कल्पः। अक्षञ्जि। अक्षाञ्जि। क्षंक्षं क्षञ्जं। क्षाञ्जं क्षाञ्जं। दक्ष गतिहिंसनयोः। योयं वृद्धिशैघ्र्या-
र्थयोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषमित्वार्थोनुवादः। क्रप कृपायां गतौ। कदि क्रदि क्लदि
दि वैक्लव्ये। वैकल्य इत्येके। त्रयोप्यनिदित इति नंदी। इदित इति स्वामी। कदि क्रदी इदितो।

नवेद

क्रद क्रदेति वा निर्दिताविति मैत्रेयः। कदि क्रदि क्लदीनां घानेयोः परस्मैपदिषु पठितानां पु
नरिह पाठो मित्वार्थ आत्मनेपदार्थश्च। ७८०। मित्वरा संभ्रमे। घटादयः षितः। षित्वाद
ङ्। रूसु वक्ष्यते। अथ फणान्ताः परस्मैपदिनः। ज्वर रोगे। ज्वरति जज्वार। गड सेचने। गड
ति जगाड। हेड वेष्टने। हेडृ अनादर इत्यात्मनेपदिषु गतः। स एवायमिह षानुबंधो ऽनूद्यते अ
र्थविशेषे मित्वार्थं परस्मैपदार्थं च। ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्ये अनुवादः साम
र्थ्यात्परस्मैपदं। हेडति। जिहेड। हिडयति। अहिडि। अहीहि। अनादरे तु हेडयति। वट भट प
रिभाषणे। वट वेष्टने। भट भृताविति पठितयोः परिभाषणे मित्वार्थो ऽनुवादः। नट नृत्तौ।

इत्थमेव पूर्वमपि पठितं। तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारिषु नटव्य
पदेशः। वाक्यार्थाभिनयो नाट्यं। घटादौ तु नृत्यं नृत्तं वार्थः। यत्कारिषु नर्त्तकव्यपदेशः। प
दार्थाभिनयो नृत्यं। गात्रविक्षेपमात्रं नृत्तं। केचित्तु घटादौ नट नताविति पठंति। गता
वित्यन्ये। णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीति दीर्घपाठात् घटादाणोपदेश एवाष्ट
कप्रतीघाते। स्तकति। चक तृप्तौ। तृप्तिप्रतिघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्वापोनु
वादः। आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदं। कखे हसने। एदित्वा
न्न वृद्धिः। अकखीत्। १६०। रगे शंकायां। लगे संगे। ह्रगे ह्लगे षगे ष्ठगे संवरणे। कगे

नोच्यते। अस्यायमर्थ इति विशिष्य नोच्यते। क्रियासामान्यार्थत्वात्। अनेकार्थत्वादि
त्यन्ये। अक अग कुटिलायां गतौ। कण रण गतौ। चकाण। ट॰॥ रराण। चण शण श्रण
दाने च। शण गतावित्यन्ये। श्रथ क्नथ क्रथ क्लथ हिंसार्थाः। नान्ये मित इति सूत्रेऽका
पयतीति मित्त्वेऽपि वृद्धिर्निपात्यते। क्राथयति। मित्त्वं तु निपातनात्स्वरत्वात् चिण्णमुलोर्दीर्घ इति
दीर्घविकल्पार्थं। अक्रथि। अक्राथि। क्रथंक्रथं। क्राथंक्राथं। वन च हिंसायामिति शेषः।
वनु च नोच्यते। वनुरुदात्तः पूर्व एवायं पाठस्तु नैत्तानादिकस्यानुवादः। रदितः करणसामर्थ्या
त्तेन क्रियासामान्ये वनतीत्यादि। प्रवनयति। अनुपसर्गस्य तु मित्त्वविकल्पो वक्ष्यते।

ण०। ज्वल दीप्तौ। णौ प्रत्ययार्थे पठिष्यमाणत्वादयं मित्त्वार्थमनूद्यते। प्रज्वलयति। ह्वल
ह्मल चलने। प्रह्वलयति। प्रह्मलयति। स्मृ आध्याने। चिंतायां पठिष्यमाणस्य स्मृ आध्या
ने मित्त्वार्थोनुवादः। आध्यानमुत्कण्ठापूर्वकं स्मरणं। दृ भये। दॄ विदारणे इति क्र्यादेरय
मनुवादः। दृणंतं प्रेरयति। दरयति। भयादन्यत्र दारयति। प्यात्वंतरमेवेदमिति मतेतुद
रीत्यादि। केचिद्दृ दरे ऽप्स्पृदृ त्वरे इति सूत्रैव दॄ इति दीर्घस्थाने ह्रस्वं पठंति। तन्नेतिमा
धवः। नॄ नये। क्र्यादिषु पठिष्यमाणस्यानुवादः। नयादन्यत्र नारयति। श्रा पाके। श्रै इति
कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकरणं। ज्ञप्तिकरणं। ज्ञप्तिकरणयो

रत्नुग्विकरणस्य। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषया॥ ज्ञपयति। विज्ञे-
दयतीत्यर्थः। पाकादन्यत्र श्रापयति। स्वेदयतीत्यर्थः। मारणतोषणनिशामनेषु ज्ञा। नि-
शामनं चाक्षुषं ज्ञानमिति माधवः। ज्ञापनमात्रमित्यन्ये। निशाने ष्विति पाठांतरं। निशा-
नं तीक्ष्णीकरणं। एष्वेवार्थेषु जानातिर्मित्। ज्ञपमिच्चेति चुरादौ। ज्ञापनं मारणादिकं वतस्या-
र्थः। कथं विज्ञापना भर्त्तृषु सिद्धिमेतीति। तज्ज्ञापयत्याचार्य इति वान्दएङा। माधवमतेऽचा-
क्षुषज्ञाने मित्त्वाभावात्। ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञानियोग इति चौरादिकस्याध्या-
त्मनामनेकार्थत्वात्। निशाने ष्विति पठतां हरदत्तानां दीमते तु न काप्यनुपपत्तिः। कंपने

वलिः। वल कंपने इति ज्वलादिः। वलयति श्वासं वा। कंपनादन्यत्र तु। शीलं वालयति। अन्य
थाकरोतीत्यर्थः। हरतीत्यर्थ इति स्वामी। स्तत्रं वालयति। क्षिपतीत्यर्थः। छदिर् ऊर्जने। छद
अपवारणे इति घोजादिकस्य स्वार्थे णिजभावे मित्वार्थोयमनुवादः। ऊर्जने कार्यत्वाद् ऊर्जे
दृष्टेः इति। छदंतं प्रयुक्ते छदयति। बलवंतं प्राणवंतं वा करोतीत्यर्थः। अन्यत्र छादयति।
अपवारयंतं प्रयुक्ते इत्यर्थः। स्वार्थे णिचि विकल्पः। छादयति। बली भवति। प्राणी भवति। अपवा
रयति वेत्यर्थः। जिह्वोन्मथने लडिः। लड विलास इति पठितस्य मित्वार्थोनुवादः। उन्मथनं
ज्ञापनं। जिह्वाशब्देन षष्ठीतत्पुरुषः। लडयति जिह्वां। तृतीयातत्पुरुषो वा। लडयति जि

कृपया। अन्ये तु ञिक्ष्वा शब्दे न तथा पाठो लक्ष्यते। समाहारद्वन्द्वोऽयं। लडयति शत्रुं। लडयति दधि। अ-
न्यत्र लाडयति पुत्रं। मदी हर्षग्लेपनयोः। ग्लेपनं दैन्यं। दैवादिकस्य मित्वार्थोऽयमनुवादः। मदयति।
हर्षयति। ग्लेपयति वेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ध्वन शब्दे। भाव्य
यं मित्वार्थमनूद्यते। ध्वनयति घण्टां। अन्यत्र ध्वानयति। अस्पष्टाक्षरमुद्बादयतीत्यर्थः। अत्र
भोजः। दलि वलि स्खलि रणि ध्वनि त्रपि क्षपयश्चेति पपाठ। तत्र ध्वनिरणी उदाहृतौ। दलि विदार-
णे। वल संवरणे। स्खल संचलने। त्रपूष् लज्जायामिति गताः। तेषां णौ। दलयति। वलयति। स्खल-
यति। त्रपयति। हैक्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः। क्षपयति। स्वन अवतंसने।

शाब्दे इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति। घटादयो मितः। मित्संज्ञा इत्यर्थः।
जनीजॄष्क्नसुरंजोऽमंताश्च। मित् इत्यनुवर्तते। जॄषिति षिन्निर्देशाज्जीर्यतेर्ग्रहणं। जरणं ते
स्तु जारयति। केचित्तु जनीजॄष्क्नसु इति पठित्वा क्नसु निरसने इति दैवादिकमुदाहरंति। ज्वल
ह्वल ह्मल नमामनुपसर्गाद्वा। एषां मित्त्वं वा। प्राप्तविभाषेयं। ज्वलयति। ज्वालयति। उपसृष्टे
तु नित्यं मित्त्वं। प्रज्वलयति। कथं तर्हि प्रज्वालयति। उन्नामयतीति। ण्यंतात्तत्करोतीति णौ क
थं संक्रामयतीति। मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतो वेत्यनुवर्त्य व्यवस्थितविभा
षाश्रयणादिति वृत्तिकृतः। एतेन रजो विश्रामयन् राज्ञां। भुर्यान्विश्रामयेति स इत्यादि व्या

स्यातां। ग्लास्नावनुवमां वा। अनुपसर्गादेषां मित्वं वा स्यात्। आघयोर्ग्लास्ने इतरयोः ग्ला
स्ने विभाषा। न कम्यमिचमां। अमंतत्वात् आप्तं मित्वमेषां न स्यात्। कामयते। आमयति। वा
मयति। शमो दर्शने। शाम्यतिर्दर्शने मिन्न स्यात्। निशामयति रूपं। अन्यत्र तु। प्रशमयति। नो
निशामयं वचः कथाः। कथं तर्हि। निशामय तदुत्पत्तिं विस्तराद्गदतो ममेति। शम आलोचने
इति चौरादिकस्य भावात् नामनेकार्थत्वाद्धूवर्णे वृत्तिः शाम्यतिवत्। यमोऽपरिवेषणे। यच्छ
ति भोजनतोऽन्यत्र मिन्न स्यात्। आयामयति। आयच्छति व्यापारयतीत्यर्थः। परिवेषणे तु यम
यति ब्राह्मणान्। भोजयतीत्यर्थः। पर्यवसितं नियमयन्नित्यादि तु नियमवच्छब्दात्तत्करोतीति

लोबोध्यां स्तवदिरव परिभ्यां वा। मिन्नेत्येव। अवस्तवादयति। परिस्तवादयति। अपाव परिभ्य
इति न्यासकारः। स्वामी तु न कमीति न सस्मुतत्र रञ्जिसत्यामनन्तुवर्त्त्य सामः। अदर्शनेद्विति वि छे
दायमस्तवपरिवेष्टने मित्वमाहात्म्यतेपर्यवसितं नियमयन्नित्यादि सम्यग्गे वा। अप स्तवस्य
स्तवदे स्वेदवादिपूर्वस्येति नियमात्स्तवादयतीत्याह। तस्मात्सत्रद्वयेऽप्युदाहरणप्रत्युदाहरण
योर्व्यत्यासः फलितः। इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यं। फणगतौ। नेतिनिवृत्तमसंभ
वात्। निषेधात्पूर्वमसौ न पठितः। फणादिकार्यानुरोधात्। फणं वसनानां। एषां वा एत्वाभ्या
सलोपौ स्तः। कितिलिटि सेटि थलि च। फेणतुः। फेणुः। फेणिथ। पफणतुः। पफणुः। फणयति।

वृत्ता। यत्रादिः समाप्तः। फलेः प्रागेव वृद्धिर्ये के। तन्मते फाणयतीत्येव। राजृ दीप्तौ। स्वरितेत्।
राजति। राजते। रेजतुः। रराजतुः। रेजे। रराजे। ऽनत इत्यनुवृत्तावपि सामर्थ्यादत एत्वं। टुभ्रा
जृ। टुभ्राशृ टुभ्लाशृ दीप्तौ। ऽनुदात्तेतः। भ्राजते। इह पाठः फणादिकार्यार्थः। पूर्वं पाठस्तु व्र
श्चादिषत्वाभावार्थः। तत्र हि राजिसाहचर्यात्फणादेरेव ग्रहणं। भ्रेजे। बभ्राजे। वा भ्राशेति श्यन्वा।
भ्राश्यते। भ्राशते। भ्रेशे। बभ्राशे। भ्लाश्यते। भ्लेशे। बभ्लाशे। द्वावपीमौ तालव्यान्तौ। स्यमु स्वन ध्व
न शब्दे। स्यमादयः क्षरन्त्यन्ताः परस्मैपदिनः। स्येमतुः। सस्यमतुः। ऽस्यमीत्। स्येनतुः। सस्व
नतुः। ऽस्वानीत्। ऽस्वनीत्। विष्वणति। ऽवष्वणति। सशब्दं भुङ्क्ते इत्यर्थः। वेश्च स्वन इति षत्वं।

फलेदयोगताः। दध्वनतुः। ८२०। षमष्टम-अवैकल्ये। ससाम। तस्ताम। ज्वल दीप्तौ। अज्वा-
लीत्। चल कंपने। जलघातने। घातनं तैक्ष्ण्यं। जलति। टल ट्वल वैक्लव्ये। ष्ठल स्थाने। हल
विलेखने। णल गंधे। बंधन इत्येके। ८३०। पल गतौ। पलति। बल प्राणने धान्यावरोधे च।
बेलतुः। बेलुः। पुल महत्वे। पोलति। कुल संस्त्याने बंधुषु च। संस्त्यानं संघातः। बंधुशब्देन त-
द्व्यापारो गृह्यते। कोलति। चुकोल। शल हुल पत्ल गतौ। शशाल। जुहोल। पपात। पेततुः। पति-
ता। पतः पुम्। अङिपरे। अपप्तत्। नेर्गदेति णत्वं। प्रण्यपप्तत्। क्वथे निष्पाके। क्वथति। चक्वाथ।
अक्वथीत्। पथे गतौ। अपथीत्। मथे विलोडने। मेथतुः। अमथीत्। ८४०। टुवमु उद्गिरणे।

वनिपातनाद्हत्वं दत्वमिति सुधाकरः। ववामावव मतुः। वादित्वादेत्वाभ्यासलोपौ न। भागव
तौ लुवे मतुरित्याघण्टुदाहृतं। तद्ध्याद्यो न दृष्टं। भ्रमुवमने। वा भ्राशेति श्यत्वा। भ्रम्यति। भ्र
मति। भ्राम्यतीति तुदिवादौ वक्ष्यते। वाऽद्भमुऊसां। एषामेत्वाभ्यासलोपौ वा। स्तः। क्लितिलि
दि सेदिथ लिलिव। भ्रेमतुः। बभ्रमतुः। अभ्रमीत्। क्षर संचलने। अक्षारीत्। अपक्षवनुदात्तेतो।
षह मर्षणे। परिनिविभ्यः इति षत्वं। पर्यषहत। सेहे। सहिता। तीषसहेति वेट्। ढत्व भावे ढल
ष्टुत्वष्टुत्वढलोपाः। सहिवहोरोदवर्णस्य। अनयोरवर्णस्य उस्याद्ढलोपे। सोढः। सोढ्। परस्य
सहेः सस्य षत्वं न स्यात्। परिसोढा। सिवादीनां वाड्व्यवायेपि। परिनिविभ्यः परेषां सि

वादीनां सस्य षो वा स्यादड्व्यवाये। पर्यषहत। पर्यसहत। दमकीञ्यां। देमे। देमिषोऽ
ता। दंस्यते। दंसीष्ट। ञम दंस्ता। ञप थक संतोः परस्मैपदिनः। षद्लृ विशरणगत्यवसादने
षु। पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छ
धौशीयसीदाः। पादीनां पिबादयः स्युरित्संज्ञकस्याकारादौ प्रत्यये परे। सीदति। ससाद।
सेदतुः। सेदिथ। ससत्थ। सत्ता। सत्स्यति। लृदित्वादङ्। असदत्। सदिरप्रतेः। निषीदति। न्य
षीदत्। सदेः परस्य लिटि। सदेरभ्यासात्परस्य षत्वं न स्यात् लिटि। निषसाद। निषेदतुः।
शद्लृ शातने। विशीर्णतायामयं। शातनं तु विषयतया निर्दिश्यते। शदेः शितः। शिद्भावि

नोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ। शशत्थ। शत्ता। अशदत्। कु
श आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्रोक्ष्यति। अक्रुक्षत्। कुच संपर्चनकौटिल्यप्रतिष्टंभन
विलेखनेषु। कोचति। चुकोच। बुध अवगमने। बोधति। बोधिता। बोधिष्यति। रुह बी
जजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्। कस गतौ। अक
सीत्। अकासीत्। वृत्। ज्वलादिगणः समाप्तः॥ ॥अथ गूहत्यंताः स्वरितेतः॥ ॥हिक्क अव्यक्ते
शब्दे। हिक्कति। हिक्कते। अंचु गतौ याचने च। अंचति। अंचते। अचु इत्येके। अचि इत्यपरे। टु
याचृ याच्ञायां। याचति। याचते। रेटृ परिभाषणे। रेटति। रेटते। चते चदे याचने च। चचात। चेते।

ऽपवतात्।ववाद।ववेद।ऽववदात्।ओप्यृ पर्याप्तौ।उप्योथ।पुप्योप।मिदृ मेदृ मेधाहिंसायां।मिमेद।
मिमिदे।८०।मिमेद।ध्यांता।विमावितिस्वामी।नमामिमेथा।धान्तावितिन्यासः।मेधृ संगमे च।
मेधति।मिमेधे।णिदृ णेदृ कुत्सासंनिकर्षयोः।निनिदतुः।निनिदे।निनेदतुः।निनेद।शृधु मृ
धु उंदने।उंदनं क्लेदनं।शर्द्धति।शर्द्धते।शर्द्धिता।मर्द्धति।मर्द्धते।बुधिर् बोधने।बोधति।बोध
ते।इरित्वाद्वा।ऽबुधत्।ऽबोधीत्।दीपजनेति विएतु न भवति पूर्वोत्तरसाहचर्येण दैवादि
कस्यैव तत्र ग्रहणात्।उबुंदिर् निशामने।निशामनं ज्ञानं।बुबुंद।बुबुंदे।ऽबुदत्।ऽबुंदीत्।वेणृ
गतिज्ञानचिंतानिशामनवादित्रग्रहणेषु।वेणति।वेणते।नांतोप्ययं।८१।खनु ऽवदारणे।

खनति। खनते। गमहनजनखनघसां लोपः क्ङित्यनङि। एकाचुपधाया लोपः स्याद
जादौ क्ङिति नत्वङि। चख्नतुः। ये विभाषा। खायात्। खन्यात्। चीवृ आदानसंवरणयोः। चि
चीव। चिचीवे। चायृ पूजानिशामनयोः। व्यय गतौ। अव्ययीत्। दाशृ दाने। ददाश। ददाशे। भेषृ
भये। गतावित्येके। भेषति। भेषते। भ्रेषृ भ्लेषृ गतौ। अस गतिदीप्त्यादानेषु। असति। अस
ते। आस। आसे। अयं षान्तोपि। स्पश बाधनस्पर्शनयोः। स्पर्शनं ग्रथनं। स्पशति। स्पशते। लष
कान्तौ। वा भ्राशेति श्यन्वा। लष्यति। लषति। लेषे। चष भक्षणे। छष हिंसायां। चछष
तुः। चछषे। झष आदानसंवरणयोः। भ्रक्ष भ्लक्ष अदने। दासृ दाने। माहृ माने। गुहू संवरणे।

त

ऊदुपधायागोहः।गुहेरुपधायाऊत्स्याद्गुणहेतावजादौप्रत्यये।गूहति।गूहते।ऊदि
त्वादिड्वा।गूहिता।गोढा।गूहिष्यति।घोक्ष्यति।गूहेत्।गुह्यात्।अगूहीत्।ढत्वभावेक्सः।
अघुक्षत्।लुग्वादुहदिहलिहगुहामात्मनेपदेदंत्ये।एषांक्सस्यलुग्वास्याद्दंत्येतङि।ढ
त्वधत्वष्टुत्वढलोपदीर्घाः।अगूढ।अघुक्षत।क्सस्याचीत्यंतलोपः।अघुक्षाताम्।अघु
क्षंत।अगुह्वहि।अघुक्षावहि।अघुक्षामहि।अथाजंताउभयपदिनः।श्रिञ्सेवायां।श्र
यति।श्रयते।शिश्राय।शिश्रियतुः।श्रयिता।णिश्रीतिचङ्।अशिश्रियत्।डु०।भृञ्भ
रणे।भरति।बभार।बभ्रतुः।बभर्थ।बभृव।बभृम।भर्ता।ऋद्धनोःस्ये।ऋतोहंतेश्चस्यस्य

इट् स्यात्। भविष्यति। रिङ् शयग्लिङ्क्षु। अथ क्रियादावार्द्धधातुके लिङि च स्तो रिङादेशः
स्यात्॥ रीङ्॥ प्रकृते रिङ्ङि धिसामर्थ्याद्दीर्घो न। भ्रियात्। अ श्वास वर्णस्य रोऽजादौ लिङि तङ्
परः स्तिज्ञेत्येतौ कितौ स्तः। अभृषीष्ट। अभृषीयास्तां। अभार्षीत्। अभार्ष्टां। अभार्षुः। हृस्वाङ्
गात्। सिचो लोपः स्यात् झलि। अभृत। अभृषातां। अभरिष्यत्। हृञ् हरणे। हरणं प्रापणं
स्वीकारः स्तेयं नाशनं च। जहर्थ। जह्रिव। जह्रिम। हर्ता। हरिष्यति। धृञ् धारणे। धरति। अधा
र्षीत्। अधृत। णीञ् प्रापणे। निनयिथ। निनेथ। निन्यिव। अथाजन्ताः परस्मैपदिनः। धेट् पा औ
ने। धयति। आदेच उपदेशेऽशिति। उपदेशे एजन्तस्य धातोरात्वं स्यान्न तु शिति। आत णलः।

औ

आदंता धातोर्णल औकारादेशः स्यात्। दधौ। आतो लोप इटि च। अजाद्योरार्धधातुकयोः
क्ङिदिटोः परयोरातो लोपः स्यात्। द्वित्वात्परत्वादातोलोपे प्राप्ते द्विर्वचनेऽचीति निषेधः। द्वित्वे कृ
ते आलोपः। दधतुः। दधुः। दधिथ। दधाथ। दधिव। धाता। धास्यति। दाधा घ्वदाप्। दारूपा धारूपाश्च धा
तवो घुसंज्ञाः स्युर्दाप्दैपौ विना। एर्लिङि। घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके किति लिङि
किति। धेयात्। धेयास्तां। धेयासुः। विभाषा धेट्श्व्योः। आभ्यां च्ले श्चङ् स्यात्कर्तृवाचिनि लुङि प
रे। चङीति द्वित्वं। अदधत्। अदधतां। विभाषा घ्राधेट्शाच्छासः। एभ्यः सिचो लुग्वा स्यात्पर
स्मैपदे परे। अधात्। अधातां। अधुः। यमरमनमातां सक् च। एषां सक् स्यात् एभ्यः सिच इट् स्यात्

रस्मैपदेषु। अस्थासीत्। अस्थासिष्टाम्। अस्थासिषुः। ग्लै म्लै हर्षक्षये। हर्षक्षयो धातुक्षयः।
ग्लायति। जग्लौ। जग्लिथ। जग्लाथ। वान्यस्य संयोगादेः। घुमा[illegible]देरन्यस्य संयोगादेर्ह्लितो रात
एत्वं वा स्यादार्द्धधातुके किति लिङि। ग्लायात्। ग्लेयात्। अग्लासीत्। म्लायति। ध्यै न्यक्करणे।
न्यक्करणं तिरस्कारः। द्रै स्वप्ने। ध्रै तृप्तौ। ९।१। ध्यै चिंतायां। रै शब्दे। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्या
यति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यं। षोपदेशत्वफलं तु तिष्ट्यासति। अतिष्ट्यपदित्य
त्रपत्वं। खै खदने। क्षै जै षै क्षये। क्षायति। जजौ। सषौ। घुमास्थेत्यत्र विभाषाघ्राधेट्ठित्यत्र च
स्यतेरेव ग्रहणं न त्वस्य। तेन एत्वं सिज्लुकौ न। सायात्। असासीत्। कै गै शब्दे। गेयात्। अगा

सीत्। २४६०। शै श्रै पाके। पेड़ु वै शोषणे। पायात्। अपासीत्। लुमास्थेतीत्वं तदपवाद एर्लिङी त्येत्वं गातिस्थेति सिज्लुक् न। पारूपस्य जात्सालिकत्वात्। ष्टै वेष्टने। स्तायति। ष्णै वेष्टने शोभायां चेत्येके। स्नायति। दैप् शोधने। दायति। घुत्वादेत्वं सिज्लुकौ न। दायात्। अदासीत्। पा पाने। पाघ्राध्मेति पिबादेशः। तस्यादन्तत्वान्नोपधागुणः। पिबति। पेयात्। अपात्। घ्रा गंधोपादाने। जिघ्रति। घ्रायात्। घ्रेयात्। अघ्रासीत्। अघ्रात्। ध्मा शब्दाग्निसंयोगयोः। धमति। ष्ठा गतिनिवृत्तौ। तिष्ठति। स्थादिष्वभ्यासेनेति षत्वं। अधितष्ठौ। उपसर्गादिति षत्वं। अधिष्ठाता। स्थेयात्। २४७०। म्ना अभ्यासे। मनति। दाण् दाने। प्रयच्छति। देयात्। अदात्। ह्वृ कौटिल्ये। ह्वरति।

ऋतश्च संयोगादेर्गुणः। ऋदंतस्य संयोगादेरंगस्य गुणः स्याल्लिङि। किदर्थमपीदं परत्वात्
ल्यपि भवति। रपरत्वं उपधावृद्धिः। जध्वार। जध्वरतुः। जध्वरुः। जध्वर्थ। ध्व[illegible]। ऋद्धनोः स्ये।
ध्वरिष्यति। गुणोर्तिसंयोगाद्योः। अर्तेः संयोगादेर्ऋदंतस्य च गुणः स्याद्यकि यार्ड्यङ्लुके
लिङि वा। ध्वर्यात्। अध्वार्षीत्। अध्वार्ष्टां। स्वृ शब्दोपतापयोः। स्वरति सूतीतिवेट्। सस्वरिथ। स
स्वर्थ। वमयोस्तु। श्रुकः किति। श्रि अण् एकाच उगंताच्च परयोर्गित्किंतोरिण् न स्यात्। परमपि स्व
रत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकांडारंभसामर्थ्यादनेन निषेधे प्राप्ते। क्रादिनिय
मान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वाद् ऋद्धनोरिति नित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वा

त्वीनी

रीत्। अस्वारिष्टां। अस्वाषीत्। अस्वार्ष्टां। स्मृ चिंतायां। ह्वृ संवरणे। स्रु गतौ। क्रादित्वान्नेट्। सस्म
र्थ। सस्मरिव। रिङ्। स्मियात्। अस्मासीत्। अस्मार्ष्टां। सर्त्तिशास्त्यर्त्तिभ्यश्च। एभ्यश्च्लेरङ् स्यात् कर्त्तरि लु
ङि। ऋदृशोऽङि गुणः। पाश्या। सिना। साहचर्यात् स[illegible] जौहोत्यादिकस्यैव ग्रहणे। तेन भ्वादेर्नाङ्। ऋ प्र
गतौ। ऋ पाघ्राध्मेति शिति धौ रादेशः। धावति। ऋ गतिप्रापणयोः। ऋच्छति। ऋच्छत्यृतां। तौदादिकस
स्ये सर्वधातोः ऋतां च गुणः स्यात् लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरतुः। आरुः। इडत्त्यर्त्तिव्य
यतीनां। अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आरिथ। अर्त्ता। अरिष्यति। अर्यात्। आर्षी
त्। आर्ष्टां। गृ सेचने। गरति। जगार। जगर्थ। जग्रिव। रिङ्। ग्रियात्। अगारीत्। ९३। ध्वृ हू

ईनौ। स्तु गतौ। स्तु स्तोषि। सुस्तुवा। स्तूयात्। ति। स्तौतीति बहुः। नष्टपथ गुणं दंतरं गत्वात् बहुः। स्त
सुस्तुवत्। स्तु प्रसवैश्वर्य्ययोः। प्रसवो ऽभ्यनुज्ञानं। सुषोथ। सुषविथ। सुषुविव। सोता। सुसु ष्टूस्
भ्यः परस्मैपदेषु। एभ्यः सिच इट् स्यात् परस्मैपदेषु। असावीत्। पूर्वोत्तराभ्यां सिद्धं। स्नाहवर्या
ष्टुनोते देवग्रहणमिति पक्षे। असोषीत्। स्तु स्तवणे। स्तुवः ष्टवा। स्तु वः ष्टद् त्यादेशः स्यात्। स्तु प्र
त्ययश्चाशयोपवादः। स्तोर्ङित्वाद्धातोर्गुणे न। ष्टुणेति। ष्टुणुतः। ऊ स्तुवोः सार्वधातुके। जुहोतेः
स्तु प्रत्ययांतस्यानेकाचो ऽगस्य वा संयोगपूर्वो वर्णस्य यण् स्यादजादौ सार्वधातुके। उवङोप
वादः। ष्टणुंति। ष्टणेषि। ष्टणुथः। ष्टणुथ। ष्टणोमि। ष्टणुमः। स्तुष्टोप। स्तु स्तुवा। ष्टणु। ष्टणवानि।

रलेत्यात्। स्नूयात्। ऽअक्षोषीत्। क्षुस्तैर्यै। क्षुवति। ऽअयं कुटादौ गत्यर्थो पि। कुङ् गतौ। कुटे। धाकु
दविधाकुदविवाकुङ्घो। धाकुङ्गुवा। णि श्रीतिवङ्। ऽअङ्कुवत्। जिज्ञि ऽअभिभवे। ऽअभिभवो न्यूनीक
रणं न्यूनीभवनं वा। ऽआद्ये सकर्मकः। शत्रून् जयति। द्वितीये त्वकर्मकः। ऽअध्ययनात् पराजय
ते। ऽअध्येतुं ग्लायतीत्यर्थः। विपराभ्यां जेरिति तङ्। पराजेरसोढ इत्यपादानत्वं। ऽअपजीङ् ता
ङीतः। ष्मिङ् ईषद्धसने। स्मयते। सिष्मियो। सिष्मियिढ्वे। सिष्मियिध्वे। ४। गुङ्। ऽअव्यक्ते शब्दे।
गवते। जुगुवे। गाङ् गतौ। गाते। गाते। गाते। इट इत्वे कृते वृद्धिः। गे। जङ इटि। ऽअगे। जेते। जेया
तां। गेरन्। गासीष्ट। गाङ् कुटादिस्त्रैङ्गाः देशस्येव गाङो ग्रहणं न त्वस्यात्ते। नाङि। त्वाहुमास्त्वे

तीत्वं न। अपगाम्ना। आदादिको यमिति हद दत्तादयः। फले तु न भेदः। कुङ् घुङ् उङ् ङुङ् शब्दे। अन्ये
तु। उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः। कवते। चुकुवे। घवते। अवते। ऊवे। वा णौ दांगवन्नीय इत्युवङ्।
ततः सवर्णदीर्घः। उता। उव्यते। उवीष्ट। औष्ट। ङवते। जुङुवे। ओता। च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ। रुङ्
इत्येके। रीपक्ष रुङ् गति रेषणयोः। रेषणं हिंसा। रुरुवे। रविता सो। धृङ् अवध्वंसने। धरते। दध्रे।
मेङ् प्रतिदाने। प्रतिदानं विनिमयः। प्रत्यर्पणं वा। प्रतिमयते। नेगदेति णत्वं। तत्र घुप्रकृतिमाङिति
पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात्। देङ् रक्षणे। दयते। दयतेर्दिगि लिटि। दिग्यादेशेन द्वित्व
बाधनमिष्यत इति वृत्तिः। दिग्ये। दिग्याते। दिग्यिरे। स्थाघ्वोरिच्च। अनयोरिदादेशः स्यात् सिच्

किस्यात् । ऽदिता । ऽदिष्यतः । ऽदिषि । श्यैङ् गतौ । श्यायते । शश्ये । प्यैङ् वृद्धौ । प्यायते । पप्ये । प्याता ।
त्रैङ् पालने । तत्रे । पूङ् पवने । पवते । पुपुवे । पविता । मूङ् बन्धने । मवते । डीङ् विहायसा गतौ । डयते ।
डिड्ये । डयिता । ९६५ । तॄ प्लवनतरणयोः । ॠत इद्धातोः । ॠदन्तस्य धातोरङ्गस्येत् स्यात् । इत्वोत्वाभ्यां गु-
णवृद्धी विप्रतिषेधेन । तरति । ततार । तेरतुः । तेरुः । वृतो वा । वृङ्वृ-
ञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि । तरिता । तरीता । अलिटीति किं । तेरिथ । हलि चेति दी-
र्घः । तीर्यात् । सिचि च परस्मैपदेषु । अत्र वृत इटो दीर्घो न । अतारिष्टां । अथ षट् अनुदात्तेतः । गुप
गोपने । तिज निशाने । मान पूजायां । बध बन्धने । गुप्तिज्किद्भ्यः सन् । मान्बधदान्शान्भ्यो दीर्घ

श्चाभ्यासस्य। सूत्रद्वयोक्तेभ्यः सन्स्यात्। मानादीनामभ्यासस्येकारस्य दीर्घश्च। गुपेर्निंद
यां। तिजेः क्षमायां। कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने नाशने संशये च। मानेर्जिज्ञासा
यां। वधेश्चित्तविकारे दानेरार्जवे। शानेर्निशाने। सनाद्यंता इति धातुत्वं। सन्यङोः। सन्नंतस्य
यङंतस्य च प्रथमैकाचो द्वे स्तः। अजादेस्तु द्वितीयस्य। अभ्यासकार्यं। गुपिप्रभृतयः कित
भिन्नाभिंदाद्यर्थका एवानुदात्तेतो दानशानौ च स्वरितेतौ। एते नित्यसन्नंताः। अर्थांतरे त्वननु
बंधकाः सुरादयः। अनुबंधस्य केवलेऽचरितार्थत्वात् सन्नंता तङ्। धातोरित्यविहितत्वात् सनो
त्रेनार्द्धधातुकत्वं। तेनेड्गुणौ न। जुगुप्सते। जुगुप्सां चक्रे। तितिक्षते। मीमांसते। भपूर्वाभावः। वर्त्ते।

वीभत्सते। रभ राभस्ये। आरभते। आरेभे। रब्धा। रप्स्यते। डुलभष् प्राप्तौ। लभते। ष्वंज परि
ष्वंगे। दंशसंजस्वंजां शपि। रंजेश्च। एषां शपि न्लोपः। स्वजते। परिष्वजते। श्रंथि ग्रंथि दंभि स्वंजि
जीनां लिटः कित्वं वेति व्याकरणांतरां देभतुः। सस्वज इति भाष्योदाहरणादेकदेशानुमन्या
इदं व्याख्यायते। सदेः परस्य लिटीति सस्वजे स्वंजे रूपसंख्यानं। अतोभ्यासात्परस्य षत्वं न।
परिषस्वजे। परिषस्वंजे। सस्वजिषे। सस्वंजिषे। स्वंक्ता। स्वंक्ष्यते। स्वजेत। स्वंक्षीष्ट।
प्रत्यषंक्त। प्राक्सितादिति षत्वं। परिनिविभ्यस्तुसिवादीनां वेति विकल्पः। एतदर्थमेवो
पसर्गात्सुनोतीत्येव सिद्धे स्तुस्वंज्योः परिनिवीत्यत्र पुनरुपादानं। पर्यषंक्त। पर्यस्वंक्त।

हद पुरीषोत्सर्गे। हदते। जहदे। हत्ता। हत्स्यते। हदेत। हत्सीष्ट। अहत्त। अथ परस्मैपदिनः॥ञि ष्वि
दा अव्यक्ते शब्दे। ९७०। स्कंदिर् गतिशोषणयोः। चस्कंदिथ। चस्कंथ। स्कंत्स्यति। नोपः। स्कद्यात्।
इरित्वादङ् वा। अस्कदत्। अस्कांत्सीत्। अस्कांतां। अस्कांत्सुः। वेः स्कंदेरनिष्ठायां। षत्वं वा स्यात्। कृ
त्येवेदं। अनिष्ठायामिति पर्युदासात्। विष्कंता। विस्कंता। निष्ठायां तु विस्कन्नः। परेश्च। अस्मात्प
रस्य स्कंदेः सस्य षो वा। योगविभागादनिष्ठायामिति न संबध्यते। परिष्कंदति। परिस्कंदति। परि
ष्कण्णः। परिस्कन्नः। षत्वपक्षे णत्वं। न च पदद्वयाश्रयतया बहिरंगत्वात् षत्वस्यासिद्धत्वं। धातूप
सर्गयोः कार्यमंतरंगमित्यभ्युपगमात्। पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यं।

पूर्वं स्नाधनेति मतांतरे तु न णत्वं। यभ मैथुने। येभिथ। ययब्ध। यप्स्यति। अयाप्सीत्। णम प्र
ह्वत्वे शब्दे च। नेमिथ। ननंथ। अनंसीत्। अनंसिष्टां। गम्लृ सृप्लृ गतौ। इषुगमियमां छः। एषां
छः स्याच्छिति परे। जगाम। जग्मतुः। जगमिथ। जगंथ। गंता। गमेरिट् परस्मैपदेषु। गमेः पर
स्य सकारादेरार्द्धधातुकस्येट् स्यात्। गमिष्यति। लृदित्वादङ्। अनङीति पर्युदासान्नोप
धालोपः। अगमत्। सर्पति। ससर्प। अनुदात्तस्य चर्दुपधस्यान्यतरस्यां। उपदेशेऽनुदात्तो य
ऋदुपधस्तस्य अम्वा स्याज्झलादावकिति परे। स्रप्ता। सर्प्ता। स्रप्स्यति। सर्प्स्यति। असृपत्।
यम उपरमे। यच्छति। येमिथ। ययंथ। यंता। अयंसीत्। अयंसिष्टां। तप संतापे। तप्ता। अता

ष्ठीवत्। निसस्तपतावनासेवने। षः स्यात्। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये। निष्ट
पति। त्यज हानौ। तत्यजिथ। तत्यक्थ। त्यक्ता। अत्याक्षीत्। षंज संगे। दंशसंजेति नलोपः। सजति।
सङ्क्ता। दृशिर् प्रेक्षणे। पश्यति। विभाषा सृजिदृशोः। आभ्यां थलि इड् वा स्यात्। सृजिदृशोर्झ
ल्यमकिति। अनयोरमागमः स्यात् झलादावकिति। ददर्श। ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्।
इरित्वादङ् वा। ऋदृशोऽङि गुणः। सवर्णानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे। न दृ
शः। दृशः क्सो न। अद्राक्षीत्। दंश दशने। दशनं दंष्ट्राव्यापारः। एषोऽदरादित्वादनुना
सिकलोपः। अत एव निपातनादिति केचित्। तस्याप्यत्रैव तात्पर्यम्। अर्थनिर्देशस्याधुनिकत्वात्।

दंशसंजेति न्लोपः। दशति। ददंशिथ। ददंष्ठ। दंष्टा। दङ्क्ष्यति। दशतु। दश्यात्। अदाङ्क्षीत्। कृष
विलेखने। विलेखनमाकर्षणं। क्रष्टा। कर्ष्टा। क्रक्ष्यति। कर्क्ष्यति। स्पृशमृशकृषतृपदृपां च्लेः सि
ज्वा वाच्यः। अक्राक्षीत्। अक्राष्टां। अकार्क्षीत्। अकार्ष्टां। अकार्क्षुः। पक्षे क्सः। अकृक्षत्। अकृ
क्षतां। अकृक्षन्। दह भस्मीकरणे। देहिथ। ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत्। अदाग्धां। अ
धाक्षुः। मिह सेचने। मिमेहिथ। मेढा। मेक्ष्यति। अमेक्ष्यत्। कित निवासे रोगापनयने च। विचि
क्सति। संशये प्रायेण विपूर्वः। विचिकित्सा तु संशय इत्यमरः। अस्मानुदात्तेत्वमाश्रित्य विचिकित्स
ते इत्यादि कश्चिदुदाजहार। निवासे तु केतयति। दान खण्डने। शान तेजने। इतो वहन्त्यंताः स्वरिते

तः। दीदांसति। दीदांसते। शीशांसति। शीशांसते। ऽर्थविशेषे सन्। ऽअन्यत्र दानयति। शानय-
ति। डुपचष् पाके। पचति। पचते। पेचिथ। पपक्थ। पेचे। पक्ता। पक्षीष्ट। षच समवाये। सच-
ति। सचते। सचिता। सचिष्यति। भज सेवायां। बभाज। भेजतुः। भेजिथ। बभक्थ। भक्ता। भक्ष्यति।
भक्ष्यते। ऽअभाक्षीत्। ऽअभक्त। ऽअभक्षाताम्। ऽअभक्षत। ९९। रंज रागे। लोपः। रजति। रजते।
ऽअरांक्षीत्। ऽअरङ्क्त। शप आक्रोशे। आक्रोशो विरुद्धानुध्यानं। शशाप। शेपे। ऽअशाप्सी-
त्। ऽअशप्त। त्विष दीप्तौ। त्वेषति। तित्वेष। तित्विषे। त्वेक्ष्यति। त्विक्षीष्ट। ऽअत्विक्षत्। ऽअत्विक्षताम्। ऽअ-
त्विक्षत। ऽअत्विक्षाताम्। यज देवपूजासंगतिकरणदानेषु। यजति। यजते। लिपभ्याससस्योभये

णां। वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्यान्ङिति। इयाज। वचिस्वपियजादीनां
किति। वचिस्वपियजादीनां च संप्रसारणं स्यात् किति। पुनः प्रसंगविज्ञानाद्द्वित्वं। ईजतुः। ई
जुः। इयजिथ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। डुवप बीजसं
ताने। बीजसंतानः क्षेत्रे विकिरणं गर्भाधानं वा। अयं छेदनेऽपि। केशान्वपति। उवाप। ऊपे। व
प्ता। उप्यात्। वप्सीष्ट। अवाप्सीत्। अवप्त। वह प्रापणे। उवाह। उवहिथ। सहिवहोरोदव
र्णस्य। उवोढ। ऊहे। वोढा। वक्ष्यति। अवाक्षीत्। अवोढां। अवाक्षुः। अवोढ। अवक्षातां। अवक्ष
त। अवोढाः। अवोढ्वं। वस निवासे। परस्मैपदी। वसति। उवास। शासिवसिघसीनां च। इणः कु

न्यां परस्यैषां सस्य षः स्यात् । ऊषतुः । ऊषुः । उवसिथ । उवस्थ । वस्ता । वत्स्यति । उष्यात् । अवा
सीत् । अवात्तां । वेञ् तन्तुसंताने । वयति । वयते । वेञो वयिः । वा स्याल्लिटि । इकार उच्चारणार्थः ।
उवाय । ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । एषां किति ङिति च
संप्रसारणं स्यात् । यकारस्य प्राप्ते । लिटि वयो यः । वयो यस्य संप्रसारणं न स्याल्लिटि । ऊयतुः ।
ऊयुः । वश्चास्यान्यतरस्यां किति । वयो यस्य वो वा स्यात् किति लिटि । ऊवतुः । ऊवुः । उवयिथ । वये
त्ता । सावभावात्यलि नित्यमिट् । स्थानिवद्भावेनानित्त्वात् ङ् । ऊये । ऊवे । वयादेशाभावे । वेञः । व
ञो न संप्रसारणं स्याल्लिटि । ववौ । ववतुः । ववुः । वविथ । ववाथ । ववे । वाता । ऊयात् । वासीष्ट । अवा

सि० कौ० उ० ति०

६१

सीत्। व्येञ् संवरणे। व्ययति। न व्यो लिटि। व्येञ आत्वं न स्याल्लिटि। वद्रिः। परमपि हल्यादिशे
षं बाधित्वा यस्य संप्रसारणं। उभयेषां ग्रहणसामर्थ्यात्। अन्यथा वव्यादीनां ग्रहादीनां
वानुवर्त्स्यैव सिद्धेः किं तेन। विव्याय। विव्यतुः। विव्युः। इडत्यर्तीति नित्यमिट्। विव्ययिथ। विव्या
य। विव्ययिव। विव्ये। व्याता। वीयात्। व्यासीष्ट। अव्यासीत्। अव्यास्त। ह्वेञ् स्पर्द्धायां शब्दे च।
अभ्यस्तस्य च। अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं स्यात्। ततो द्वित्वं। जुहाव। जुहुवतुः।
जुहुवुः। जुहोथ। जुहविथ। जुहुवे। ह्वाता। हूयात्। ह्वासीष्ट। लिपिसिचिह्वश्च। एभ्यश्च्लेरङ्
स्यात्। आत्मनेपदेष्वन्यतरस्यां। आतो लोपः। अह्वत्। अह्वत। अह्वास्त। १००। अथ दोप

—राम

६१

रक्षै पदिनौ। वदव्यक्तायां वाचि। ऽभ्यवदीत्। उवाद। ऊदतुः। उवदिथ। वदिता। उद्यात्। वदव्रजे
ति वृद्धिः। ऽवादीत्। टुओश्वि गतिवृद्ध्योः। श्वयति। विभाषा श्वेः। श्वयतेः संप्रसारणं वा स्याल्लि
टि यङि च। शुशाव। शुशुवतुः। श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः। तेन लिट्यभ्यासस्येति
संप्रसारणं न। शिश्वाय। शिश्वियतुः। शिश्वियुः। श्वयिता। श्वयेत्। शूयात्। जृस्तंभ्विभ्यङ्वा। श्वय
तेरः। श्वयतेरिकारस्य ऽकारः स्यादङि। पररूपं। ऽश्वत्। ऽश्वतां। ऽश्वन्। विभाषा धेट्
श्व्योरिति चङ्। द्वयङ्। ऽशिश्वियत्। ऽशिश्वियतां। ह्यंतक्षणेति न वृद्धिः। ऽश्वयीत्। ऽश्वयि
ष्टां। वृत्तां। यजादयो वृत्ताः। भ्वादिस्त्वाकृतिगणः। तेन चुलुंपतीत्यादि संग्रहः। इति भ्वादयः।

ऋतेरीयङ्। ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे। जुगुप्सायामयं धातुरिति बहवः। कृपायामि
त्येके। सनाद्यन्ता इति धातुत्वं। ऋतीयते। ऋतीयांचक्रे। आर्द्धधातुकविवक्षायां तु। आया
दय वा इति इयङ्भावपक्षे ङित्त्वाभावात्परस्मैपदं। आनर्त। आर्तिष्यति। इत्यादि। अद भक्ष आर्तीत् ३
णे। द्वौ परस्मैपदिनौ। अदिप्रभृतिभ्यः शपः। लुक् स्यात्। अत्ति। अत्तः। अदन्ति। लिट्यन्यतर
स्यां। अदो घस्लृ वा स्यात् लिटि। जघास। गमहनेत्युपधालोपः। तस्य चर्विधिं प्रति स्थानिवद्भा
नपद्यंतेतिनिषेधात् ३ वनिषेधात्। घस्य चर्त्वं। शासिवसीति षत्वं। जक्षतुः। जक्षुः। घसस्तासावभावाच्छजि नित्यमि
ट्। जघसिथ। आद। आदतुः। इडत्यर्तीति नित्यमिट्। आदिथ। अत्ता। अत्स्यति। हुझल्भ्यो हेर्धिः। राम

हो रुत्वं ते म्य स्वहे र्धिः स्यात्। ऽद्भिः। ऽप्तात्। ऽपदानि। ऽपदः सर्वेषां। ऽपवेदेः दस्याप्त सार्व
धातुकस्याऽगमः स्यात्सर्वमतेन। ऽादत्। ऽर्पितां। ऽादन्। ऽादः। ऽातं। ऽाता। ऽादं। ऽा
दा। ऽापघ्ना। ऽपघात्। ऽपघातो। ऽपघुः। ऽपघास्तां। ऽपघास्तुः। जुहूः सनोर्घस्त। ऽपदोघस्त स्या
त्स्तुडिः स्निवा। स्वदित्वादडूः। ऽपघसत्। हनहिं स्वागत्योः। घ्राणि हंति। ऽपनुदात्तोपदेशवनतित
नोत्यादीनामनुनासिकलोपो झलि क्ङिति। ऽपनुनासिके तिलुम्पषष्ठीकं वनतीतरेषां विशे
षणं। ऽपनुनासिकांतानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमि रमि नमि गमि हनि
मन्यतयोऽनुदात्तोपदेशाः। तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः। हतः। घ्नंति। वमो

वी। उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्यात् हमयोः परतः। प्रहण्मि। प्रहन्मि। प्रहण्वः।
प्रहन्वः। हेर्हन्तेरिति कुत्वं। जघान। जघ्नतुः। जघ्नुः। अभ्यासाच्च। अभ्यासात्परस्य हन्तेर्हस्य कुत्वं
स्यात्। जघनिथ। जघन्थ। हन्ता। ऋद्धनोरितीट्। हनिष्यति। हन्तु। हतात्। घ्नन्तु। हन्तेर्जः। हौ परे। आ
भीयतया जऽसिद्धत्वाद्धेर्न लुक्। जहि। हनानि। हनाव। हनाम। अहन्। अहतां। अघ्नन्। अहनं।
आर्द्धधातुक इत्यधिकृत्य। हनो वध लिङि। लुङि च। वधादेशोऽदन्तः। आर्द्धधातुके इति विष
यसप्तमी। तेनार्द्धधातुकोपदेशेऽकारान्तत्वादतो लोपः। वध्यात्। वध्यास्तां। आर्द्धधातुके किं।
विध्यादौ हन्यात्। हन्तेरिति णत्वं। प्रहण्यात्। अवधीत्। अथ चत्वारः स्वरितेतः। द्विष अप्रीतौ।

द्वेष्टि। द्विष्टे। द्वेष्टा। द्वेक्ष्यति। द्वेष्टु। द्विष्यात्। द्विड्ढि। द्वेषाणि। द्वेषै। द्वेषावहै। अद्वेट्। द्विषश्च। लङो
जुस्वा स्यात्। अद्विषुः। अद्विषन्। अद्वेषं। द्विषीत। द्विक्षीष्ट। अद्विक्षत्। दुह प्रपूरणे। दोग्धि।
दुग्धः। धोक्षि। दुग्धे। धुक्षे। धुग्ध्वे। दोग्धा। दुग्धि। दोहानि। धुक्ष्व। धुग्ध्वं। दोहै। अधोक्। अदोहं।
अदुग्ध। अधुग्ध्वं। अधुक्षत्। अधुक्षत। लुग्वा दुहेति लुक् पक्षे तथा सध्वं वहिषु। जदुह् दिहि।
दिह उपचये। प्राणिदेग्धि। दिग्धे। लिह आस्वादने। लेढि। लीढः। लिहंति। लेक्षि। लीढे। लिक्षे। ली
ढ्वे। लेढु। लीढि। लेहानि। अलेट्। अलिक्षत्। अलीढ। अलिक्षावहि। अलिह्वहि। चक्षिङ् व्यक्ता
यां वाचि। अयं दर्शनेपि। ङकारो नुदत्तः युनर्थः। विचक्षणः प्रयत्न। नुम् तु न। अनोदितःइति व्या

ख्यानात्। ङकारस्तु अनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः। तेन स्फायन्निर्मोकसं
धीत्यादि सिध्यति। चष्टे। चक्षाते। आर्द्धधातुके। चक्षिङः ख्याञ्। वा लिटि। अत्र भाष्ये ख्शादिर
यमादेशः। असिद्धकाण्डे शस्य यो वेति स्थितं। ञित्वात्पदद्वयं। चख्यौ। चख्ये। चक्शौ। चक्शे। चयौ।
द्वितीयाद्यतितु न। वर्ज्जस्यासिद्धत्वात्। चचक्षे। ख्याता। क्शाता। ख्यास्यति। ख्यास्यते। क्शास्यति।
क्शास्यते। अचष्ट। चक्षीत। ख्यायात्। ख्येयात्। क्शायात्। क्शेयात्। अस्यतिवक्तिख्याति
भ्योऽङ्। एभ्यः सेरङ्। अख्यत्। अख्यत। अक्शासीत्। अक्शास्त। वर्जने क्शाञ् नेष्टः। समवक्शि
ष्टेत्यादि। अथ पञ्चम्यंता अनुदात्तेतः। ईर गतौ कंपने च। ईर्त्ते। ईरांचक्रे। ईर्त्तां। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट। ई

ईड्स्तुतौ। ईट्टे। ईशः से। ईडजनोर्ध्वे च। ईशीडजनां सेध्वे शब्दयोः सार्वधातुकयोरिट् स्यात्। यो
गविभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। एकदेशविकृतस्यानन्यत्वादीडिष्व। ईडिध्वं। विकृति
ग्रहणेन प्रकृतेरग्रहणात्। ऐड्ढ्वं। ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। आस उपवेशने। आस्ते।
दयायासश्च। आसां चक्रे। आस्स्व। आध्वं। आसिष्ट। आङः शासु इच्छायां। आशास्ते। आशा
साते। आङ् पूर्वत्वं प्रायिकं। तेन नमोवाकं प्रशास्महे इति सिद्धं। वस आच्छादने। वस्ते। वस्से। व
ध्वे। ववसे। वसिता। कसि गतिशासनयोः। कंस्ते। कंसाते। कंसते। अयमनिदिदित्येके। कस्ते।
ताल्व्यान्तोऽप्यनिदित्। कष्टे। कशाते। कड्ढ्वे। णिसि चुम्बने। निंस्ते। दन्त्यान्तोयं। आभर

एकारस्तु ताभ्यां तद्दति वञ्चामा। णिजि शुद्धौ। निङ्क्ते। निङ्क्ते। निञ्जिता। शिजि अव्यक्ते श
ब्दे। शिङ्क्ते। पिजि वर्णे। संपर्चने इत्येके। उभयत्रेत्यन्ये। अवयवे इत्यपरे। अव्यक्ते शब्दे इती
तरे। पिङ्क्ते। पृजी इत्येके। पृङ्क्ते। वृजी वर्जने। दन्त्योष्ठ्यादिः। ईदित्त्वात् वृक्ते। वृजाते। वृक्षे। इदिदि
त्यन्ये। वृङ्क्ते। पृची संपर्चने। पृक्ते। षूङ् प्राणिगर्भविमोचने। सूते। सुषुवे। सोता। सविता।
भूसुवोरिति गुणनिषेधः। सुवै। सविषीष्ट। सोषीष्ट। असविष्ट। असोष्ट। शीङ् स्वप्ने। शीङः
सार्वधातुके गुणः। क्ङिति चेत्यस्यापवादः। शेते। शयाते। शीङो रुट्। शीङः परस्य झादेशस्या
तो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये। शेवहे। शिश्ये। शयिता। अशयिष्ट। अथ कोत्यं

ताः परस्मैपदिनः। ऊर्णुस्तु उभयपदी। युमिश्रणे ऽमिश्रणे च। उतो वृद्धिर्लुकि हलि। लुग्वि-
षये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य। यौति। युतः। युवंति। युयावाय-
विता। युयात्। इह उतो वृद्धिर्न। भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात्। विशेषविहिते न ङित्वे
न पित्वस्य बाधात्। स्तूयात्। अयावीत्। रु शब्दे। तुरुस्तुशम्यमः सार्वधातुके। एभ्यः परस्य सार्व-
धातुकस्य हलादेस्तिङः ईड् वा स्यात्। नाभ्यस्तस्येत्यतोऽनुवृत्तिसंभवे पुनः सार्वधातुकग्रहणम-
पिदर्थं। रवीति। रौति। रुवीतः। रुतः। हलादेः किं। रुवंति। तिङः किं। शाम्यति। सार्वधातुके किं। आशि-
षि। रूयात्। विध्यादौ तु रुयात्। रुवीयात्। अरावीत्। अरविष्यत्। तुदति सौत्रो धातुः। गतिवृद्धि-

स्नामकारस्त्वर्थमानारूपः ३१

हिंसायां। अयं वजुग्विकरण इति स्मरंति। तवीति। तौति। तवीतः। तुतः। तोता। तोष्यति। णु स्तुतौ।
नौति। नविता। टुक्षु शब्दे। क्षौति। क्षविता। क्ष्णु तेजने। क्ष्णौति। क्ष्णविता। ष्णु प्रस्रवणे। स्नौति। स्नुस्ना
वा। स्नविता। स्नुयात्। स्नूयात्। ऊर्णुञ् आच्छादने। ऊर्णोतेर्विभाषा। वृद्धिर्वा स्यादिडादौ पिति सा
र्वधातुके। ऊर्णौति। ऊर्णोति। ऊर्णुतः। ऊर्णुवंति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेराम्नेति वा
च्यो। नन्नुः संयोगादयः। अवः परः संयोगादयो नदराद्विर्न भवंति। नुशब्दस्य द्वित्वे। णत्वस्यासि
द्धत्वात्। पूर्वत्रासिद्धीयमद्विर्वचन इति त्वनित्यं। उभौ साभ्यासस्येति लिंगात्। ऊर्णुनाव। ऊर्णु
नुवतुः। ऊर्णुनुवुः। विभाषोर्णोः। इडादि प्रत्ययो ङित् स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता।

श्रेयः परिस्नौति तनोति कीर्तिमिति भारवि
श्रेयः पुरुषार्थमिति मल्लिनाथः॥ लुङ
मितीतरे॥

ऊर्णविता। ऊर्णवानि। ऊर्णवै। गुणोपृक्ते। ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके।
वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः। इह वृद्धिर्न। ङिच्च पिन्नेति भाष्यात्। ऊर्णूया
त्। ऊर्णुविषीष्ट। ऊर्णविषीष्ट। और्णवीत्। और्णुविष्टां। ऊर्णोतेर्विभाषा। इडादौ परस्मैपदपरे
सिचि वृद्धिर्वा स्यात्। पक्षे गुणः। और्णुवीत्। और्णुविष्टां। और्णवीत्। और्णविष्टां। और्णविषुः। द्यु
अभिगमने। द्योति। द्योता। षु प्रसवैश्वर्ययोः। प्रसवोभ्यनुज्ञानं। सोता। असौषीत्। कु शब्दे। कोता।
ष्टुञ् स्तुतौ। स्तौति। स्तवीति। स्तुतः। स्तुवीतः। स्तुते। स्तुवीते। स्तुसुधूञ्भ्य इतीट्। अस्तावीत्।
प्राक्सितादिति षत्वं। अभ्यष्टौत्। सिवादीनां वा। पर्यष्टौत्। पर्यस्तौत्। ब्रूञ् व्यक्तायां वाचि। ब्रुवः

पं॰वा नामादितः आह ब्रुवः। ब्रुवो ऽजः परस्मै पदानामादितः पं॰वानां णलादयः पं॰च वा स्युर्ब्रु
वश्चाहादेशः। अकार उच्चारणार्थः। आह। आहतुः। आहुः। आहस्थः। झलिपरे। चर्त्वं। आत्थ।
आहथुः। ब्रुवईट्। ब्रुवः परस्य हलादेः पित ईट् स्यात्। आह्वेत्यत्र स्थानिवद्भावात्प्राप्तोयं झलि
ति षत्वविध्यानान्न भवति। ब्रवीति। ब्रूतः। ब्रुवंति। ब्रूते। आर्द्धधातुकाधिकारे। ब्रुवो वचिः। उवाच।
ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचे। वक्ता। ब्रूतात्। ङि। ब्रुपिन्नेति अपित्वादीण्न। ब्रवाणि। ब्रवै।
ब्रूयात्। उच्यात्। अस्यतिवक्तिख्यातिभ्यङ्। वच उम्। अङि परे। अवोचत्। अवोचत। अथ शास्त्रं
ताः परस्मैपदिनः। इङ् आत्मनेपदी। इण् गतौ। एति। इतः। इणो यण्। अजादौ प्रत्यये। इयङो प

वाद्ः। यंति। इयाय। दीर्घ इणः किति। इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि। ईयतुः। ईयुः। इ
ययिथ। इयेथ। ऐत्। ऐतां। आयन्। इयात्। ईयात्। एतेर्लिङि। उपसर्गात्परस्य इणोऽणो
ह्रस्वः स्यादार्द्धधातुके किति लिङि। निरियात्। समियात्। उभयत आश्रयणे नांतादिवत्।
अभीयात्। अणः किं। समेयात्। समीयादिति प्रयोगस्तु भौवादिकस्य। इणो गा लुङि। गाति
स्थेति सिचो लुक्। अगात्। अगातां। अगुः। इङ् अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते।
अधीयते। गाङ् लिटि। इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा। अधिजगे। अधिजगाते।
अधिजगिरे। अध्येता। अध्येष्यते। अध्यैयै। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। पूर्वं धा

तुरूपसर्गे ऐ इति दर्शनेन्तरंगत्वाद्गुणात्पूर्वं सवर्णदीर्घः प्राप्तः। ऐरध्ययनेवृत्तमिति निर्दे
शान्न भवति। अध्येता। परत्वादियङ्। तत आट्। वृद्धिः। अध्यैयाताम्। अध्यैयत। अध्यैयि। अ
ध्यैवहि। अधीयीत। अधीयीयाताम्। अधीयीध्वं। अधीयीय। अध्येषीष्ट। विभाषा लुङ्लृङोः।
इङो गाङ् वा स्यात्। गाङ्कुटादिभ्योऽञ्णिन्ङित्। गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया
ङितः स्युः। घुमास्थागापाजहातिसां हलि। एषामात ईत्स्यात् हलादौ क्ङित्यार्धधातुके। अध्य
गीष्ट। अध्येष्ट। अध्यगीष्यत। अध्यैष्यत। इक् स्मरणे। अयमप्यधिपूर्वः। अधीगर्थदयेशा राम
मिति लिंगात्। अन्यथा हि गर्थेत्येव ब्रूयात्। इक एव दिक इति वक्तव्ये। अधियन्ति। अध्यगात्। ६८

केचित्तु ऽपार्द्धधातुकाधिकारे ऽस्यैवातिदेशमाहुः। तन्मते यणो। तथा च जग्धिः। ससीतयोर
घवयोरध्यीय। न्नेति। वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। प्रजनो गर्भग्रहणं। असनं
क्षेपणं। वेति। वीतः। वियन्ति। वेषि। वेमि। वीहि। अवेत्। अवीतां। अवियन्। अगुणागमे सत्यने
कारूत्वाघलीति केचित्। अव्यन्। अत्रैकारो विधानत्वंतरं प्रक्षिप्यते। एति। इतः। यन्ति। इया
न्। ऐषीत्। या प्रापणे। प्रापणमिह गतिः। प्रापि। याति। यातः। यान्ति। लङः शाकटायनस्यैव। अया
दंतास्यस्य। नङो जुस् वा स्यात्। अयुः। अयान्। यायात्। यायातां। यायास्तां। वा गतिगन्धनयोः।
भादीप्तौ। स्ना शौचे। श्रा पाके। द्रा कुत्सायां गतौ। प्सा भक्षणे। पा रक्षणे। पायास्तां। अपासीत्।

रा दाने। ला आदाने। द्वावपि दान इति चन्द्रः। दाप् लवने। प्रणिदाति। प्रनिदाति। अदासीत्। दाया-
त्। ख्या प्रकथने। अयं सार्वधातुकमात्रविषयः। ससुख्यानत्वं नमः ख्यात्रे इति वार्त्तिकं तद्भाष्य-
वेह लिंगं। सस्थानोऽग्निः क्कामलीयः। सस्नेति जादेशस्य सवर्णदित्वे प्रयोजनमित्यर्थः। संपूर्वस्य ख्या-
तेः प्रयोगो नेति न्यासकारः। प्रा पूरणे। मा माने। अकर्मकः। तनोमप्युस्तत्रा। उपसर्गवशेनार्था-
न्तरे सकर्मकः। उदरं परिमाति मुष्टिना। नेर्गदेत्यत्र नास्य ग्रहणं। प्रणिमाति। प्रनिमाति। वच
परिभाषणे। वक्ति। वक्तः। अयमन्तिपरो न प्रयुज्यते। बहुवचनपर इत्यन्ये। झिपर इत्यपरे। व-
ग्धि। वच्यात्। उच्यात्। अवोचत्। विद ज्ञाने। वेत्ति। विदो लटो वा। वेत्तेर्लटः परस्मैपदानां णलादयो

वासुः। विद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्म। पक्षे। वेत्ति। वित्तः। इत्यादि। विवेद।
विविदतुः। उषविद्याम्पक्षे। विदेत्यकारांतनिपातनान्नलघूपधगुणः। विदांचकार। वेदिता।
विदांकुर्वंत्वित्यन्यतरस्यां। वेत्तेर्लोट्याम्गुणाभावो लोटो लुक्लोडंतकरोत्यनुप्रयोगश्च वा निपा
त्यते। पुरुषवचनेन विवक्षिते इति शेषात्। तनादिकृञ्भ्य उः। तनादेः कृञश्च उप्रत्ययः स्यात्।
शपोपवादः। तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्यानित्यत्वे लिंगं। तेन न विश्वसेदविश्व
स्तं इत्यादि सिद्धं। विदांकरोतु। अत उत्सार्वधातुके। उप्रत्ययांतकृञोऽकारस्य उस्यात् सार्वधातु
के ङिति। उदितितपरत्वसामर्थ्यान्न गुणः। विदांकुरुतात्। विदांकुरुतां। उतश्चेति हेर्लुक्। समीय

त्वेन तु कोऽसिद्धत्वं कुर्वं।विदांकुरु।विदांकरवाणि।अवेत्।अवित्तां।सिजभ्यस्तेति झेर्जुस्।अवि
दुः।दश्च।धातोर्दस्य पदांतस्य सिपि परे रुः स्यात्।अवेः।अवेत्।अस भुवि।अस्ति।श्नसोरल्लोपः।
श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति।स्तः।संति।तासस्त्योरिति सलोपः।असि।
स्थः।स्थ।अस्मि।स्वः।स्मः।आर्द्धधातुके त्यधिकृत्य।अस्तेर्भूः।बभूव।भविता।अस्तु स्तात्।
स्तां।संतु।घ्वसोरेद्धावभ्यासलोपश्च।घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च।आभीयत्वे
न एत्वस्यासिद्धत्वाद्धेर्धिः।श्नसोरित्यतो लोपः।एधि।तातङ्पक्षे एत्वं न।परेण तातङा बाधा
त्।सकृद्गताविति न्यायात्।स्तात्।स्तं।स्त।असानि।असाव।असाम।अस्तिसिच इतीट्।आ

सीत्। असोरित्यस्योपस्याभीयत्वेनासिद्धत्वाद् । ऽशासां। ऽशासन्। स्यात्। स्याद्। अस्यात्। ऽप
भूत्। सिचोस्तेश्चविद्यमानत्वेनविशेषणाऽदाऽएन। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः। उपसर्गात्ः
प्रादुषश्चपरस्यास्तेः सस्यषः स्यात् यकारे ऽचि च परे निष्यात्। प्रादुःष्यात्। निषंति। प्रादुःषंति।
यच्परः किं। ऽभिस्तः। मृजेर्वृद्धौ। मृजेर्वृद्धिः। मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे। क्ङित्यजादौ
वेष्यते। वृश्चेतिषः। मार्ष्टि। मृष्टः। मृजंति। मार्जन्ति। ममार्ज। ममार्जतुः। ममृजतुः। ममार्जिथ। म
मार्ष्ठ। मार्जिता। मार्ष्टा। मृड्ढि। ऽमार्ट्। ऽमार्जं। ऽमार्जीत्। ऽमार्क्षीत्। रुदिर् अश्रुविमोचने।
रुदादिभ्यः सार्वधातुके। रुद् स्वप् श्वस् ऽन् जक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदि

ति। रुदितः। हेर्धित्वादिड्विधित्वं न। रुदिहि। रुदश्च पंचभ्यः। हलादेः पितः सार्वधातुकस्याप्टसो
स्य ईट् स्यात्। अड्गार्ग्यगालवयोः। अरोदीत्। अरोदत्। अरुदिताम्। अरुदन्। अरोदीः। अ
रोदः। प्रकृतिप्रत्ययविशेषापेक्षाभ्याम् अडीड्भ्यामन्तरंगत्वाद्यासुट्। रुद्यात्। अरुदत्। अरो
दीत्। ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ। सुष्वप्थ। सुविनि
र्दुर्भ्यः सुपिसूतिसमाः। एभ्यः सुप्यादेः सस्य षः स्यात्। पूर्वं धातुरुपसर्गेण युज्यते। इति लि
टि परत्वात् संप्रसारणे षत्वे च कृते द्वित्वम्। पूर्वत्रासिद्धीयमद्विर्वचने। सुषुषुपतुः। सुषुषुपुः।
अकित्यलिटि द्वित्वेऽभ्यासस्य संप्रसारणं षत्वस्यासिद्धत्वात्। ततः पूर्वं हलादिशेषः। निस्वता

अस्वपत्

स्वौ। ततः सुपिरूपाभावान्नषः। सुषुस्वापा सुषुस्वप्ना। ऽअस्वपीत्। स्वप्यात्। सुप्यात्। सुषुप्यात्।
ऽअस्वाप्सीत्। श्वस प्राणने। ऽ श्वसिति। श्वसिता। ऽअश्वसीत्। ऽअश्वसत्। श्वस्यात्। श्वस्यास्तां॥ ह्म्य
तक्षणऐति न वृद्धिः। ऽअश्वसीत्। ऽअनवा। ऽअनिति। ऽआन। ऽअनिता। ऽआनीत्। ऽआनत्। ऽअनितां। उप
सर्गस्थान्निमित्तात्परस्यानिते र्नस्य णः स्यात्। प्राणिति। जक्ष भक्ष हसनयोः। जक्षिति। जक्षितः।
ऽअदभ्यस्तात्। झस्य ऽअस्या दंतापवादः। जक्षति। सिजभ्यस्तेलिजुस्। ऽअजक्षुः। ऽअयमंतस्थादि
दिषु जक्षल्यद्रोवश्याम। रुदादयः पंच गताः। जागृ निद्राक्षये। जागर्त्ति। जागृतः। जाग्रति। उष
विदेत्याम्वा। जागरांचकार। जजागार। जागर्योऽ विविलक्षङिसु। जागर्त्ते र्गुणः स्याद्धि विल

ल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च। जजागार। जजागरतुः। जजागरः। जजागरतां। अभ्यस्त
तोऽङ्जुस्। जुसि च। अजादौ जुसीगन्ताङ्गस्य गुणः स्यात्। अजागरुः। अजागः। जागृयुः। आशि
षि तु। जागर्यात्। जागर्यास्तां। जागर्यासुः। लुङि। अजागरीत्। जागृं स्इत्यत्र यण् प्राप्तः। तं सार्व ६३
धातुकगुणो बाधते। तं सिचि वृद्धिः। तां जागर्त्तिगुणः। तत्र कृते हलन्तलक्षणा प्राप्ता। नेटीति नि
षिद्धा। ततोऽतो हलादेरिति बाधित्वाऽतो ल्रान्तस्येति प्राप्ता। ह्म्यन्तेति निषिध्यते। तदाहुः। गुणो वृ
द्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनं। पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव। इति। दरि
द्रा दुर्गतौ। दरिद्राति। दरिद्रस्य। दरिद्रातेरिकारः स्याद्धलादौ ङ्किति सार्वधातुके। दरिद्रितः।

श्नाभ्यस्तयोरातः । अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके । दरिद्रति । अनेकाल्त्वादाम्
दरिद्रांचकार । आत औ णलः इत्यत्र उदित्येव सिद्धे औकारविधानं दरिद्रातेराल्लोपे कृते श्रवणा
र्थं । अत एव ज्ञापकादभ्यस्ते वेत्येके । ददरिद्रौ । ददरिद्रतुः इत्यादि । आयन्नणलि दरिद्रै इति तन्निर्मूलं । नैमे
वा दरिद्रातेरार्द्धधातुके विवक्षिते आलोपो वाच्यः । लुङि वा सनि ण्वुलि ल्युटि च न । दरिद्रिता । अ
दरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । अदरिद्रात् । ददृसकौ । अदरिद्रासी
त् । चकासृ दीप्तौ । तस्य अत । चकासति । चकासांचकार । सिपि वेति लोपः । सिब्वच वेत्येके । चकाद्धि ।
चकाधीत्येव भाष्ये । तिप्यनस्तेः । पदान्तस्य सस्य दः स्यात् तिपि न त्वस्तेः । अचकात् । अचकाद् । अ

सि॰ कौ॰ उ॰ ति॰

७३

वकारस्तु॥ सिपि धातो रुर्वा। पदांतस्य सस्य रुः स्याद्वा पक्षे दः। अचकाः। अचकात्। शासु अनु
शिष्टौ। शास्ति। शास इदङ्हलोः। शास उपधाया इत्स्यादङि हलादौ ङ्किति। वा। शासिवसीति षः।
शिष्टः। शासति। शशास। शशासतुः। शास्तु। शिष्टात्। शिष्टां। शासतु। शा हौ। शास्तेः शादेशः स्या
द्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टां। अशासुः। अशाः। अशात्। शि
ष्यात्। सर्त्तिशास्त्यर्तिभ्यश्च। अङ्। अशिषत्। अशासिष्यत्। दीधीङ् दीप्तिदेवनयोः। एतदादयः पंच धा
तवश्छांदसाः। दीधीते। एरनेकाच इति यण्। दीध्याते। यीवर्णयोर्दीधीवेव्योः। एतयोरंत्यस्य लो
पः स्याद्यकारे इवर्णे च परे। इति लोपं बाधित्वा नित्यत्वादिरे त्वं। दीध्ये। दीधीवे वीटामिति गुण

राम

७३

निषेध्यः। दीध्यां चक्रे। दीधिता। दीधिष्यते। वेवीङ् वेतिना तुल्ये। वीगतीत्यनेन तुल्येऽर्थे वर्त्तत इत्य
र्थः। अथ त्रयः परस्मैपदिनः। षस सस्ति स्वप्ने। सस्ति। सस्तः। ससंति। ससास। सेसतुः। सस्तु।
सधि। पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वाद् तो हेरिति धुड्। अससत्। अससस्तां। अससः। अससत्।
अस्स्यात्। अससासीत्। अससीत्। संति। संतः। संस्तंति। बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्या
श्रित्य स्कोरिति लोपाभावात् संस्ति। संस्त इत्येके। वश कान्तौ। कांतिरिच्छा। वष्टि। उष्टः। उशन्ति। अशातुः। व
शिता। वष्टु। उष्टात्। उष्टां। उड्ढि। अवट्। अष्टां। अशन्। अवशं वे। उश्यात्। उश्यास्तां। चर्करीतं चाय
ङ्लुगंतमदादौ बोध्यं। ह्नुङ् अपनयने। ह्नुते। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट॥१४॥ ॥इत्यदादयः॥ ॥

हु दानादनयोः॥ऽआदाने चेत्येके। प्रीणनेपीति भाष्यं। दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति
स्वभावाद्गम्यते। इतश्चत्वारः परस्मैपदिनः। जुहोत्यादिभ्यः श्लुः। शपः श्लुः स्यात्। श्लौ। धातोर्द्वे स्तः।
जुहोति। जुहुतः। ऽअदभ्यस्तादित्यत्। हुश्नुवोरिति यण्। जुह्वति। भीह्रीभृहुवां श्लुवच्च। एभ्यो लिट्या
म्वा स्यादामि श्लाविव कार्यं च। जुहवांचकार। जुहाव। होता। होष्यति। जुहोतु। जुहुतात्। हेर्धिः। जुहु
धि। ऽआडिति परत्वाद्गुणः। जुहवानि। परत्वात् जुसि चेति गुणः। ऽअजुहवुः। जुहुयात्। हूयात्। ऽअहौषी
त्। ञिभी भये। बिभेति। भियोन्यतरस्यां। इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभीतः। बिभितः।
बिभ्यति। बिभयांचकार। बिभाय। भेता। ह्री लज्जायां। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयांचकार।

ञिस्तय। पृ पालनपूरणयोः। अर्त्ति पिपर्त्योश्च। अभ्यासस्य इकारोंतादेशः स्यात् श्लौ। उदोष्ठ्यपू
र्वस्य। अंगावयवौष्ठ्यपूर्वो य ऋत् तदंतस्यांगस्य उत् स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्त्ति।
उत्वं। रपरत्वं। हलि चेति दीर्घः। पिपूर्तः। पिपुरति। पपार। किति लिटि ऋच्छत्यृतामिति गुणे प्राप्ते। श
दृप्रां ह्रस्वो वा। एषां किति लिटि ह्रस्वो वा स्यात्। पक्षे गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता।
ऽपिपः। अपिपर्त्। अपिपूर्तां। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टां। ह्रस्वान्तोयमिति
केचित्। पिपर्त्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि। प्रियात्। अपाषीत्। पाणिनीयमते तु तं
रोदसी पिपृतमित्यादौ छांदसत्वं॥ डुभृञ् धारणपोषणयोः। भृञामित्। भृञ् माङ् ओहाङ्

षां त्रयाणामभ्यासस्य इत्स्यात् श्लौ । बिभर्ति । बिभृतः । बिभ्रति । बिभृध्वे । श्लुवज्ञावाद्द्वित्वे ते बि
भराम्बभूव भाराव भर्ष । बभृव । बिभृहि । बिभराणि । अबिभः । अबिभृतां । अबिभरुः । बिभृया
त् । भ्रियात् । भृषीष्ट । अभार्षीत् । अभृत । माङ् माने शब्दे च । भृञामित् । भृञामित् । श्नाभ्यस्तयोरातः इत्स्यात् सार्व
धातुके क्ङिति हलि । मिमीते । श्नाभ्यस्तयोरित्यालोपः । मिमाते । मिमते । प्रण्यमास्ता । उहाङ् गतौ । जि
हीते । जिहाते । जिहते । जहे । हाता । हास्यते । ओहाक् त्यागे । परस्मैपदी । जहाति । जहातेश्चेत्स्याद्वा हलि जा
दो क्ङिति सार्वधातुके । ईत्त्वं । जहितः । जहीतः । जहति । जहौ । जहा । लु । जहि । ता । जहाता । आव
हो । जहातेर्हौ परे आ स्यात् वा दिदातौ । जहाहि । जहिहि । जहीहि । अजहात् । अजहुः । लोपोपि । जहा 

ते शल्लोपः स्याद्यादेशात्सार्वधातुके न स्यात् । दद्धि ३ । हि यातम् । जहासील्लाउ दाम् दाने । प्रणिददाति ।
दत्तः । ददति । ददासि । ददौ । घुसंज्ञो इत्यत्वाभ्यासलोपौ । देहि । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् ।
अदात् । अदाताम् । अदुः । अदित । डुधाञ् धारणपोषणयोः । दाने च्वेके । प्रणिदधाति । दधस्तथोश्च ।
द्विरुक्तस्य झषन्तस्य धातोर्बशो भष् स्यात्तथयोः स्ध्वोश्च परतः । वचनसामर्थ्यादालोपो न स्थानि
वदिति वामनमाधवौ । वस्तुतस्तु पूर्वत्रासिद्धेन स्थानिवत् । धत्तः । दधति । धत्थः । दध्वः । धत्तो । ध
त्से । धद्ध्वे । धेहि । अधित । अथ त्रयः स्वरितेतः । णिजिर् शौचपोषणयोः । णिजां त्रयाणां गुणः श्लौ ।
णिजविजविषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । निनेज । नेक्ता । नेक्ष्यति । नेनेक्तु । ने

सि० कौ० उ० ति०
७६

निज्यि। नाभ्यस्तस्याचि पिति सार्वधातुके। लघूपधगुणो न स्यात्। नेनिजानि। अनेनेक्। अने
निक्तां। अनेनिजुः। नेनिज्यात्। निज्यात्। अनिजत्। अनैक्षीत्। अनिक्त। विजिर् पृथग्भावे। वेवेक्ति। वे
विक्तो। विवेजिथ। अत्र विज इडिति ङित्त्वं न। ओविजी इत्यस्यैव तत्र ग्रहणात्। णिजिविजी रूप्यादाव
पि। विष्लृ व्याप्तौ। वेवेष्टि। वेविष्टे। टिदित्वाद् अङ्। अविषत्। तङि क्सः। अजादौ क्सस्याचीति अल्लोपः।
अविक्षत। अविक्षाताम्। अविक्षन्त। अथ आगणान्तात्परस्मैपदिनस्त्रयोदश। घृ क्षरणदीप्त्योः।
जिघर्म्यग्निं हविषा घृतेन। भामित्। बहुलं छन्दसीति इत्वं। ह्रृ प्रसह्यकरणे। अयं स्तुवे। अभिजिह्र
हर्ति हेमान्। स्सृ गतौ। बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेति तस्य विधानादयं भाषायामपि

राम
७६

ऽभ्यासस्यासवर्णे इति इयङ्। इयर्त्ति। इयृतः। इय्रति। ऽआर। ऽआरतुः। इङ्इयर्तीति निरस्य मिद्।
ऽआरिथ। ऽअर्त्ता। ऽअरिष्यति। इयराणि। ऐयः। ऐयृतां। ऐयरुः। इयृयात्। ऽअर्यात्। ऽआरत्। ससर्त्ति।
न ससनर्स नदी स्रोतः। व मन्ति। पसि भसो हि लिबे सुप धा जो पः। ऊजो ऊजीति सजोपः। बब्रूः। बभस्य
ति। कित ज्ञाने। चिकेति। तु इत्यवरणे। तुतोर्त्ति। तुतूर्त्तः। तुतुरति। धिष शब्दे। दिधेष्टि। दिधिष्टः। धन धा
न्ये। दधन्ति। दधन्तः। दधनति। जन जनने। जजन्ति। जजनसनखनां सञ्झलोः। एषामाकारोंता
देशः स्यात् झलादौ सनि झलादौ क्ङिति च। जजातः। जज्ञति। जजंसि। जजाता। जजन्यात्। जजायात्।
जन्यात्। जायात्। गा स्तुतौ। देवानूजिगाति स्तुवन्पुः। जिगीतः। जिगति॥ ॥इति जुहोत्यादयः॥ ॥

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु। रूषंताः परस्मैपदिनः। दि-
वादिभ्यः श्यन्। शपोपवादः। हलि चेति दीर्घः। दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु। दीव्यात्। अदी-
व्यत्। दीव्येत्। दीव्यात्। अदेवीत्। अदेविष्यत्। षिवु तंतुसंताने। परिषीव्यति। परिषिषेव। न्यषे-
वीत्। न्यसेवीत्। स्रिवु गतिशोषणयोः। ष्ठिवु निरसने। केचिदिहेमं न पठंति। ष्णुसु अदने। आ-
दान इत्येके। अदर्शन इत्यपरे। स्नुस्यति। सुष्णोस। ष्णसु निरसने। स्नस्यति। सस्नास। क्नसु ह्व-
रणदीप्त्योः। ह्वरणं कौटिल्यं। चक्नास। व्युष दाहे। वुव्योष। प्लुष च। नृती गात्रविक्षेपे। नृत्यति।
ननर्त। सेसिचि कृतचृतछृदतृदनृतः। एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड्वा।

स्यात्। नर्तिष्यति। नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी उद्वेगे। वा भ्राश० इति श्यन्वा। त्रस्य
ति। त्रसति। त्रेसतुः। तत्रसतुः। कुथ पूतीभावे। पुथ हिंसायां। गुध परिवेष्टने। क्षिप प्रेरणे। क्षि
प्यति। क्षेप्ता। पुष्प विकसने। पुष्प्यति। पुपुष्प। तिम ष्टिम ष्टीम आर्द्रीभावे। तिम्यति। स्तिम्य
ति। स्तीम्यति। व्रीड चोदने लज्जायां च। व्रीड्यति। इष गतौ। इष्यति। षह षुह चक्यर्थे। चक्यर्थस्तृ
प्तिः। सह्यति। सुह्यति। जॄ झॄष् वयोहानौ। जीर्यति। जजरतुः। जेरतुः। जरिता। जरीता। जीर्येत्। जी
र्यात्। ऋदित्त्वं च्लिस्यङ्वा। ऋदृशोऽङि गुणः। अजरत्। अजारीत्। अजारिष्टां। झीर्यति। जझरतुः। अ
झारीत्। षूङ् प्राणिप्रसवे। सूयते। सुषुवे। स्वरति सूती इति विकल्पं बाधित्वा श्र्युकः किति इति

निषेधे प्राप्ते। क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता। सविता। दूङ् परितापे। दू-
यते। दीङ् क्षये। दीयते। दीङो युट् क्ङिति। दीङः परस्याजादेः क्ङितः आर्द्धधातुकस्य युट् स्यात्। वु-
ग्युटावुवङ्यणोः सिद्धौ। दिदीये। मीनातिमिनोतिदीङां ल्यपि च। एषामात्वं स्यात् ल्यपि च काराद्दशि-
त्येज्निमित्ते। दास्यते। अदास्त। अदास्याः। डीङ् विहायसा गतौ। डीयते। धीङ् आधारे। धीयते।
दिध्ये। धेता। मीङ् हिंसायां। हिंसात्र प्राणवियोगः। मीयते। रीङ् श्रवणे। रीयते। लीङ् श्लेषणे। वि-
भाषा लीयतेः। लीयते इति यकानिर्देशो न तु श्यना। लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च।
लेता। लाता। लेष्यते। लास्यते। एज्विषये किं। लीयते। लिल्ये। व्रीङ् वृणे स्पर्धे। व्रीयते। विव्रि राम ७८

ये।स्वादयत्।ओँदितः।तत्फलंतुनिष्ठानत्वां।पीङ्पाने।पीयते।माङ्माने।मायते।ममे।ईङ्गतौ।दी
यते।ऽयांचक्रे।प्रीङ्प्रीतौ।सकर्मकः।प्रीयते।पिप्रिये।ऽथपरस्मैपदिनस्त्वादयः।शोतनूक
रणे।ओतःश्यनि।लोपःस्यात्।श्यति।श्यतः।श्यन्ति।शशौ।शशतुः।शाता।शास्यति।विभाषाघ्राधे
ट्शाछासोवालुकि।लुग्भावेयमरमेतीट्सकौ।ऽशात्।ऽशातां।ऽशुः।ऽशासीत्।ऽशा
सिष्टां।छोछेदने।छ्यति।षोऽन्तकर्मणि।स्यति।ससौ।ऽभिष्यति।ऽभिष्यत्।ऽभिससौ।दोऽव
खंडने।द्यति।ददौ।घ्वसिदाता।देयात्।ऽदात्।ऽथात्मनेपदिनःपंचदश।जनीप्रादुर्भावे।ज्ञाजनो
र्जा।ऽजनयोर्जादेशःस्यात्क्ङिति।जायते।जज्ञे।जज्ञाते।जज्ञिरे।जनिता।जनिष्यते।दीपजनेतिवा

विलग्नं। जनिवध्योश्च। अनयो रूपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति वा। अजनि। अजनिष्ट।
दीपी दीप्तौ। दीप्यते। दिदीपे। अदीपि। अदीपिष्ट। पूरी आप्यायने। पूर्यते। अपूरि। अपूरिष्ट।
तूरी गतित्वरणहिंसनयोः। तूर्यते। तुतूरे। धूरी गूरी हिंसागत्योः। धूर्यते। दुधूरे। गूर्यते। जु
गूरे। घूरी जूरी हिंसावयोहान्योः। शूरी हिंसास्तम्भनयोः। चूरी दाहे। तप ऐश्वर्ये वा। अयं धातु
रैश्वर्ये वा तङ् श्यनौ लभते। अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः। केचित्तु वाग्रहणं वृत्तु
धातोरवयवमिच्छन्ति। तप्यते। तप्ता। तप्स्यते। पतेति व्यत्यासेन पाठान्तरं। घृतधामा निवृ
तः पत्यमानः। वृतु वरणे। वृत्यते। पक्षान्तरे। वावृत्यते। ततो वावृत्यमाना सा रामशालां न्यवि

स्तेति भर्त्तृः। क्लिश उपतापे। क्लिश्यते। क्लेशिता। काशृ दीप्तौ। काश्यते। वाशृ शब्दे। वाश्यते। ववा
शे। अथ पंच स्वरितेतः। मृष तिक्षायां। मृष्यति। मृष्यते। ममर्ष। ममृषे। ईशुचिर् पूतीभावे। प
तीभावः क्लेदः। शुच्यति। शुच्यते। शुशोच। शुशुचे। अशुचत्। अशोचीत्। अशोचिष्ट। णह बंधने।
नह्यति। नह्यते। ननाह। ननद्ध। नेहिथ। नेहे। नद्धा। नत्स्यति। अनात्सीत्। रंज रागे। रज्यति। रज्यते।
शप आक्रोशे। शप्यति। शप्यते। अथ पैकादश अनुदात्तेतः। पद गतौ। पद्यते। पेदे। पत्ता। पद्येताप
सीष्ट। चिएते पदः। पदस्त्रे चिएरस्या न श्रादेपदे। अत्पपादि। अपत्सातां। अपत्सत। खिद दैन्ये।
खिद्यते। चिखिदे। खेत्ता। अखित्त। विद सत्तायां। विद्यते। वेत्ता। बुध अवगमने। बुध्यते। बोद्धा।

हि॰ कौ॰ उ॰ लि॰

भोत्स्यते। बुत्सीष्ट। अबोधि। अबुद्ध। अभुत्साताम्। युध संप्रहारे। युध्यते। युयुधे। योद्धा। अयु
द्ध। कथं युध्यतीति। युधमिच्छतीति क्यच्। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति वा। अनो
रुध कामे। अनुरुध्यते। अण प्राणने। अण्यते। आणे। अणिता। अनेति दंत्यांतोयमित्येके। मन
न ज्ञाने। मन्यते। मेने। मंता। युज समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। युज्यते। यो
क्ता। सृज विसर्गे। अकर्मकः। संसृज्यते सरसिजैररुणं शुभिन्नैः। ससृजे। स्रष्टा। स्रक्ष्यते।
लिङ्सिचावितिकित्वान्न गुणो नाप्यम्। सृक्षीष्ट। असृष्ट। असृक्षाताम्। लिश अल्पीभावे। लि
श्यते। लेष्टा। लेक्ष्यते। लिक्षीष्ट। अलिक्षत। अलिक्षाताम्। अथ आगणांतात्परस्मैपदिनः। रा

राम
८०

योऽकर्मकाद्वृद्धावेवायमेवकारो भिन्नक्रमः। राधोऽकर्मकाद्वृद्धावेव श्यन्। उदाहरणमाह। वृद्धाविति।
यन्महत्यमपराध्यति। द्रुह्यतीत्यर्थः। विराध्यंतं क्षमेत कः। द्रुह्यंतं। राध्यत्योदनः। सिध्यतीत्यर्थः। कु
त्साप राध्यति। दैवं पर्यालोचयतीत्यर्थः। दैवस्य धात्वर्थेन्तर्भावाज्जीवत्यादिवदकर्मकत्वं। रराध।
रराधतुः। रराधिथ। राधो हिंसायामित्येत्वाभ्यासलोपा विहितौ। हिंसार्थस्य सकर्मकतया दैवादिके
त्वायोगात्। राद्धा। रात्स्यति। अयं स्वादिश्चुरादिश्च। व्यध ताडने। ग्रहिज्या। विध्यति। विव्याध। विविध
तुः। विव्यद्ध। विव्यधिथ। व्यद्धा। वत्स्यति। विध्येत्। विध्यात्। अव्यात्सीत्। पुष पुष्टौ। पुष्यति। पुपो
ष। पुपोषिथ। पोष्टा। पोक्ष्यति। पुषादीत्यङ्। अपुषत्। शुष शोषणे। अशुषत्। तुष प्रीतौ। दुष वै

कृत्योः। श्लिष आलिंगने। श्लिष्यति। शिश्लेष। श्लेष्टा। श्लेक्ष्यति। श्लिषः। अस्मात्परस्यानिट श्च्लेः क्सः
स्यात्। पुषाद्यङोऽपवादो न तु चिणः पुरस्तादपवादन्यायात्। आलिंगने। श्लिष श्च्लेरालिंगन
एव क्सो नान्यत्र। योगविभागसामर्थ्याच्च शल इगुपधादित्यस्याप्ययं नियमः। अश्लिक्षत्क
न्यां देवदत्तः। आलिंगन एवेति किं। समश्लिषज्जतु काष्ठं। अङ्। प्रत्यासत्ताविह श्लिषिः। कर्मणि अ
नालिंगने क्सिजेव न तु क्सः। एकवचने चिणः। अश्लेषि। अश्लिक्षातां। अश्लिक्षत। अश्लिक्षाः। अश्लि
ड्ढ्वं। शक विभाषितो मर्षणे। विभाषित इत्युभयपदीत्यर्थः। शक्यति। शक्यते। हरिं द्रष्टुं भक्तः। श
शाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते। अशकत्। अशक्त। सेट्कोऽयमित्येके।

तन्मते नाग्निदूकारिकास्तु ल्टदित्पठितः। शक्ता। शक्ष्यति। ष्विदा गात्रप्रक्षरणे। घर्मस्तु ता
विस्यर्थः। ऽयं ञीदिति न्यासकारादयः। नेति हरदत्तादयः। स्विद्यति। सिष्वेद। सिष्वेदिथ। स्वेत्ता। ऽस
स्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध बुभुक्षायाम्। क्षोद्धा। कथं क्षुधित इति। संपदादिक्वि
बं तात्तारकादित्वादितच्। इति माधवः। वस्तुतस्तु वसतिक्षुधोरितीट्। शुध शौचे। शुध्यति। शु
शोध। शोद्धा। षिधु संराद्धौ। ऊदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। ऽसिधत्। रध हिं
सासंराध्योः। रध्यति। रधिजभोरचीति नुम्। ररंध। ररंधतुः। रधादिभ्यश्च। वलादार्द्धधातु
कस्य वेट् स्यात्। ररंधिथ। ररद्ध। ररंधिव। ररध्व। नेट्यलिटि रधेः। लिड्वर्जे इटि रधेर्नुम् स्यात्।

रधिता। रद्धा। रधिष्यति। रत्स्यति। ऽइडि नुम्। ऽअनिदितामिति नलोपः। ऽअरधत्। णश अदर्शने। नश्य
ति। ननाश। नेशतुः। नेशिथ। मस्जिनशोर्झलि। नुम्। ननंष्ठ। नेशिव। नेश्व। नेशिम। नेश्म। नशि
ता। नंष्टा। नशिष्यति। नङ्क्ष्यति। नश्येत्। नश्यात्। ऽअनशत्। प्रणश्यति। नशेः षान्तस्य। णत्वं न स्यात्।
प्रनंष्टा। ऽअंतग्रहणं भूतपूर्वप्रतिपत्यर्थं। प्रनङ्क्ष्यति। नशिष्यति। तृप प्रीणने। प्रीणनं तृप्तिस्तर्प
णं च। नाग्निस्तृप्यति काष्ठानां। पितृनतार्प्सीत्। इत्युभयपदर्शनात्। ततर्पिथ। ततर्प्थ। तत्रप्थ।
तर्पिता। तर्प्ता। त्रप्ता। कृषमृशस्पृशेति सिज्वा। ऽअतार्प्सीत्। ऽअत्राप्सीत्। ऽअतर्पीत्। ऽअतृपत्। द
प हर्षमोहनयोः। मोहनं गर्वः। दृप्यति। इत्यादि। रधादित्वाद्विमो वेट्। कावमर्थमनुदात्तता। कुहि

घांसायां। वा द्रुह मुह इति वा घः। पक्षे ढः। दुद्रोग्ध। दुद्रोढ। दुद्रोहिथ। द्रोहिता। द्रोग्धा। द्रोढा। द्रोहिष्यति। ध्रो-
क्ष्यति। ढत्वघत्वयोस्तुल्यं रूपं। ॥ मुह वैचित्ये। वैचित्यमविवेकः। मुह्यति। मुमोहिथ। मुमो-
ग्ध। मुमोढ। मोग्धा। मोढा। मोहिता। मोहिष्यति। मोक्ष्यति। ॥ ष्णुह उद्गिरणे। स्नुह्यति। सु-
स्नोह। सुस्नोहिथ। सुस्नोग्ध। सुस्नोढ। सुस्नुहिव। सुस्नुह्व। स्नोहिता। स्नोग्धा। स्नोढा। स्नोहिष्यति।
स्नोक्ष्यति। ॥ ष्णिह प्रीतौ। स्निह्यति। सिस्नेह। ॥ इति रध्यादयः समाप्ताः स्यर्पः। शुषादयस्तु
ऽशोगणं तादिति सिद्धं तः। ॥ शमु उपशमे। शशाम। शमामष्टानां दीर्घः श्यनि। शमादीनामित्यर्थः। प्रशिशा-
म्यति। शेमतुः। शेमिथ। शमिता। ॥ तमु कांक्षायां। ताम्यति। तमिता। ॥ दमु उपशमे।

उपशमयतीति एवं तस्य। तेन सकर्मकोऽयं। नतु शमिवदकर्मकः। ऽदमत्। श्रमु तपसि खेदे च। श्राम्य
ति। ऽश्रमत्। भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वात तत्र कृते शमामष्टानामिति दीर्घः। भ्राम्यति।
पुषाद्यङ्। ऽभ्रमत्। ग्ने षम्वादिवत्। क्षमूष् सहने। क्षाम्यति। चक्षमिथ। चक्षंथ। चक्षमिव। चक्षण्व। च
क्षमिम। चक्षण्म। क्षमिता। क्षंता। ऽयं न षित्। भ्वादिस्तु षित्। ऽषितः क्षाम्यते क्षांतिः क्षमूषः क्ष
मतेः क्षमा। क्लमु ग्लानौ। क्लाम्यति। ष्ठापीवस्य न्यपि ष्ठिवुक्लम्वित्येव दीर्घे सिद्धे शमादिपाठो विकुल
र्थः। ऽक्लमत्। मदी हर्षे। माद्यति। ऽमदत्। शमामष्टौ गताः। असु क्षेपणे। अस्यति। आस।
ऽसिता। ऽस्यतेस्थुक्। अङि परे। आस्थत्। ऽस्य पुषादित्वादङि सिद्धे ऽस्यति वक्तीति वचनं

तऊर्थे। तङ्। तूपसर्गादस्यत्यूह्योऽदिति वक्ष्यते। पर्यास्थत। यसु प्रयत्ने। यसोऽनुपसर्गात्। संयस
श्च। श्यत्वा स्यात्। यस्यति। यसति। संयस्यति। संयसति। ऽनुपसर्गात्किं। प्रयस्यति। जसु मोक्ष
णे। जस्यति। तसु उपक्षये। दसु च। तस्यति। ऽतसत्। दस्यति। ऽदसत्। वसु स्तंभे। वस्यति। ववा
स। ववसतुः। न शसददेति निषेधः। वश्चादि दयमिति मते त्वेसतुः। वेसुः। व्युष विभागे। ऽयं
दाहे पठितः। अर्थभेदेन त्विह तु थे पुनः पठ्यते। ऽव्युषत्। उच्छादिर्दैत्यांतोयं प्लुषिरित्यन्ये। ऽय
कारं कुस्रृ स्यपरे। प्लुष दाहे। ऽप्लुषत्। पूर्वत्र पाठः सिजर्थ इत्याहुः। तद्भादिपाठे न गतार्थमि
ति स्वबं। बिस प्रेरणे। बिस्यति। ऽबिसत्। कुस संश्लेषणे। ऽकुसत्। बुस उत्सर्गे। मुस खंडने। मसी

परीणामे। परिणामो विकारः। समीदस्येके। लुट विलोटने। उच समवाये। उच्यति। उवोच। ऊच
तुः। मा भवानुचत्। भृशु भ्रंशु अधःपतने। बभर्श। अभ्रशत्। अनिदितामिति नलोपः। भ्रश्य
ति। अभ्रशत्। वृश वरणे। वृश्यति। अवृशत्। कृश तनूकरणे। कृश्यति। ञितृष पिपासायां।
हृष तुष्टौ। ष्यन्नऊमौ वादिकाद्विशेषः। रुष रिष हिंसायां। तीषसहेति वेट्। रोषिता। रोष्टा। रे
षिता। रेष्टा। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। युप्यति। लुप्य
ति। लोपिता। लुप्यतिः सेट्कः। अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात्। लु
भ गार्ध्ये। गार्ध्यमाकांक्षा। तीषसहेति वेट्। लोभिता। लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्। अ

नु भतः। भ्रवादेरवत्वे। तत्वाभ्यो भतीत्यपीत्याकुः। भ्रू भसंबन्धेनै। स्तुभ्यति। एभ तु भ हिंसायां।
उक्षुम्भिन भितु भयो पुतादौ त्स्यादौ वपच्यंते। तेषां पुतादित्वाद् ङः सिद्धः। क्यादित्वात् पक्षे सिञ्च
वत्येव। ह्रूह् पाठस्तु भ्यन र्थः। क्लिदू आर्द्री भावे। क्लिद्यति। विक्लेदिषा। विक्लेत्था। विक्लिदिव। विक्लिद्य।
क्लेदिता। क्लेत्ता। ञिमिदा स्नेहने। मिदेर्गुणः। मेद्यति। अमिदत्। पुतादिपाठादेवामिदत्। अमे
दिष्टेति सिद्धेः ह्रूह्पाठोऽमेदादिति मा भूदिति। पुतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तु वितः। ञि
क्ष्विदा स्नेहनमोचनयोः। लघु वक्षौ। आनदः। आर्द्रत्। गृधु अभिकांक्षायां। अगृधत्। वृत्
पुषादयो दिवादयश्च वृत्ताः। केचित्तु पुषादि समाप्त्यर्थमेव वृत्करणं। दिवादिस्तु भ्वादिवद

कृतिगणः। तेनक्षीयते क्षय्यतीत्यादि सिद्धिरित्याहुः॥१३९॥ इति दिवादयः॥ षुञ् अभिषवे।
अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं वा तत्र स्नाने ऽकर्मकः। स्वादिभ्यः श्नुः। सुनोति। सुनुतः।
ऊ सुवोरिति यण्। सुन्वंति। सुन्वः। सुनुवः। सुन्वहे। सुनुवहे। सुषाव। सुषुवे। सोता। सुनु। सुनवानि।
सुनवै। सुनुयात्। सूयात्। स्तुसु धूञ्भ्य इतीट्। असावीत्। असोष्ट। अभिषुणोति। अभ्यषु
णोत्। अभिसुषाव। सुनोतेः स्यसनोः। स्ये सनि च परे सुञः षो न स्यात्। विसोष्यति। षिञ् बंधने।
सिनोति। विसिनोति। सिषाय। सिष्ये। सेता। शिञ् निशाने। तालव्यादिः। शेता। डुमिञ् प्रक्षेपणे। मी
नातिमिनोतीत्यात्वं। ममौ। ममिथ। ममाथ। मिम्ये। माता। मीयात्। मासीष्ट। अमासीत्। अमा

सिष्टां। अमास्त। चिञ् चयने। प्रणिचिनोति। विभाषा चेः। अभ्यासात्परस्य चेः कुत्वं वा स्यात् स
नि लिटि च। प्रणिचिकाय। चिचाय। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति।
स्तृणुते। गुणोर्तीति गुणः। स्तर्यात्। स्तृतस्य संयोगादेः। ऋदंतात् संयोगादेः परयोर्लिङ्सिचोरि
ड्वा स्यात् तङि। स्तरिषीष्ट। स्तृषीष्ट। अस्तरिष्ट। अस्तृत। कृञ् हिंसायां। कृणोति। कृणुते। चका
र। चक्रे। क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। वृञ् वरणे। बभूथाततंथजगृभ्मववर्थेति नि
गमे। एषां वेदे इडभावो निपात्यते। तेन भाषायां पत्सीट्। ववरिथ। ववृव। ववृवहे। वरिता। वरी
ता। लिङ्सिचोरात्मनेपदेषु। वृङ्वृञ्भ्यामृदंताच्च परयोर्लिङ्सिचोरिड्वा स्यात् तङि। न लिङि।

वृतो लिङ इटो दीर्घो न स्यात्। वरिषीष्ट। वृषीष्ट। अवारीत्। अवरिष्ट। अवरीष्ट। अवृत। धुञ् कं-
पने। धुनोति। धुनुते। अधौषीत्। अधोष्ट। दीर्घान्तोऽप्ययं। धूनोति। धूनुते। स्वरति सूतीति
वेट्। दुधविथ। दुधोथ। क्किति लिटि इट्। श्रयुक इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्। दुधु-
विव। स्तुसुधूञ्भ्य इति नित्यमिट्। अधावीत्। अधविष्ट। अधोष्ट। अथ परस्मैपदिनः।
टुदु उपतापे। दुनोति। हि गतौ वृद्धौ च। हिनुमीना। उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः
स्यात्। प्रहिणोति। हेरचङि। अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि। जिघाय।
पृ प्रीतौ। पृणोति। पर्ता। स्पृ प्रीतिपालनयोः। प्रीतिवलनयोरित्यन्ये। वलनं जीवनमिति

राम

स्वामी। स्परणेति। पस्पार। स्पद्‌ दलेके। स्परणेति। पणोस्पादय स्त्रयोपि धांदसाद्धयाकुः। आ
प्लृ व्याप्तौ। आप्नुवः। आप्ताः। आप्नुहि। ल्वदित्वादङ्‌। आपत्‌। शक्लृ शक्तौ। अशकत्‌। राध साध संसि
सिद्धौ। राध्नोति। राध्यो हिंसायां। एतावाभ्यासलोपौ स्तः किति लिटि सेटि थलि वा। अपरेधतुः। रेधुः।
रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत्। असाद्धाम्। अध द्वावनुदात्तेतौ। अशू व्याप्तौ संघाते
वा। अश्नुते। अश्नोतेश्चादीर्घदभ्यासा वर्ण्णस्वरस्यनुट् स्यात्‌। आनशे। अशिता। अष्टा। अशि
ष्यते। अक्ष्यते। अश्नुवीत। अक्षीष्ट। अशिषीष्ट। आष्ट। आक्षातां। ष्टिघ आस्कंदने। ष्टिघ्नु
ते। तिष्टिघे। स्तेघिता। अष्टा गणांता। परस्मैपदिनः। तिक तिग षघ वा वादास्कंदने। तिक्नोति। ति

माधवः

ग्नोति।चप हिंसायां।स ग्नोति।भि ष्णवा आगतेभ्यो।ष्ट ग्नोति।द धर्षा।धर्षिता।दंभु दंभने।दंभनं द
म्नः।दभ्नोति।ददंभ।श्रंथिग्रंथि दंभि स्वंजीनां लिटः कित्वं वेति व्याकरणांतरं।दंहाप्याश्रीयत इ
त्युक्तं।अनिदितामिति लोपः।तस्यासीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ।देभेत्वादेत्वा
भ्यासलोपौ वक्तव्यौ।देभतुः।ददंभतुः।इदं कित्वं पिदपि द्विषयकमिति व्याकरांतरं पक्षः।तन्म
तेतिप्रसिद्धमिति स्तु।देभ।ददंभिथ।देभेति रूपांतरं बोध्यम्।अपिद्विषयकमिति न्यासकारादिम
ते तु।ददंभ।ददंभिथ।ददंभेत्येव।दंभ्यात्।संघुटद्धौ।तपप्रीणनद्रत्येके।चतु भ्यादित्वाण्णत्वं न।
तप्नोति।छंदसि।आगणं तादधिकारोयं।अहव्याप्तौ।अह्नोति।दघ घातने पालने च।दघ्नो

ति। वभ्रु मक्षरणे। बभ्नोति। हिसि चिरि जिरि दाश दृ हिंसायां। हिरणोति। सिरणोति। अयं भाषा
यामपीत्येके। नतपरश्शश्रास्वभ्रतां। क्षिरणोति। स्वसी त्येक एवाङ्गादिरित्यन्ये। स्वक्षिरणोति। चिरि
रणोति। जिरिरणोति। दाश्नोति। दृणोति। स्वत॥ स्वा॥ इति स्वादयः॥ तुद व्यथने। इतः षट् स्वरितेतः। तु
दादिभ्यः शः। तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे। नुद
ति। नुदते। नुनोद। नुनुदे। नोत्ता। दिश अतिसर्जने। अतिसर्जनं दानं। देष्टा। दिक्षीष्ट। अदिक्षत्। अ
दिक्षत। भ्रस्ज पाके। ग्रहिज्या। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते। भ्रस्जो रोपधयो
रमन्यतरस्यां। भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्द्धधातुके। मित्वादन्त्यादचः परः।

स्थान षष्ठी निर्देशात्तद्धे पर्ययो निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जिथ। बभर्ष्ठ। बभर्ज। रम भावे। ब-
भ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति लोपः। व्रश्चेति षः। बभ्रष्ठ। बभ्रज्ज। भर्ष्टा। भ्रष्टा। भ्रक्ष्यति।
भर्क्ष्यति। क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृज्ज्यास्तां। भक्षीष्ट।
भ्रक्षीष्ट। अभार्क्षीत्। अभ्राक्षीत्। अभ्रष्ट। अभर्ष्ट। क्षिप प्रेरणे। क्षिपति। क्षिपते। क्षेप्ता। अक्षै-
प्सीत्। अक्षिप्त। कृष विलेखने। कृषति। कृषते। क्रष्टा। कर्ष्टा। कृष्यात्। कृक्षीष्ट। स्पृश मृश कृ-
षेति सिज्वा। पक्षे क्सः। सिचि विकल्पेन अम्वा। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। तङि लिङ्सिचाविति कि-
त्वादम्। अकृष्ट। अकृक्षातां। अकृक्षत्। अकृक्षत। अकृक्षातां। अकृक्षन्त। स्पर्श गतौ। परस्मै

पद्दा। स्रुषति। अजोषीत्। जुषी प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। ओविजी भयचल
नयोः। प्रायेणायमुत्पूर्वः। उद्विजते। विज इट्। विजेः परस्य इडादिप्रत्ययो ङिद्वत्। उद्विजिता। उद्विजि
ष्यते। ओलजी। ओलस्जी व्रीडे। लजते। लेजे। लज्जते। लज्जे। अथ परस्मैपदिनः। ओव्रश्चू छेदने। वृ
श्च्या। वृश्चति। वव्रश्च। वव्रश्चतुः। वव्रश्चिथ। वव्रष्ठ। लिङ्यभ्यासस्येति संप्रसारणं। रेफस्य से
कारः। वृश्च्यात्। तस्य वः परस्मिन्निति स्थानिवद्भावान्न संप्रसारणे इति वस्यो लंना। व्रश्चिता। व्रष्टा।
व्रश्चिष्यति। व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्। अव्राक्षीत्। व्यच व्याजीकरणे। विचति। विव्याच। वि
विचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु

नेह प्रवर्त्तते। अनसीति पर्युदासेन तन्मात्रविषयत्वात्। ऋषि तुंदे। तुंदति। ऋषी विवासे। ऋ
षति। सद्व गतौ इंद्रिय प्रजयमूर्त्तिभावेषु। सद्वस्यतामिति गुणः। दुह जयग्रहणे स्याने कृह
लुप लक्षणत्वान्नुट्। आनर्ष। आनर्षतुः। सद्विता। मिछ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अ
मिच्छीत्। जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः। त्वच संवरणे। तत्वाच। ऋच स्तुतौ। ऋ उब्ज आर्जवे।
उज्झ उत्सर्गे। लुभ विमोहने। विमोहनमाकुलीकरणं। लुभति। लोभिता। लोब्धा। लोभिष्यति।
रिफ कत्थनयुद्धनिंदाहिंसादानेषु। रिफति। रिरेफ। रिहेत्येके। त्रिम्फु न विश्राम इति भाविर्हंति।
तृपतृम्फ तृप्तौ। आद्यः प्रथमान्तः। द्वितीयो द्वितीयान्तः। द्वावपि द्वितीयान्तावित्यन्ये। तृपति। त

तर्पीत् तर्पिता। स्वरशास्त्रशोतिसिन्निविकल्पः। यो बादिकस्येव। ऊऊप वादत्वात्। तेनात्र नित्यं सिद्धं।
अतर्पीत्। धास्पड़ि स्वादनि दिता मितिनलोपेऽशेत्वं फादीनां तुम्भावाख्यः। आदिशब्दः प्रकारे। ते
नयेत्र नकारानुषक्ताः तेत्वं कादयः। त्वं फति। तत्वंफ। त्वफा। त्व। तुपत्। तुंपत्। तुं फहिंसायाम्। तु
पति। तुंपति। तुफति। तुंफति। दपदंफऊ क्लेशे। प्रथमः प्रथमान्तः। द्वितीयान्त इत्येके। दपति।
दंफति। दफति। स्फ स्फं फ हिंसायाम्। स्फति। आनर्फ। स्फति। स्फं फ। वकारा। गुफ गुंफ ग्रंथे।
गुफति। जुगोफ। गुंफति। जुगुंफ। ऊभ ऊंभ पूरणे। ऊभति। ऊवोभ। ऊंभति। ऊंभां बकारा। शुभ
शुंभ शोभार्थे। शुभति। शुंभति। दभी ग्रंथे। दभति। च्त ती हिंसाग्रंथनयोः। चर्तिता। सेऽसिवीति

क्षी० कौ० त० ति०
९०

वेष्टू। वर्ज्जिष्यति। वर्ज्यीति। अवर्जीत्। विध विधाने। विधति। वेधिता। जुड गतौ। तवर्गपंचमान्तमे
के। जुडति। मरुतो जुडंति। मृड सुखने। मृडति। मर्डिता। पृड च। पृडति। पृण प्रीणने। पृणति।
पपर्ण। वृण च। वृणति। मृण हिंसायां। तुण कौटिल्ये। तुणति। पुण कर्मणि शुभे। पुणति। मु
ण प्रतिज्ञाने। कुण शब्दोपकरणयोः। स्तुन गतौ। द्रुण हिंसागतिकौटिल्येषु। घुण घूर्ण भ्रमणे।
षुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आक्षिपि। सूर्यात्। कुर शब्दे। कुरति। कूर्यात्। अत्र न भकु
र्छुरामिति निषेधो न। करोतेरेव तत्र ग्रहणादित्याहुः। खुर छेदने। मुर संवेष्टने। क्षुर विलेख
ने। घुर भीमार्थशब्दयोः। पुर अग्रगमने। वृहू उद्यमने। दंत्योष्ठ्यादिः। पवर्गीयादिरित्यन्ये। त

राम
९०

तृहू तृंहू हिंसार्थाः। तृहति। ततर्ह। तृंहति। ततृंह। तर्हिता। तर्ढा। तृंहिता। तृण्ढा। अतृंहीत्।
अतार्क्षीत्। अतार्हीत्। इष इच्छायां। इषगमीति छः। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्।
ऐषीत्। मिष स्पर्द्धायां। मिषति। मेषिता। किल श्वैत्यक्रीडनयोः। तिल स्नेहे। चिल वसने। चल
विलसने। इल स्वप्नक्षेपणयोः। विल संवरणे। दंत्योष्ठ्यादिः। बिल भेदने। ओष्ठ्यादिः। णिल गह
ने। हिल भावकरणे। शिल षिल उंछे। मिल श्लेषणे। लिख अक्षरविन्यासे। लिलेख। कुट कौ
टिल्ये। गाङ् कुटादिभ्य इति ङित्वं। चुकुटिथ। चुकोट। चुकुट। कुटिता। पुट संश्लेषणे। कुच संकोच
ने। गुज शब्दे। गुड रक्षायां। डिप क्षेपे। छुर छेदने। नभकुर्छुरामिति न दीर्घः। छुर्यात्। स्फुट वि

कसने। स्फुटति। पुस्फोट। मुट आक्षेपप्रमर्दनयोः। त्रुट छेदने। वा भ्राशेति श्यन्वा। त्रुट्यति। त्रुटति।
तुत्रोट। त्रुटिता। तुट कलहकर्मणि। तुटति। तुतोट। तुटिता। चुट छुट छेदने। जुड बंधने। कड मदे।
लुठ संश्लेषणे। कुड घनत्वे। घनत्वं सांद्रता। चुकोड। कुडिता। कुड बाल्ये। पुड उत्सर्गे। घुट प्रतिघा-
ते। तुड तोडने। तोडनं भेदः। पुड स्फुड संवरणे। पुडति। पुपोड। पुस्फोड। खुड छुड इत्येके। स्फुर स्फु-
ल संचलने। स्फुर स्फुरणे। स्फुल संचलने इत्येके। स्फुरति स्फुलत्योर्निर्निर्विभ्यः। षत्वं वा स्यात्। नि-
निःष्फुरति। निःस्फुरति। स्फर इत्यकारोपधं केचित्पठंति। पस्फार। स्फुड चुड व्रुड संवरणे। क्रु-
ड भृड निमज्जन इत्येके। गुरी उद्यमने। अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू स्तवने। दीर्घान्तः।

परिष्कृतत्त्रगुणो दयः। इत श्चत्वारः परस्मै पदिनः। नुवति। अनुवीत्। धृ विधूनने। धुवति। गुपुरी
षोत्सर्गे। जुगुविथ। जुगुप्थ। गुता। गुष्यति। अगुवीत्। ह्रस्वादंगात्। अगुप्त। अगुप्थाः। धुगतिस्थै
र्ययोः। ध्रुवद्गतिपाठांतरं। आपस्य ध्रुवती त्यादि गुवतिवत्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता।
ध्रुविष्यति। ध्रूय्यात्। अध्रुवीत्। अध्रुविष्टां। कुङ् शब्दे। दीर्घांत इति कैयटादयः। कुविता। अकु
विष्ट। ह्रस्वांत इति न्यासकारः। कुता। अकुत। अकृत। कुङादयो वृत्ताः। पृङ् व्यायामे। प्रायेणायं व्याङ् पूर्वः।
दिङ्। दयङ्। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापरिष्यते। व्यापृत। व्यापृषातां। मृङ् प्राणत्यागे। म्रि
यते। लुङ्लिङोश्च। लुङ्लिङोः शितश्च प्रकृतिभूता न्मृङ् स्तङ्। नान्यत्र। अड्डित्वं स्वरार्थं। म्रियते।

ममार। ममर्थ। मम्रिव। मर्त्तासि। मरिष्यति। मृषीष्ट। अमृत। अथ परस्मैपदिनः ससा। रिपि गतौ।
ऽरेपतरंगत्वादियङ्। रियति। पियति। रेता। पेता। धिक्षि धारणे। क्षि निवासगत्योः। षू प्रेरणे। सुवति। स
विता। कॄ विक्षेपे। किरति। किरतः। चकार। चकरतुः। करिता। करीता। कीर्यात्। अकारीत्। किरतौ
लवने। उपात्किरतेः सुडागमः स्याच्छेदेर्थे। उपस्किरति। अडभ्यासव्यवायेपि सुट् कात्पूर्व इति
वक्तव्यं। उपास्किरत्। उपचस्कार। हिंसायां प्रतेश्च। उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायां। उप
स्किरति। प्रतिस्किरति। गॄ निगरणे। अचि विभाषा। गिरतेरेफस्य लत्वं वा स्यादजादौ। गिरति। राम
गिलति। जगार। जगाल। जगरिथ। जगलिथ। गरिता। गरीता। गलिता। गलीता। दृङ् आदरे। आ

द्रियते। आद्रियेते। आदद्रे। आदद्रिषे। आदर्त्ता। आदरिष्यते। आदृषीष्ट। आदृत। आदृषातां। धृङ् अ-
वस्थाने। ध्रियते। अथ परस्मैपदिनः षोडश। प्रछ ज्ञीप्सायां। पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ। प-
प्रष्ठ। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। वृत्। किरादयो वृत्ताः। सृज विसर्गे। विभाषा सृजिदृशोः। ससर्जि-
थ। ससृष्ठ। स्रष्टा। स्रक्ष्यति। सृजिदृशोर्झल्यमकितीत्यमागमः। सृजेत्। सृज्यात्। अस्राक्षीत्।
टुमस्जो शुद्धौ। मज्जति। ममज्ज। मस्जिनशोर्झलीति नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः। संयोगादि-
लोपः। ममङ्क्थ। ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्क्तां। अमाङ्क्षुः। रुजो
भंगे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्तां। भुजोऽकौटिल्ये। रुजिवत्। छुप स्पर्शे। छोप्ता। अछौप्सी-

सि॰ कौ॰ उ॰ ति॰
६३

त्। रुश रिश हिंसायां। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलिक्षत्। स्पृश संस्पर्शने।
स्प्रष्टा। स्पर्ष्टा। स्प्रक्ष्यति। स्पर्क्ष्यति। अस्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। विछ गतौ। गुपूधूपेत्या
यः। आर्द्धधातुके वा। विच्छायति। विच्छायां चकार। विविच्छ। विश प्रवेशने। विशति। वेष्टा। मृश
आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत। णुद प्रेरणे। कर्त्रभिप्राये
पि फले परस्मैपदार्थः पुनः पाठः। षद्लृ विशरणगत्यवसादनेषु। सीदतीत्यादि भौवादिकव
त्। इह पाठो नुम्विकल्पार्थः। सीदती। सीदन्ती। ज्वलादेः पाठस्तु णार्थः। सादः। स्वरार्थश्च। शव
नुदन्तः। शस्त्रदन्तः। शद्लृ शातने। स्वरार्थ एव पुनः पाठः। शातात्तु नास्ति। शदेः शित आत्मने

राम
६३

परोक्ते॥ ऽथ षट् स्वरितेतः॥ मिल संगमे॥ मिल संश्लेषणे इति पठितस्य पुनः पाठः॥ कर्त्र
भिप्राये तदर्थः॥ मिलति। मिलते। मिमेल। मिमिले। मुच्ऌ मोक्षणे। शे मुचादीनां। नुम् स्याद्।
मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। ऽमुचत्। ऽमुक्त। ऽमुक्षातां। लुप्ऌ छेदने। लुंपति।
लुंपते। ऽलुपत्। ऽलुप्त। विद्ऌ लाभे। विंदति। विंदते। विवेद। विविदे। व्याघ्रभूत्यादिमते से
ट्कोयम्। वेदिता। भाष्यादिमते ऽनिट्कः। वेत्ता। परिवेत्ता। परिवर्जने। ज्येष्ठं परित्यज्य दारानग्नी
श्च लब्धवानित्यर्थः। तन्नत्वबो। लिप उपदेहे। उपदेहो वृद्धिः। लिंपति। लिंपते। लेप्ता। लिलिपिसि
वीस्पट्। तङि तु वा। ऽलिपत्। ऽलिपत। ऽलिप्त। षिच क्षरणे। सिंचति। सिंचते। ऽसिचत्।

असिचत। असिक्त। अभिषिंचति। अभ्यषिंचत्। अभिषिषेच। अथ त्रयः परस्मैपदिनः।
कृती छेदने। कृंतति। चकर्त। कर्तिष्यति। कर्त्स्यति। अकर्तीत्। खिद परिघाते। खिंदति। चिखेद।
खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिश अवयवे। पिंशति। पेशिता। अयं दीपनायामपि। ल
ब्धा रूपाणि पिंशन्तु। इति मुचादयस्तुदादयश्च। रुधिर् आवरणे। नव स्वरितेत इरितश्च। रु
धादिभ्यः श्नम्। शपोपवादः। मित्वादंत्यादचः परः। नित्यत्वाद्गुणं बाधते। रुणद्धि। श्नसोर
ल्लोपः। णत्वस्यासिद्धत्वादनुस्वारः परसवर्णः। तस्यासिद्धत्वाण्णत्वं न। नपदांते ति सूत्रेण
नुस्वारपरसवर्णयोरल्लोपो न स्थानिवत्। रुन्धः। रुंधंति। रुन्धे। रोद्धा। रोत्स्यति। रोत्स्यते। रु

णद्धु । रुन्ध्यात् । रुन्धि । रुणधानि । रुणधै । ऽअरुणत् । ऽअरुन्धां । ऽअरुणत् । ऽअरुणः । ऽअरु
णधं । ऽअरुन्धत । ऽअरौत्सीत् । ऽअरुद्ध । भिदिर् विदारणे । भिनत्ति । भित्ते । भेत्ता । भेत्स्यति । ऽअभिन
त् । ऽअभिनः । ऽअभिनदं । ऽअभित्त । ऽअभिदत् । ऽअभैत्सीत् । ऽअभिन्त । छिदिर् द्वैधीकरणे । ऽअ
छिदत् । ऽअछैत्सीत् । ऽअछित्त । रिचिर् विरेचने । रिणक्ति । रिङ्क्ते । रिरेच । रिरिचे । रेक्ता । ऽअरिण
क् । ऽअरिचत् । ऽअरैक्षीत् । ऽअरिक्त । विचिर् पृथग्भावे । विनक्ति । विङ्क्ते । क्षुदिर् संपेषणे । क्षु
णत्ति । क्षुन्ते । क्षोत्ता । ऽअक्षुदत् । ऽअक्षौत्सीत् । ऽअक्षुत्त । युजिर् योगे । योक्ता । उछृदिर् दीप्तिदे
वनयोः । छृणत्ति । छृन्ते । वछर्द । सेसि वाति वेट् । वछृदिषे । वछृत्से । छर्दिता । छर्दिष्यति । छर्त्स्य

ति। अतृणत्। अतर्दीत्। उतृदिर् हिंसानादरयोः। तृणत्ति। तृन्तीत्यादि। छृणत्तिवत्। कृ
तीवेष्टने। परस्मैपदी। कृणत्ति। आर्द्धधातुके तौदादिकवत्। ञिइंधी दीप्तौ। अथ आत्मनेपदिनः।
श्नान्नलोपः। श्नमः परस्य नस्य लोपः स्यात्। श्नसोरल्लोपः। इंधे। इंत्से। इंधिता। इनधै। ऐन्ध।
ऐन्धाः। खिद दैन्ये। खिन्ते। खेत्ता। विद विचारणे। विंत्ते। वेत्ता। अथ परस्मैपदिनः। शिष्लृ विशेष
णे। शिनष्टि। शिंष्टः। शिंषंति। शिशेष। शेष्टा। शेक्ष्यति। हेर्धिः। झलां जश् झशि। तुत्वं। झरो झरीति वा
लोपः। अनुस्वारपरसवर्णौ। शिंण्ढि। शिंड्ढि। शिनषाणि। अशिनट्। लृदित्वादङ्। अशिष
त्। पिष्लृ संचूर्णने। पिनष्टि। भंजो आमर्दने। भनक्ति। बभंजिथ। बभंक्थ। भंक्ता।

राम

नुम पाजनाभ्यवहारयोः। भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्॥ तृह हिंसि हिं

सायां। तृणह इम्। तृहः श्नमि कृते इमागमः स्यात् हलादौ पिति। तृणेढि। तृण्ढः।

तृंहन्ति। तर्हिता। अतृणेट्। हिनस्ति। जिहिंस। हिंसिता। उन्दी क्लेदने। उनत्ति। उन्तः।

उन्दन्ति। उन्दांचकार। औनत्। औन्ताम्। औन्दन्। औनः। औनत्। औनदं। अञ्जू

कान्ति गतिषु। अनक्ति। अङ्क्तः। अञ्जन्ति। आनञ्ज। आनञ्जिथ। आनङ्क्थ। अङ्क्ता। अ

ञ्जिता। अङ्ग्धि। अनजानि। आनक्। अञ्जेः सिचि। अञ्जेः सिचो नित्यमिट् स्यात्। आं

जीत्। तञ्चू संकोचने। तनक्ति। तङ्क्ता। तञ्चिता। ओ विजी भयचलनयोः। विनक्ति। विङ्क्तः। वि

जद्दिउतिड़ित्वं। विविजिषा। विजिता। अविनक्। अविजीत्। वृजी वर्जने। वृणक्ति। वर्जि-
ता। पृची संपर्के। पृणक्ति। पपर्च॥ ॥इति रुधादयः॥ ॥अथ सप्तस्वरितेतः। तनु वि-
स्तारे। तनादिकृञ्भ्य उः। तनोति। तन्वः। तनुवः। तनुते। ततान। तेने। तनुता। अतनी ता-
तानीत्। तनादिभ्यस्तथासोः। तनादेः सिचो वा लुक् स्यात् तथासोः। -
वव नं तशब्दो गृह्यते। तेनेह न। अयमत निष्ट। अतनि-
कल्पोपः। तद्वि। अततत। अतनिष्ट। अतथाः। -
विभाषा। सायात्। सन्यात्। जनसने

ष्टाः। क्षणु हिंसायां। क्षणोति। क्षणुते। ह्म्यन्तेति न वृद्धिः। ऽअक्षणीत्। ऽअक्षत। ऽअक्षणिष्टा। ऽअ
क्षथाः। ऽअक्षणिष्टाः। क्षिणु च। उप्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वको विधिरनित्य इ
ति न भवति। त्यात्रेयादयः। भवत्येवेत्यन्ये। क्षिणोति। क्षेणोति। क्षेणितासि। क्षेणितासे। ऽअक्षेणी
त्। ऽअक्षित। ऽअक्षेणिष्ट। ऋणु गतौ। ऋणोति। ऽअर्णोति। ऽअर्णुतः। ऽअर्णुवन्ति। ऽआनर्ण। ऽआनृणे।
ऽअर्णितासि। ऽआर्णीत्। ऽआर्त। ऽआर्णिष्ट। ऽआर्थाः। ऽआर्णिष्ठाः। तृणु ऽअदने। तृणोति। तर्णोति।
तृणुते। तर्णुते। घृणु दीप्तौ। जघर्ण। जघृणे। ऽअथ द्वावनुदात्तेतौ। वनु याचने। वनुते। ववने। वांद्र
मते परस्मैपदी। वनोति। ववान। मनु ऽअवबोधने। मनुते। मेने। डुकृञ् करणे। करोति। ऽअतउत्सा

र्वधातुके। कुरुतः। यणो न भकुर्छुरामिति न दीर्घः। कुर्वन्ति। नित्यं करोतेः। करोतेः प्रत्ययोकार
स्य नित्यं लोपः स्याद्वमोः परयोः। कुर्वः। चकर्थ। चकृव। कर्ता। करिष्यति। ये च। कृञ उलोपः स्या
द्यादौ प्रत्यये परे। कुर्यात्। आशिषि। क्रियात्। कृषीष्ट। अकार्षीत्। तनादिभ्य इति लुको ऽभा
वे ह्रस्वादङ्गादिति सिचो लोपः। अकृत। अकृथाः। संपरिभ्यां करोतौ भूषणे समवाये चा सं
परिपूर्वस्य करोतेः सुट् स्यात् भूषणे संघे चार्थे। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्व
ति। संघीभवन्तीत्यर्थः। संपूर्वस्य क्वचिद् भूषणेपि सुट्। संस्कृतं भक्ष्या इति ज्ञापकात्।
परिनिविभ्य इति षः। परिष्करोति। सिवादीनां वा। पर्यष्कार्षीत्। पर्यस्कार्षीत्। उपात्

तियत्नवैकृतवाक्याध्याहारेषु। उपात्कृञः सुट् स्यादेष्वर्थेषु। वात्संप्रागुक्तयोरर्थयोः।
प्रतियत्नो गुणाधानं। विकृतमेव वैकृतं विकारः। वाक्यस्याध्याहारः। आकांक्षितैकदेश
पूरणं। उपस्कृता कन्या। अलंकृतेत्यर्थः। उपस्कृता ब्राह्मणाः समुदिता इत्यर्थः। एधोदक
स्योपस्कुरुते। गुणाधानं करोतीत्यर्थः। उपस्कृतं भुंक्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते।
वाक्याध्याहारेण ब्रूते इत्यर्थः। सुट्कात्पूर्वः। अड्भ्यासव्यवायेपि सुट्। संचस्कार। कात्पू
र्व इत्यादि भाष्ये प्रत्याख्यातं। तथाहि। पूर्वं धातुरुपसर्गेण युज्यते। अंतरंगत्वात्सुट्। ततो
द्वित्वं। एवं च सत्यस्य संयोगादेर्गुणः। संचस्करतुः। कृ-र स्तत्रे सतो भारद्वाजस्येति सूत्रे

यँरुन्धो सुट् इति वक्तव्यम्। तेन सस्कुल्लरस्येट्। संचस्करिथ। संचस्करिव। गुणोर्तीति सू
त्रे नित्यं छंदसीति सूत्रान्नित्यमित्यनुवर्त्तते। नित्यं यः संयोगादिस्तस्येत्यर्थात्सुट्रिगुणेन।
संस्क्रियात्। सतश्च संयोगादेरिति लिङ्सिचोर्नेट्। एकाच उपदेशे इति सूत्रादुपदेश
इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात्। संस्कृषीष्ट। समस्कृत। समस्कृ
षाताम्॥ ॥इति तनादयः॥ ॥डुक्रीञ् द्रव्यविनिमये। क्र्यादिभ्यः श्ना। क्रीणाति। ई हल्य
घोः। क्रीणीतः। ईत्वात्पूर्वं श्नेरन्तादेशः परत्वान्नित्यत्वादन्तरंगत्वाच्च। एवं श्न्याभ्नावः। ततः
श्नाभ्यस्तयोरित्याल्लोपः। क्रीणन्ति। क्रीणीते। क्रीणाते। क्रीणते। विक्राय। विक्रियतुः। वि

राम
९८

क्रयिथ। चिक्रेय। चिक्रियिव। चिक्रियिषे। क्रेता। क्रेष्यति। क्रीयात्। क्रेषीष्ट। अक्रैषीत्।
अक्रेष्ट। प्रीञ् तर्पणे कान्तौ च। कान्तिः कामना। प्रीणाति। प्रीणीते। श्रीञ् पाके। मीञ् हिं
सायां। हिनुमीना। प्रमीणाति। प्रमीणीतः। मीनाति मिनोती त्येन्विषये आत्वं। ममौ। मिम्य
तुः। ममिथ। ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टां।
अमासत। षिञ् बंधने। सिनाति। सिनीते। सिषाय। सिष्ये। सेता। स्कुञ् आप्रवणे। स्तंभुस्तुं
भुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च। वा त् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चु
स्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तंभ्वादयश्चत्वारः सौत्राः। सर्वे रोधनार्था इत्येके।

माध्यवस्तु प्रथमतृतीयौ स्तम्भार्थौ। द्वितीयो निष्कोषणार्थः। चतुर्थो धारणार्थ इत्याह। सर्वे प
रस्मैपदिनः। लोपः। विष्टभ्नोति। विष्टभ्नाति। अवष्टभ्नोति। अवष्टभ्नाति। अवतष्टंभ। अट्स्तं
भ्वित्यङ्गा। व्यष्टभत्। व्यष्टंभीत्। स्तुभ्नोति। स्तुभ्नाति। वेः स्कभ्नातेर्नित्यं। वेः परस्य स्कभ्नातेः
सस्य षः स्यात्। विष्कभ्नोति। विष्कभ्नाति। स्कुभ्नोति। स्कुभ्नाति। हलः श्नः शानज्झौ। हलः प
रस्य श्नः शानजादेशः स्याद्धौ परे। स्तभान। स्तुभान। स्कभान। स्कुभान। पक्षे स्तभ्नुहीत्यादि।
युञ् बंधने। युनाति। युनीते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसायां। द्रू
णाति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। शिति परे। पुनाति। पुनीते। पविता। लूञ् छेदने।

ऋनाति। ऋनीते। स्तृञ् आच्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। स्तरिता। स्तरी-
ता। स्तृणीयात्। स्तृणीत। आशिषि। स्तीर्यात्। लिङ्सिचोरिति वेट्। न लिङि। इतद्दो लि-
ङि दीर्घो न स्यात्। स्तरिषीष्ट। उश्चेति कित्वं। स्तीर्षीष्ट। सिचि च परस्मैपदेष्विति न दीर्घः।
अस्तारीत्। अस्तारिष्टां। अस्तरिष्ट। अस्तरीष्ट। अस्तीर्ष्ट। कॄञ् हिंसायां। कृणाति। कृणी-
ते। चकार। चकरे। वॄञ् वरणे। वृणाति। वृणीते। ववार। ववरे। वरिता। वरीता। आशिषि। उ-
दोष्ठ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवारिष्टां। अवरिष्ट। अवरीष्ट। अ-
वूर्ष्ट। धूञ् कंपने। धुनाति। धुनीते। दुधविथ। दुधोथ। दुधुविव। धोता। धविता। स्तुस्तुभ्

न्यदतीद्धृ । अधावीत् । अधाविष्टां । अधोष्ट । अथ प्वाद्यंताः परस्मैपदिनः । शृ हिंसायां ।
शृदृप्रां ह्रस्वो वेति ह्रस्वपक्षे यणि । अन्यदा सहूर्त्ततामिति गुणः । शश्रतुः । शशरतुः । श्रुकः कि
तीति निषेधस्य क्रादिनियमेन बाध्यः । शशरिव । शश्रिव । शरिता । शरीता । शृणीहि । शीर्यात् ।
अशारिष्टां । पृ पालनपूरणयोः । पप्रतुः । पपरतुः । आपिपि । पूर्यात् । वृ वरणे । भरण इत्ये
के । भृ भर्त्सने । भरणेऽप्येके । मृ हिंसायां । मृणाति । ममार । दृ विदारणे । ददरतुः । दद्रतुः । जृ वयो
हानौ । झृ इत्येके । धृ इत्यन्ये । नृ नये । कृ हिंसायां । ऋ गतौ । ऋणाति । अरांचकार । अरिता । अरीता ।
आरिणात् । आरिणीतां । ईर्यात् । आरीत् । आरिष्टां । गृ शब्दे । ज्या वयोहानौ । ग्रहिज्या । हलः । अंगावय

वाद्धलः परं य संप्रसारणं तदंतांगस्य दीर्घः स्यात्। इति दीर्घे कृते घादीनां ह्रस्वः। जिनाति। जिज्यौ।
जिज्यतुः। री गतिरेषणयोः। रेषणं वृकशब्दः। ली श्लेषणे। विभाषा लीयतेरिति त्वे ज्विषये आत्वं
वा। ललौ। लिलाय। लाता। लेता। व्ली वरणे। व्लिनाति। प्ली गतौ। वृत्। ल्वादयो वृत्ताः। प्वादयोपी
त्येके। व्री वरणे। भ्री भये। भरणेत्येके। क्षीष् हिंसायां। एषां त्रयाणां ह्रस्वः। केचिन्मते तु न। ज्ञा अव
बोधने। ज्ञाजनोर्जा। जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः। बंध बंधने। बध्नाति। बबंधिथ। बब
बंधा। बंधा। बंधारौ। भंत्स्यति। बधान। अभांत्सीत्। पूर्वत्रासिद्धमिति भष्भावात्पूर्वं झलि सि
ज्लोपः। प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न। प्रत्ययलक्षणं प्रतिसिज्लोपस्य।

सिद्ध्वात्। अवांक्षीत्। अभाक्षुः। वृङ् संभक्तौ। वृणीते। वव्रे। ववृषे। ववृढ्वे। वरिता। वरीता। अव
रिष्ट। अवरीष्ट। अवृत। श्रन्थ विमोचनप्रतिहर्षयोः। इतः परस्मैपदिनः। श्रथ्नाति। श्रंथिग्रंथी
त्यादिना कित्वपक्षे एत्वाभ्यासलोपावप्यत्र वक्तव्यौ इति हरदत्तादयः। श्रेथतुः। श्रेथुः। इदं कि
त्वं पितामपीति सुधाकरमते श्रेथिथ। अस्मिन्नपि पक्षे णलि। शश्राथ। उत्तमे तु शश्रथ। शश्राथ। श
श्रथेति माधवः। तत्र मूलं मृग्यम्। मंथ विलोडने। ग्रंथ संदर्भे। अर्थभेदाद्बुधेः पुनः पा
ठः। रूपं तत्त्वौ। कुंथ संश्लेषणे। संक्लेशे इत्येके। कुथ्नाति। चुकुंथ। कुथेति दुर्गः। चुकोथ। मृद क्षोदे। मृ
द्नाति। मृदनाम इवा। अयं सुखेपि। मुडुलां। मृड्नाति। गुध रोषे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। कोषि

ता। निरः कुषः। निरः परात्कुषो वलादेरिड्वा स्यात्। निष्कोषिता। निष्कोष्टा। निरकोषीत्।
निरकुक्षत्। क्षुभसंचलने। क्षुभ्नादिषु वा। क्षुभ्नाति। क्षुभ्नीतः। क्षोभिता। क्षुभाणाण नभतुभ हिंसायां। न
भ्नाति। तुभ्नाति। नभते। तोभते इति शपि। नभ्यति तुभ्यति इति श्यनि। क्लिश विबाधने। श्नादिति शुलनि
षेधः। क्लिश्नाति। क्लेशिता। क्लेष्टा। अक्लेशीत्। अक्लिक्षत्। अश भोजने। अश्नाति। आश। ऊ ध्रस उञ्छे। ऊका
र इत्। ध्रस्नाति। ऊकारो धात्ववयव इत्येके। ऊध्रसांचकार। इष आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा। आभी
क्ष्ण्यं। इष्णाति। तीषसहेत्यत्र सहिना साहचर्याद् वर्यादकारविकरणस्य तौदादिकस्य वदबेर्ग्रहणं नत्विष्यती
स्मात्यो दिव्यादेः। एषिता। वस्तुतस्तु इष्यते इपिदङ् विकल्प उचितः। तथा च वार्त्तिकं। इषेस्तकारे श्य

-ष्ट स्यया ग्रति वेच्छन्ति। विष विप्रयोगे। विष्णाति। वेष्टा। प्रुष प्लुष स्नेहन सेवन पूरणेषु। प्रुष्णाति। प्लु
ष्णाति। पुष पुष्टौ। पो षिता। मुष स्तेये। मो षिता। खच भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रांतोत्पत्तिः। खच्
नाति। वांतोयमित्येके। खौनाति। ऊठ्! नु नासिके वा। सत्वत् स्य खस्य वस्य च क्रमात् ष्णाम् हूष्ताना वा देशी स्लोऽ
नु नासिके शौरनादौ वक्तिति। खौनाति। ववा वा खविता। ग्रन्थ बः परत्वाद् द्विकृते हल् तंतत्वा भावन्न
श्नान्य। खौनीहि। हिठ वा। हुत्वां। हिठ एणाति। ग्रह उपादाने। स्वदितेत्। ग्रहिज्या। ग्रह्णीते। ग्रहो लिटि
दीर्घः। एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि। ग्रहीता। लिटि तु जग्रहिथ। ग्रह्यात्। ग्रही
षीष्ट। ह्म्यंतेति न वृद्धिः। अग्रहीत्। अग्रहीष्टां। अग्रहीष्ट। अग्रहीषातां॥ ॥इति क्र्यादयः॥ ॥ राम
१०२

श्री

चुर स्तेये। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो
णिच्। चुरादिभ्यो णिच् स्यात्। चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे तेषामिह ग्रहणं
प्रपञ्चार्थं। चुरादिभ्यस्तु स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वात् तिप् शबादि गु
णायादेशौ। चोरयति। णिचश्च। णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले। चोरय
ते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। द्वित्वं। हला
दिः शेषः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत। चिति स्मृत्यां। चिंतयति।
अचिचिंतत्। चिंतेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिंगं। तेन चिंत्यात्। चिंत्यते इ

त्यादौ न लोपो न। चिंतनति। चिंतेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। अत एव कहलेड् इत्यत्र
वृत्तिकृता ऊगण्। लुः ऊ गणु रित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एवाध्वर्षाद्युत्यस्य
नवैयर्थ्यं। यत्रि संकोचे। यंत्रयति। यंत्रेति पठितुं शक्यं। यत्तु इदित्करणं यंत्रतीति माधवेनोक्तं।
तच्चिंत्यं। एवं कुद्रितंत्रिमंत्रिषु। स्फुडि परिहासे। स्फुंडयति। इदित्करणात् स्फुंडति। स्फुटीति पा
ठांतरं। स्फुंटयति। स्फुंटति। लक्ष दर्शनांकनयोः। कुद्रि अनृतभाषणे। कुंद्रयति। लड उपसेवा
यां। लाडयति। मिदि स्नेहने। मिंदयति। मिंदति। ईलडि उत्क्षेपणे। उलंडयति। ओलंडति। लुका
रहद्दित्येके। लंडयति। लंडति। उकारादिरित्यन्ये। जल अपवारणे। लज इत्येके। पीड अवगाह

राम
अपवारणे लजजं

नोपीडयति। भ्राज भास भाष दीप जीव मील पीडामन्यतरस्यां। एषामुपधाया ह्रस्वो वा स्याच्चङ् परे णौ।
अपीपिडत्। अपिपीडत्। न ट्ठः। अवस्वदने। अवस्वदनं नाम्नां। अथ प्रयत्ने। प्रस्थाने इत्येके। बध संयमने।
बाधयति।। वं धेति वा। ऊडाः। पृ पूरणे। पारयति। दीर्घोच्चारणं णिचः पाक्षिकत्वे लिंगं। तद्धि सङ्कृताय। पृ
वं पूरणेति पिपर्ति भ्यां परितेत्यादि सिद्धाव पिपरति परत इत्यादि सिद्धिः। फलांक ऊर्ज बलप्राणनयोः। भाषानंजीवं
पक्ष परिग्रहे। वर्ण वर्ण प्रेरणे। वर्ण वर्णने इत्येके। प्रथ प्रख्याने। प्राथयति। नान्ये मितोऽहेताविति
वक्ष्यमाणत्वान्नास्य मित्त्वं। अस्मद् इत्वर प्रथम्रदस्तॄस्पशां। एषामभ्यासस्य अकारोऽत आदेशः स्या
च्चङ् परे णौ। इत्वापवादः। अपप्रथत्। पृ पप्रक्षेपे। पर्थयति। ऌ लतं। उपधाया ऋवर्णस्य स्थाने ऋ

स्याद्धावङ्परेणे। इ॒र॒॑रां॑णामपवादः। अपीपथत्। अपपर्थत्। पथ इत्येके। पाथयति। षंब संबंध
ने। संबयति। अससंबत्। शंब च। अशशंबत्। सांब इत्येके। भक्ष अदने। कुट्ट छेदनभर्त्सनयोः। पूरण
इत्येके। कुट्टयति। पुट्ट चुट्ट अल्पीभावे। अ॰ षुट्ट अनादरे। सुट्टयति। अयं दोपधः। ष्टुत्वस्यासिद्धत्वा
न्नन्त्रादितिनिषेधः। आधृषीयत्वात्। लुंट स्तेये। लुंटतीति लुंटि स्तेय इति भोवादिकस्य। शठ श्वठ असं
स्कारगत्योः। श्वठि इत्येके। तुजि पिजि हिंसाबलादाननिकेतनेषु। तुंजयति। पिंजयति। इदित्करणं तुं
जति। पिंजति। तुज पिज इति केचित्। लजि लुजि इत्येके। पिस गतौ। पेसयति। पेसतीति कपि गतं। षां
त्वसामप्रयोगे। श्व श्वक श्वक परिभाषणे। ष्णिह स्नेहने। स्फिट इत्येके। स्मिट अनादरे। षोपदेशत्वा

ष्टना। यमयति चंद्रं। परिवेष्टत इत्यर्थः। वह परिकल्कने। वहयति। चुंबी वहत्। कपादेर्वक्ष्यमाणस्य
उः अदंतत्वेनाग्लोपित्वाद्दीर्घसत्वज्ञापनात्। अववहत्। वप इत्येके। वपयति। रह त्याग इत्येके। अरारह
त्। कपादेस्तु। अररहत्। बल प्राणने। बलयति। चिञ् चयने। विस्फुरणे। आत्वं वा स्यात्। अर्तिह्रीव्ली
री क्नूयी क्ष्माय्यातां पुङ्णौ। चपयति। चययति। ञित्करणसामर्थ्यादस्य णिज्विकल्पः। चयते। प्रणिच
यति। प्रनिचयति। नान्ये मितो हेतौ। अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः। तेन शमादीना
म मंतत्वप्रयुक्तं मित्वं न। घट्ट चलने। मुस्त संघाते। खट्ट संवरणे। षट्ट स्फिट्ट चुबि हिंसायां। पूल सं
घाते। पूर्ण इत्येके। पुण इत्यन्ये। पुंस अभिवर्द्धने। टकि बंधने। टंकयति। टंकति। धूस कांतिकरणे। धू

सि॰कौ॰उ॰ति॰

१०६

सयति। इत्यांतः। मृद्धं न्यांत इत्येके। तालव्यांत इत्यपरे। कीट वर्णे। चूर्ण संकोचने। पूज पूजायां। अर्क स्तवने।
तपन इत्येके। शुठ आलस्ये। शुठि शोषणे। शुंठयति। शुंठति। जुड प्रेरणे। गज मार्ज शब्दार्थौ। गाजयति।
मार्जयति। मर्च च। मर्चयति। घृ प्रस्रवणे। स्रावण इत्येके। पवि विस्तारवचने। पंवयति। पंवते इति व
कार्थस्य शपि गतं। तिज निशाने। तेजयति। कृत संशब्दने। उपधायाश्च। धातोरुपधाभूतस्य ऋत इत्
स्यात्। रपरत्वं। उपधायां चेति दीर्घः। कीर्तयति। उर्ऋत्। अचीकृतत्। अचिकीर्तत्। वर्ध छेदन पूरण
योः। कुबि आच्छादने। कुंबयति। कुंबति। कुभि इत्येके। लुबि तुबि अदर्शने। अर्दन इत्येके। ह्रप व्यक्तायां वा राम
चि। क्लप इत्येके। चुटि छेदने। इल प्रेरणे। एलयति। ऐलिलत्। म्रक्ष म्लेच्छने। म्लेच्छ अव्यक्तायां वाचि। १०६

म्ले १

भ्रूस वर्ह हिंसायां। केवि दिह गर्ज गर्द शब्दे। गर्धऽभिक्षायामिति पठंति। गुर्द पुर्व निकेतने। जसि रक्षणे।
मोक्षण इति केवित्। जंसयति। जंसति। ईड स्तुतौ। जसु हिंसायां। पिडि संघाते। रुष रोषे। रुट इत्येके।
डिप क्षेपे। ष्टुप समुच्छ्राये। आकुस्मादात्मनेपदिनः। कुस्म नाम्नो वेति वक्ष्यते। तमभिव्याप्येत्यर्थः।
अकर्तृगामिफलार्थमिदम्। वित संवेतने। वेतयते। अवीवितत। दशि दंशने। दंशयते। अददंशत।
इदित्वान्निजभावे दंशति। आकुस्मीयमात्मनेपदं णिच्संनियोगेनैवेति व्याख्यातारः। नलोपे
संज्ञिसाहचर्यादिदेव ग्रहणं। दसि दर्शनदंशनयोः। दंसयते। दंसति। दस इत्यप्येके। डप। डिप
संघाते। तत्रि कुटुंबधारणे। तंत्रयते। वांद्रा धातुद्वयमिति मत्वा कुटुंबयते इत्युदाहरंति।

मत्रि गुप्त परिभाषणे। स्पश ग्रहण संश्लेषणयोः। तर्ज भर्त्स तर्जने। वस्त गंध अर्दने। वस्तयते। गंध
यते। विष्क हिंसायां। हिष्क इत्येके। निष्क परिमाणे। लल ईप्सायां। कूण संकोचे। तूण पूरणे। भ्रूण आशा
विशंकयोः। शठ श्लाघायां। यक्ष पूजायां। स्यम वितर्के। गूर उद्यमने। शम लक्ष आलोचने। ना
न्ये मित इति मित्त्वनिषेधः। शामयते। कुत्स अवक्षेपणे। त्रुट छेदने। कुट इत्येके। गल स्रवणे।
भल आभंडने। कूट आप्रदाने। अवसादन इत्येके। कुट्ट प्रतापने। वंचु प्रलंभने। वृष शक्तिबंध
ने। शक्तिबंधने प्रजननसामर्थ्यं। शक्तिसंबंधश्च। वर्षयते। मद तृप्तियोगे। दिवु परिकूजने। गृ
विज्ञाने। गारयते। विद चेतनाख्याननिवासेषु। वेदयते। सत्तायां विद्यते ज्ञाने वेत्ति विंते विचा

रणे। विंदते विंदति प्राप्नोत्ययं नलुक् कुस्म शेष्विदं क्रमात्। मनस्त्वं भो मानयते। युगुप्सायां।
यावयते। कुस्म नाम्नो वा। कुस्मेति धातुः कुत्सितस्मयने वर्त्तते। कुस्मयते। अनुकुस्मत।
अथवा कुस्मेति प्रातिपदिकं। ततो धात्वर्थे णिच्॥ ॥इत्याकुस्मीयाः॥ ॥वर्च अध्ययने।
भुक्क भाषणे। शब्द उपसर्गादाविष्कारे च। वा भाषणे। प्रतिशब्दयति। प्रतिश्रुतमाविष्करोती
त्यर्थः। अनुपसर्गाच्च। आविष्कारे इत्येव। शब्दयति। कण निमीलने। काणयति। ऐणे वस्तु
पथायाह्रस्वः। कण्यादीनां वेति विकल्पितो। अचीकणत्। अचकाणत्। जभि नाशने। जंभयति।
जंभति। षूद क्षरणे। सूदयति। असूषुदत्। जसु ताडने। जासयति। जसति। पश बंधने। पा

शायति। शम रोगे। शामयति। नान्ये मितइति निषेधः। शम गत्यादौ शपि गतः। तस्माद्धेतुमण्णौ
शामयति। चट स्फुट भेदने। विकासे शप्। शपोः स्फुटति स्फोटते इत्युक्तं। घट संघाते। घाटयति।
हन्त्यर्थाश्च। नव गणएवामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्ते इत्यर्थः। दिवु मर्दने। उदिला
देवतीत्यपि। अर्ज प्रतियत्ने। अयमर्थान्तरेपि। द्रव्यमर्जयति। घुषिर विशब्दने। घोषयति। घु
षिर विशब्दन इति सूत्रे ऽविशब्दन इति निषेधात् हिंसादन्निस्योऽस्य णिचू। घोषति। इरित्वा
दङ्गे। अघुषत्। अघोषीत्। एवं तस्य न्तु। अज्जू घुषत्। आङः क्रन्द सातत्ये। ओ वादिकः क्रन्दया
तु याञ्चा पर्यन्ताः सएवाङ् पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु। आङ् पूर्वो घुषिः

कं दस्मात त्स्येद्दत्या कुः। आघोषयति। जस हिंस्यायोगे। तसि भूष अलंकरणे। अवतंसयति। भूषय
ति। अर्ह पूजायां। ज्ञा नियोगे। आज्ञापयति। भज विश्राणने। ष्णुसु प्रहसने। अशु शब्दे त्ह। अशीम
यत्। पत निकारोपस्कारयोः। स्वद स्वाद आस्वादने। स्पद इत्येके। स्गे इत्यन्ये। अंबु विशेषणे। अंबय
ति। उदित्वमिच्छिक स्यार्थं। अत एव विभाषितो णिच्। अंबति। एवं ष्णुजसु प्रभृतीनामपि वा। ध्यं।
लिगि चित्रीकरणे। लिंगयति। लिंगति। मुद संसर्गे। मोदयति सक्तून् घृतेन। त्रस धारणे। ग्रहणे
इत्येके। वारणे इत्यन्ये। उध्रस उंछे। उकारो धात्ववयव इत्येके। नेत्यन्ये। ध्रासयति। उध्रासयति।
मुच प्रमोचने मोदने वा। वस स्नेहच्छेदापहरणेषु। चर संशये। च्युस हसने। हसने वेत्येके। भावय

ति। च्युस स्येके। च्योसयति। भुवोऽवकल्कने। अवकल्कनं मिश्रीकरणमित्येके। चिंतनमित्यन्ये। भा
वयति। कृपेश्च। कल्पयति। आस्वदः सकर्मकात्। स्वदिमभिव्याप्य संभवत्कर्मण्येव णिच्। ग्रसग्र
हणे। ग्रासयति फलं। पुष धारणे। पोषयति। दल विदारणे। दालयति। पट पुट लुट तुजि
मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विच्छ चीव
पुथ लोक लोच णद कुप तर्क वृतु वृधु भाषार्थाः। पाटयति। पोटयति। लोटयति। तुंजयति। तुं
जति। एवं परेषां। घाटयति। घंटयति। नाग्लोपिशास्वृदितां। णिच्यग्लोपिनः शास्तेः ऋदितां च उ
पधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। वर्त्तयति। वर्द्धयति। उदित्त्वाद्वर्त्तति। वर्द्धति। रुट

ञजिः अजिद्दश्रिभ्रश्रिरुश्रिशीकनदपुटिजिविरधिजधिः अहिरहिमहि वा। जडितडनजवाप्र

रीः आप्यायने। ईदित्वं निष्ठायामिति निषेधार्थं। अतएव णिज्वा। पूरयति। पूरति। रुज हिंसायां।

ष्वद स्वादने। स्वादद्रु रस्यके। अस्मिन्नदत्वादीर्घस्य त्वषोपदेशत्वाद् अस्ति स्वदत्। आध्रुषाद्वा॥ तत्र

ईद्वि भाषित णिचः। युष्यादानुमभिव्याप्या युज एव संयमने। योजयति। अयोक्षीत्। पर्चयति।

पर्चति। पर्चिता। अपर्चीत्। अर्च पूजायां। षह मर्षणे। साहयति। स एवायं नागः सहति कलभेभ्यः

परिभवं। ई दृक्षेपे। जी द्रवीकरणे। जापयति। जयति। जेता। वृजी वर्जने। वर्जयति। वर्जति। वृञ्

आवरणे। वारयति। वरति। वरते। वरिता। वरीता। ज्रू वयोहानौ। जारयति। जरति। जरिता।

जरीता। ज्रि च। ज्राययति। ज्रयति। ज्रेता। रिच। वियोजनसंपर्चनयोः। रेचयति। रेचति। रेक्ता। शि
ष ऽसर्वोपयोगे। शेषयति। शेषति। शेष्टा। ऽनिट्कस्तु। ऽयं विपूर्वोऽतिशये। तप दाहे। तापयति।
तपति। तप्ता। तृप तृप्तौ। संदीपन इत्येके। तर्पयति। तर्पति। तर्पिता। छृदी संदीपने। छर्दति। छ
र्दयति। छर्दिता। छर्दिष्यति। सेसिचीति विकल्पो न। साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात्। च
प छृप तृप दृप संदीपन इत्येके। छर्पयति। दृभी भये। दर्भयति। दर्भति। दर्भिता। दृभ संदर्भे। ऽयं
तु दादावीदित्। श्रथ मोक्षणे। हिंसायामित्येके। मी गतौ। माययति। मयति। मेता। ग्रंथ बंधने। ग्रं
थयति। ग्रंथति। शीक ऽआमर्षणे। चीक च। ऽअर्द हिंसायां। स्वरितेत्। ऽअर्दयति। ऽअर्दति। ऽअर्दते।

हिसि हिंसायां। हिंसयति। हिंसति। हिनस्तीति। अमि गतौ। अर्ह पूजायां। आङः षद पद्यर्थे। आसा
दयति। आसीदति। पाघ्रेति सीदादेशः। आसत्ता। आसासीत्। शुंध शौचकर्मणि। शुंधिता। अ
शुंधीत्। अशुशुंधत्। छद अपवारणे। स्वरितेत्। चुष परितर्कणे। परितर्कणम् ऊहे हिंसा वा। प
रितर्पणम् इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जोषयति। जोषति। प्रीतिसेवनयोर्जुषते तु दादौ।
धूञ् कंपने। णिच्यधिकृत्य। धूञ्प्रीञोर्नुग्वक्तव्यः। धूनयति। धुवति। धवते। केचित्तु धू
ञ्प्रीञोरिति पठित्वा प्रीणातिसाहचर्याद्धूनातेर्वनुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तु
दादौ वा। स्वादौ ह्रस्वश्च। तथा च कविरहस्ये। धूनोति चंपकवनानि धुनोत्यशोकं चूतं धुनाति धु

वति।स्फुरिताऽतिमुक्तकम्।वायुर्विधूनयति चंपकपुष्परेणून्यत्कानने धवति चंदनमंजरीश्च।
प्रीञ् तर्पणे।प्रीणयति।धूञ्प्रीञोरिति हरदत्तो क्षपाठे तु प्राययति।प्रयति।प्रयते।ग्रंपग्रंथ
संदर्भे।आप्लृ लंभने।आपयति।आपयति।आप्ना।आपत्।स्वरितेदयमित्येके।आपते।तनु
श्रद्धोपकरणयोः।उपसर्गाच्चादैर्घ्ये।तानयति।तनति।वितनति।वन श्रद्धोपहननयोरित्येके।
वानयति।वनति।वद संदेशवचने।वादयति।स्वरितेत्।वदति।वदते।अनुदात्तेदित्येके।व
वदतुः।ववदिथ।ववदे।वद्यात्।वच परिभाषणे।वाचयति।वचति।वक्ता।अवोचीत्।मानपू
जायाम्।मानयति।मानति।मानिता।विचारणे तु भौवादिको नित्यसन्नंतः।मीमे मानयते।भू

त्याकुत्सीयः। मन्यते इति दिवादौ। मनुते इति तनादौ। अग्राह्या वात्मनेपदी। भवते। भावयते। लि
ङ्गं नियोगे नैवात्मनेपदमित्येके। भवति। गर्ह विनिंदने। मार्ग अन्वेषणे। कठि शोके। उत्पूर्वोय
मुत्कंठायां। कंठते इत्यात्मनेपदी गतः। मृजू शौचालंकारयोः। मार्जयति। मार्जति। मार्जिता। मार्ष्टि।
मृष तितिक्षायां। स्वरितेत्। मर्षयति। मर्षति। मर्षते। मृष्यति। मृष्यते इति दिवादौ। सेवने श
षि मर्षति। धृष प्रसहने। धर्षयति। धर्षति॥ ॥इत्याधृषीयाः॥ ॥अथादंताः। कथ वाक्यप्रबं
धने। अल्लोपस्य स्थानिवत्वान्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घः सन्वद्भावो। अचकथत्।
वर ईप्सायाम्। वरयति। वारयतीति गतम्। गण संख्याने। गणयति। ईचगणः। गणेरभ्यासस्य ई

स्याश्वभ्र देलो। चादत्। अजगणत्। अजीगणत्। शठ श्वठ सम्यग्वभाषणे। पट वट ग्रंथे। रह त्यागे।
अररहत्। स्तन गदी देवशब्दे। स्तनयति। गदयति। अजगदत्। पत गतौ वा। वा णिजंतः। वाऽदंत इत्ये
के। आद्ये पतयति। पतति। पतां वकारः। अपतीत्। द्वितीये। पातयति। अपीपतत्। पष अनुपसर्गात्
गतावित्येव। पषयति। स्वर आक्षेपे। स्वरयति। रच प्रतियत्ने। रचयति। कल गतौ संख्याने च। वह
परिकल्कने। परिकल्कनं दंभः शाठ्यं च। मह पूजायाम्। महयति। महतीति शपि गतम्। सार कृप
श्रथ दौर्बल्ये। सारयति। कृपयति। श्रथयति। स्पृह ईप्सायाम्। भाम क्रोधे। अबभामत्। सूच पै
शून्ये। सूचयति। अषोपदेशत्वान्न षः। असुसूचत्। खेट भक्षणे। तृतीयांत इत्येके। खोट इत्य

न्ये।श्लोर दक्षे पे।गोम उपलेपने।अजुगोमत्।कुमार क्रीडायाम्।अचुकुमारत्।शील उपधारणे।उप
धारणमभ्यासः।साम सान्त्वप्रयोगे।अससामत्।सामसान्त्वने इत्यती त्यस्यत्तु असीषमत्।वेल
कालोपदेशे।वेलयति।काल इति पृथग्धातुरित्येके।कालयति।पल्यूल लवनपवनयोः।वात सुख
सेवनयोः।गतिसेवनयोरित्येके।वातयति।अववातत्।गवेष मार्गणे।अजगवेषत्।वास उपसेवायां।
निवास आच्छादने।भाज पृथक्कर्मणि।सभाज प्रीतिदर्शनयोः।प्रीतिसेवनयोरित्यन्ये।सभाजय
ति।ऊन परिहाणे।ऊनयति।उः पुयण्जीति सूत्रे पपयोरितिव चव्ये वर्गप्रत्याहारजकारस्य ग्रहणे लिं
गं।एति विस्म व आदेशो नस्यात् द्वित्वे कार्ये इति।यत्र द्वित्वे कृते अभ्यासोत्तरखण्डस्य आद्यो वृ प्र

क्रियायां परिनिष्ठिते रूपे वाऽवर्णो लभ्यते तत्रैवायं निषेधः। ज्ञापकस्य सजातीयापेक्षत्वात्तेनाभि
कीर्त्तदिति सिद्धं। प्रकृते तु न शब्दस्य हित्वं। तत उत्तरखंडेऽल्लोपः। अननत्। मा भवाननननत्। ध्व
न शब्दे। अदध्वनत्। कूट परितापे। परिदाह इत्यन्ये। संकेत ग्राम कुण गुण चामंत्रणे। चात्कूटो
पि। कूटयति। संकेतयति। ग्रामयति। कुणयति। गुणयति। पाठांतरं केत श्रावणे निमंत्रणे च। के
तयति। निकेतयति। कुण गुण चामंत्रणे। चकारात्केत कुण संकोचने इति। स्तेन चौर्ये। अतिस्तेन
त्। आगर्वादात्मनेपदिनः। पत गतौ। पतयते। अपपतत्। गृह ग्रहणे। गृहयते। मृग अन्वेषणे।
मृगयते। मृग्यतीति कंड्वादिः। कुह विस्मापने। शूर वीर विक्रांतौ। स्थूल परिबृंहणे। स्थूलय

ते। ऽतुसूत्रत्। अर्थ उपयाच्ञायां। अर्थयते। आर्त्तथत। सत्र संतानक्रियायां। अससत्रत। नैऽत्रेका
स्त्रीन्नयोपदेशः। सिसत्रयिषते। गर्व माने। गर्वयते। अदंतत्वसामर्थ्याण्णिज्विकल्पः। धातोरंतत्र
दन्तः। लिङ्घाम्नवफलां। एवमग्रेपि। इत्यागवीयाः। सूत्र वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र प्रस्र
वणे। मूत्रयति। मूत्रति। रूक्ष पारुष्ये। पार तीर कर्मसमाप्तौ। अपपारत्। अतितीरत्। पुट संस
र्गे। पुटयति। धेक दर्शन इत्येके। अदिधेकत्। कत्र शैथिल्ये। कत्रयति। कर्त्त इत्यप्येके। कर्त्तयति। प्रा
तिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णि स्यादिष्ठेयथा प्रातिपदिकस्य
पुंवद्भावरभावटिलोपविन्मतुल्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वन्नावपिस्युः।

पटुमाचष्टे पटयति। पटत्वाद्दृद्धोस्सांदि ञोपः। अपीपटत्। णौ चङी स्वत्र भाष्येतु वृद्धे लोपो वली
यानिति स्थितं। अपपटत्। तत्करोति तदाचष्टे। पूर्वस्य प्रपंचः। करोत्याचष्टे इति धात्वर्थमात्रं णिज
र्थः। जडुर्थस्त्व विवक्षितः। ते नातिक्रामति। अश्वेनातिक्रामति अश्वयति। हस्तिनाऽतिक्रामति।
अतिहस्तयति। धातुरूपं वा णि प्रकृतिर्धातुरूपं प्रतिपद्यते। वस्त्राद्युक्तसमुच्चयार्थः। तथा
च वार्तिकं। आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति। कं
सवधाख्यानमाचष्टे कंसं घातयति। इहकं संहन् इति स्थिते। हनस्तोऽचिण्णलोः। हंते र्नकारे तादे
शः स्याञ्चिण्णल्वर्जे ञ्णिति। नं वंगसंज्ञाधातुसंज्ञावकं सविधिष्टस्य ग्राह्यात तत्र अङ्हित्वयोर्दोषः।

कृ२

न्व१

किंवकुत्वतत्वेनस्यातां।ध्यातोः स्वरूपग्रहणे तस्मिन्सत्ये कार्यविज्ञानात्। सत्यां। प्रकृतवद्भेतिविकारो भि
न्नक्रमः। कारकं वा। वात्कार्यां हेतुमण्णिचः प्रकृते हेत्वादे [illegible] हेतुमत्ते यादृशं कारकं धातोव
नेतन्कृतं द्वितीयांतयादृशं वकार्यं कुत्वतत्वादि तद्दिहापीत्यर्थः। कं समज्ञीपनत्। कर्तृकरणग्र
त्वर्थे। कर्तृव्यापारार्थं यत्करणं न तु वक्तृत्वादिमात्रमित्यर्थः। ऽस्तिनाहंतिऽस्मयति। वषकदर्श
ने। विचित्रीकरणे। ऽआलेख्यकरण इत्यर्थः। कदाचिद्दर्शने। विचित्रेत्ययमद्भुतदर्शने लिवंल
भते। विचित्रयति। ऽसंसक्षमापाते। वटविभाजने। ऽजप्रकाशने। वदिजडि इत्येके। वंटयति। ऽजंज
यति। ऽदंतेषुपाठबलादहंतत्वे वहिरित्यन्ये। वंटापयति। ऽजंजापयति। शाकटायनस्तु कथा

क्षि० कौ० उ० ति०

११५

दीनां सर्वेषां पुकमाह। तन्मतेकथापयति। गल्लपयतीत्यादि। मिश्र संपर्के। संग्राम युद्धे। ऽअसुद
तेत्। ऽअकारप्रश्लेषात्। ऽअससंग्रामत। स्तोम श्लाघायाम्। ऽअतुस्तोमत्। छिद्र कर्णभेदने। कर
ण भेदन इत्यन्ये। कर्णेतिध्यात्वंतर इत्यपरे। ऽअंध दृष्ट्युपघाते। उपसंहार इत्यन्ये। ऽआंदधत्। दं
ड दंडनिपातने। ऽअंक पदे लक्षणे च। ऽआंचकत्। ऽअंग च। ऽआंजगत्। सुख दुःख तत्क्रियायाम्। र
स आस्वादनस्नेहनयोः। व्यय वित्तसमुत्सर्गे। ऽअवव्ययत्। रूप रूपक्रियायां। रूपस्य दर्शनं कर
णं वा रूपक्रिया। छेद द्वैधीकरणे। ऽअचिछेदत्। छद अपवारण इत्येके। छदयति। लाभ प्रेरणे। व्र
ण गात्रविचूर्णने। वर्ण वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णकरणं। सुवर्णं वर्णय

राम

११५

ति। कृष्णं वर्णयति। विस्तृणातीत्यर्थः। हरितं वर्णयति। स्तौतीत्यर्थः। वकुलमेतन्निदर्शनं। अदंत
धातुनिदर्शनमित्यर्थः। बाहुलकादन्येपि बोध्याः। तद्यथा। पर्ण हरितभावे। अपपर्णत्। विष्क दर्श
ने। क्षप प्रेरणे। वस निवासे। तुत्थ आवरणे। एवमांदोलयति। प्रेंखोलयति। विडंबयति। अवधीरय
तीत्यादि। अन्ये तु दशगणीपाठो वहुलमित्याहुः। तेनापठितापि सौत्रलौकिकवैदिका बोध्याः। अन्ये
तु नवगणीपठितेभ्योपि क्वचित्स्वार्थे णिच्। रामो राज्यमचीकरदिति यथेत्याहुः। चुरादिभ्य एव
वहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः प्रामाण्ये स्थिताः। णिङ्गान्निरसने। अंगवाचिनः प्राति
पदिकान्निरसनार्थे णिङ् स्यात्। हस्तौ निरस्यति हस्तयते। पादयते। श्वेताश्वाश्वतरगालोडिताह्व

रकारेण मस्वतरेतकलोपश्च। श्वेताश्वादीनां वक्तुर्णौ श्वादयो लुप्यंते णिङ् वा धात्वर्थे। श्वेताश्वमा
चष्टे तेनातिक्रामति वा श्वेतयते। अश्वतरमाचष्टे अश्वयते। गालोडितं वाचा विमर्शः। तत्करोति गा
लोडयते। आह्वरयते। केचित्तु णिचमेवानुवर्तयंति तन्मते परस्मैपदमपि। पुच्छादिषु धात्वर्थ इ
त्येव सिद्धं। णिजंतादेव बकुलवत्वनादात्मनेपदमस्तु। मास्तु पुच्छभांडेति णिङ् विधिः। सिद्धसूत्रेग्र
णोते मंगलार्थः॥ ॥इति चुरादयः॥ ॥तत्प्रयोजको हेतुश्च॥ कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसं
ज्ञश्च स्यात्॥ हेतुमति च॥ प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्। भवंतं प्रेरयति। भाव
यति। णिचश्चेति कर्त्रभिप्राये फले आत्मनेपदं। भावयते। भावयांबभूव। ओः पुयण्ज्यपरे। सनि परे यदं

गे तदवयवस्याभ्यासोकारस्येत्वं स्यात् पवर्गयण्जकारेषु अवर्णपरेषु परतः। अबीभवत्। अपी पुञ्पवने।
पवत्। मूङ्। अमीमवत्। अयीयवत्। अरीरवत्। अजेजीजवत्। अजीजवत्। स्रवति शृणोति द्रु श्रु श्रवणे। द्रु गतौ। प्रुङ्
वति प्रवति प्लवति च्यवतीनां वा। एषामभ्यासोकारस्य इत्वं वा स्यात् णौ अवर्णपरे यात्वक्षरे परे।
असिस्रवत्। असुस्रवत्। नाग्लोपीति ह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकर्त्। म स४
तां तरे। अववकासत्। अशशोपीलु स्नुश्ता लुप्रकरणे उदाहरिष्यते। एवं तालिचू। पूर्वविप्रतिषेधादप
वादत्वाद्धस्वविधिं बाधित्वा णिलोपः। वोरयति। णौ चङीति ह्रस्वः। दीर्घो लघोः। न वाग्लोपित्वाद्धूयो रव्य
संभवः। एया कृतिनिर्देशात्। अजूहुरत्। णौ च संश्चङोः। सन्परे चङ्परे च णौ ह्वयतेः संप्रसारणं

टुओश्वि गतिवृद्ध्योः

वास्यात्। संप्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात् संप्रसारणं पूर्वरूपं। अमूशावत्। अ
नेमुत्वान्न दीर्घः। अशिश्वयत्। स्तनु लिवु सहावृद्धौ। उपसर्गनिमित्तत्वाभ्यां सस्य षो न स्याद्वृद्धि।
अवातस्तंभत्। पर्यसीषिवत्। न्यसीषहत्। आटिटत्। आशिशत्। बहिरंगोप्युपधाह्रस्वो द्वि
त्वात्प्रागेव। उणेर्दित्करणं द्विंगात्। मामवानिदिधत्। एज्ञादावेधतौ विध्याजान्नवृद्धिः।
मामवान्ध्रेदिधत्। नन्द्राः इति नदराणां न द्वित्वं। अंदिदत्। आड्डिडत्। आर्चिचत्। उब्ज आर्जवे।
उपदेशे दकारोपधः। भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद्दस्य वः। स चांतरंगो
ऽपि द्वित्वविषये नन्द्रा इति निषेधाज्ज्ञापकाद्दस्य द्वित्वे कृते प्रवर्तते। नत्वतः प्राक्। दकारे चारणसा

मथ्यात्। अजिजगत्। अजागदित्येवान्येह। अदिद्युतत्। रभेरशब्लिटोः। रभेर्नुम्स्यादचि
न तु शब्लिटोः। लभेश्च। अररम्भत्। अललम्भत्। हेरचङीति सूत्रेऽचङीत्युक्तेः कुत्वं न। अजी
हयत्। अत्स्मृदृत्वरप्रथम्रदस्तृस्पशां। असस्मरत्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्न
दीर्घः। विभाषा वेष्टिचेष्ट्योः। अभ्यासस्य अत्वं वा स्याच्चङ्परे णौ। अववेष्टत्। अविवेष्टत्। अ
ववेष्टत्। अविवेष्टत्। भ्राजभासेत्यादिना वोपधाह्रस्वः। अबिभ्रजत्। अबभ्राजत्। इत्यादि।
काण्यादीनां वेति वक्तव्यं। एतेनाः कण रण भण श्रण लुप हेठ काण्यादयः षट् भाष्ये उक्ताः। का
यिवाणि लोटि लपयश्च त्वारो धिकाभ्यासे। वाणि लोपी। अपपन्यत्रा। इत्थं ह्रादश। अचीकणत्। अ

चकाणत् । स्वापेश्चङि । एवं तस्य स्वापे चङि संप्रसारणं स्यात् । असूषुपत् । शाछासाह्वाव्या
वेपां युक् । णौ लुकोपवादः । शाययति । ह्वाययति । ह्वः संप्रसारणं । सन्परे चङ्परे च णौ ह्वयतेः सं
प्रसारणं स्यात् । अजूहवत् । अजुहावत् । लोपः पिबतेरीच्चाभ्यासस्य । पिबतेरुपधाया लोपः
स्या । ह्रस्य ईदंतादेशश्चङ्परे णौ । अपीप्यत् । अर्तिह्रीति पुक् । अर्पयति । ह्रेपयति । व्लेपयति । रेपयति ।
य्लोपः । क्नोपयति । क्ष्मापयति । स्थापयति । । तिष्ठतेरित् । उपधाया इदादेशः स्यात् चङ्परे णौ । अति
ष्ठिपत् । जिघ्रतेर्वा । अजिघ्रिपत् । अजिघ्रपत् । उर्ऋत् । अचीकृतत् । अचिकीर्तत् । अववर्तत् ।
अवीवृतत् । अमीमृजत् । अममार्जत् । पातेर्णौ लुग्वक्तव्यः । लुकोपवादः । पालयति । वोवीः

तोऽगुणः ॥ ओठौ क्ष्यते । तो त्रौ क्ष्यते ॥ ॥ इति यङन्तप्रक्रिया ॥ ॥ यङो विवा । यङो शिप्रत्यये लुक् स्या
द्वकारान्तं विना पि बहुलं लुक् स्यात् । अनेन निमित्तिकोयं अंतरंगत्वादादेशो भवति । ततः प्रत्यय
लक्षणेन यङन्तत्वाद्द्वित्वं । अभ्यासकार्यं । ध्यातृत्वाद्दत्र जादयः । शोभात्कर्तृगामिति परस्मैपदं ।
अनुदात्तङित इति तु न । ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणप्रवृत्तेः । य
त्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत् । अत एव सुदृषत्प्रासादस्त्यत्रालसं
तस्येति दीर्घो न । येपि स्पर्द्धधाञादयोऽनुदात्तङितस्तेभ्योपि न । अनुदात्तङित इत्यनुबंध
निर्देशात् । तत्र च स्मिपाधापेति निषेधात् । अत एव अयम्नादयो न । गणेन निर्देशात् । वि

तुशब्दे वा वर्करीतं वेत्यदादौ पाठाच्छपो लुक्। यङो वा। यङन्तात्परस्य हलादेः पितः सार्व
धातुकस्येड्वा स्यात्। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। बोभूतु तेतिक्ते
इति छन्दसि निपातनात्। अत एव यङ्लुक् भाषायामपि सिद्धः। न च यङ्लुकि ऽप्राप्त ए
व गुणाभावो निपात्यतामिति वाच्यं। प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात्। द्विःप्रयोगो
द्विर्वचनं षाष्ठमिति सिद्धान्तात्। बोभवीति। बोभोति। बोभूतः। बोभुवति। बोभवांचकार। बो
भविता। अबोभवीत्। अबोभोत्। अबोभूतां। अबोभवुः। बोभूयात्। बोभूयातां। बोभूया
स्तां। गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्।

ऽपबोभोत्। ऽपबोभूतां। ऽपभ्यस्तां। श्रयोऽनुस्य। नित्यत्वाद्गुक्। ऽपबोभूवुः। ऽपबोभविष्यदित्यादि।
पास्यद्दीति। पास्यद्धि। पास्यद्ध्वः। पास्यद्दति। पाश्चसि। कुरुश्च्योहेर्द्धिः। पास्यद्धि। लङ्। ऽपपास्य
द्धः। ऽपपास्यद्दे। सिपि। दश्चेति रुत्वपक्षे रोरि। ऽपपास्याः। जागाद्धि। जागासि। ऽपजाघात्। सि
पि रुत्वपक्षे। ऽपजाघाः। नाध्व। नानाति। नानात्तः। दध्यादाद्धि। दादद्धः। दाधसि। ऽपदाधत्। ऽप
दादद्धां। ऽपदादधुः। ऽपदाधः। ऽपदाधत्। लुङि। ऽपदादाधीत्। ऽपदादधीत्। बोस्कुदीति। बोस्कु
त्ति। ऽपबोस्कुन्। ऽपबोस्कुतां। ऽपबोस्कुदुः। मोमुदीति। मोमोत्ति। मोमोदां वकारात्। मोमोदिता। ऽप
मोमुदीत्। ऽपमोमोत्। ऽपमोमुत्तां। ऽपमोमुदुः। ऽपमोमुदीः। ऽपमोमोः। ऽपमोमोत्। लुङि।

सि०कौ०उ०ति०
१३०

णः ॥ -अमोमोदात् ॥ चोकर्त्ति ॥ चोकूर्दीति ॥ नर्दू ॥ ति प्राः अचोकूर्त्त ॥ सिप्त पक्षे ॥ -अचोकः ॥ अ
चोकूः ॥ -अजो गः ॥ वनीवंचीति ॥ वनीवंक्ति ॥ वनीवक्तः ॥ वनीवचति ॥ -अवनीवंचीत् ॥ -अवनीवन् ॥
जंगमीति ॥ जंगंति ॥ -अनुदात्तोपदेशेत्यनुनासिकलोपः ॥ जंगतः ॥ जंग्मति ॥ म्वोश्च ॥ जंगन्मि ॥ जं
गन्वः ॥ एकाज्ग्रहणात्कृत्वान्नेति निषेधः ॥ जंगमिता ॥ -अनुनासिकलोपस्याभीयत्वेनासि
द्धत्वान्न हेर्लुक् ॥ जंगहि ॥ मो नो धातोः ॥ -अजंगन् ॥ -अनुबंधनिर्देशान्न ढ्रेरङ् ॥ ल्यंतेति न
वृद्धिः ॥ -अजंगमीत् ॥ -अजंगमिष्टां ॥ हन्तेर्यङ्लुकि ॥ -अभ्यासाच्चेति कुत्वं ॥ घपचि हो हन्तेरित्य
तो हन्तेरित्यनुवर्त्य विहितं तत्पापि यङ्लुकि भवत्येवेति न्यासकारः ॥ क्रिपाशपेति निषे

राम
१३०

स्य नित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः। जंघनीति। जंघंति। जं
घतः। जंघ्नति। जंघनिता। श्तिपा निर्देशाज्ज्ञादेशो न। जंघहि। अजंघनीत्। अजंघन्। जंघ
न्यात्। आशिषि तु वध्यात्। अवधीत्। अवधिष्टाम् इत्यादि। वधादेशस्य द्वित्वं तु न भव
ति। स्थानिवत्त्वे नाभ्यासस्येति निषेधात्। तद्धि समानाधिकरणं ध्यातो विशेषणं। बहु
व्रीहिवत्त्वात्। आङ्पूर्वात्तु आङो यमहन इत्यात्मनेपदं। आजंघते इत्यादि। उत्तरस्येति त
परत्वान्न गुणः। हलि च विति दीर्घस्तु स्यादेव। नस्याल्लिङ्गत्वे न तपरत्व निवर्त्यत्वायोगात्। व
र्वृति। वंवर्त्तिः। वंवुरति। अवंवुरात्। अवंवुः। वंरवनीति। वंरवंति। जन सने त्यात्वं। वंरवानः।

गमहनेत्युपधालोपः। चंखन्ति। चंखाहि। चंखनाति। अचंखनीत्। अचंखन्। अचंखाताम्।
अचंखनुः। ये विभाषा। चंखायात्। चंखन्यात्। अचंखनीत्। अचंखानीत्। हतो वृद्धिरित्य
त्र नाभ्यस्तस्येत्यनुवृत्तेर्हतो वृद्धिर्न। योयोति। योयवीति। अयोयवीत्। अयोयोत्। योयु
यात्। आशिषि दीर्घः। योयूयात्। अयोयावीत्। नोनवीति। नोनोति। जाहेति। जाहाति। ईह
ल्यघोः। जाहीतः। इहजहातेश्च। आ च हौ। लोपो यि। घुमास्था। एर्लिङीत्येते पंचापि न भवंति।
श्तिपा निर्देशात्। जाहति। जाहासि। जाहेषि। जाहीथः। जाहाहि। अजाहेत्। अजाहात्। अजा
हीताम्। अजाहुः। जाहायात्। आशिषि। जाहायात्। अजाहासीत्। अजाहासिष्टां। अजाहिष्यत्।

लुकाल्लुप्ते प्रत्ययलक्षणाभावात्स्वपिस्यमीत्युत्वं न। रुदादिभ्य इति गणनिर्दिष्टत्वादिडेन।
सास्वपीति। सास्वप्ति। सास्वपति। असास्वपीत्। असास्वप्। सास्वप्यात्। आशिषि तु। वावि
स्वपीत्युत्वं। सासुप्यात्। असास्वापीत्। असास्वपीत्। रुग्रिकौ च लुकि। ऋदुपधस्य धातो
रभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युर्यङ्लुकि। ऋतश्च। ऋदंतधातोरपि तथा। वर्व
र्तीति। वरिवृतीति। वरीवृतीति। वर्वर्त्ति। वरिवर्त्ति। वरीवर्त्ति। वर्वृतः। ३। वर्वृतति। ३। वर्वर्त्तामा
सा। वर्वर्त्तिता। ३। गणनिर्दिष्टत्वान्न वृद्भ्यश्चतुर्भ्य इति न। वर्वर्त्तिष्यति। ३। अवर्वर्तीत्। ३। अ
वर्वर्त्। ३। सिपि। दश्चेति रुत्वपक्षे रो रि। अवर्वाः। ३। गणनिर्दिष्टत्वादङ्। अवर्वर्त्तीत्। ३। अव

करोति। ३। वर्कर्ति। वरिकर्ति। वरीकर्ति। वर्कृतः। ३। वक्रति। ३। वर्करांचकार। ३। वर्करिता। ३।
ऽवर्करीत्। ३। ऽवर्कः। ३। वर्कृयात्। ३। आशिषि रिङ्। वर्क्रियात्। ३। ऽवर्कारीत्। ३। स्मृत
श्चेति तपरत्वान्नेह। कॄ विक्षेपे। चाकर्ति। तातर्ति। तातीर्त्तः। तातिरति। तातीर्हि। तातराणि।
ऽतातरीत्। ऽतातः। ऽतातीर्त्ताम्। ऽतातरुः। ऽतातारीत्। ऽतातारिष्टामित्यादि। ऽस्तेर्य
ङ्लुकि द्वित्वे ऽभ्यासस्योरदत्वं रपरत्वं हलादिःशेषः। रुक्। रिग्रीकौ स्तु ऽभ्यासस्यासवर्णे
इतियङ्। ऽयर्ति। ऽरियर्ति। ऽररीति। ऽरियरीति। ऽरर्तः। ऽरियृतः। ऋ। ऽरत्। यण्।
रुको रोराति लोपः। न च तस्मिन्कर्तव्ये यणः स्थानिवत्वं। पूर्वत्रासिद्धे तन्निषेधात्। ऽरा

रति। ऽपरियति। णेर्ङि। क्ङिपा निर्देशात् गुणो नीति गुणो न। रिङ्। रलोपः। दीर्घः। ऽपारिया
त्। ऽपरिध्रियात्। ऽपरिद्रियात्। गृहू ग्रहणे। जर्गर्हीति। जर्गर्ढि। ढ़ा। जर्गृढः। ढ़ा। जर्गृहति।
ढ़ा। ऽजर्घर्ट्। ढ़। ग्लहेर्लत्वे तु। जाग्रहीति। जाग्राढि। तस्माद्धोर्ङि निमित्तं संप्रसारणं। तस्य बहि
रंगेनासिद्धत्वात् न रुगादयः। जाग्रढः। जाग्रहति। जाग्रहीषि। जाग्रक्षि। ऽजुग्रट्। जाग्रहिता।
ग्रहेर्लिटीति दीर्घस्तु न। तत्रैकाच इत्यनुवृत्तेः। माधवस्तु दीर्घमाह। तत्र व्यादि विरुद्धं।
जर्गृधीति। ढ़। जर्गर्द्धि। ढ़। जर्गृद्धः। जर्गृधति। ढ़। जर्गृधीषि। जर्घर्त्सि। ऽजर्गृधीत्। ईङ्मा
वे। गुणः। हल्ङ्यादिलोपः। भष्भावः। जस्त्वचर्त्वे। ऽजर्घर्त्। ढ़। ऽजर्गृद्धाः। सिपि। दश्चेति प

ह्वेरुत्वं। अजर्घाः। घ्रा। अजर्गध्रीत्। घ्रा। अजर्गर्धिष्ट। पा० प्रश्वीति। पा० प्रष्टि। तस्माद्दोऽग्रहिज्येति सं
प्रसारणं न भवति। क्तिपा निर्देशात्। छ्वोः शूडिति शः। प्राप्रश्नः। पाप्रष्टि। पाप्रश्मि। पाप्र
श्नः। पाप्रश्मः। यकारवकारांतानां तु ऊठ्भाविनां यङ्लुङ् नास्तीति छ्वोरिति सूत्रे भाष्ये ध्वनि
तं। कैयटेन स्पष्टीकृतं। ददृश्च्छ्वोरितियत्रो दूतद्विषयकोऽध्वरत्वदेत्यूठ्भाविनोः स्त्रिवि
मव्योस्तु यङ्लुगस्त्येवेति न्याय्यं। माधवादिसंमतं च। मव्य बंधने। अयंयांतः ऊठ्भावी।
तेवृदे वृदेवने इत्यादयो वांताः। हय गतौ। जाहयीति। जाहति। जाहतः। जाहयति। जाहयीषि। राम
जाहसि। वलि लोपे यमादेर्दीर्घः। जाहामि। जाहावः। जाहामः। हर्य गतिकांत्योः। जाहयीति। १३३

जाहर्त्ति। जाहर्त्तः। जाहर्यति। जोढि। जाहर्हि। ऽजाहः। ऽजाहर्त्तं। ऽजाहर्युः। मव बंधने। ज्वरत्व
र स्त्रिव्य विमवामुपधाया। श्च ज्वरादीनामुपधावकारयोरूठ् स्यात् क्कौ झलादावनुनासिका
दौ च प्रत्यये। अत्र क्ङितीति नानुवर्त्तते। अवतेस्तु नित्वं तु दिति दर्शनात्। अनुनासिकग्रहणं वा
नुवर्त्तते। अवतर्मन् प्रत्यये तस्य टिलोपो ऽुमिति दर्शनात्। ई ऊ भावे ऊठि पितिगुणः। मामोति।
मामवीति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मा
मूहि। मामवानि। ऽमामोत्। ऽमामोः। ऽमामवं। ऽमामाव। ऽमामूम। मा तुवी हिंसायां। तोतू
वीति। रा स्तोपः। रेफात् परयोः स्लो लोपः स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। इति वलो

पः। जग्रूप ग्रगुणः। न धातुलोप आर्द्धधातुके। धात्वंशलोपनिमित्ते ऽर्द्धधातुके परे इको
गुणवृद्धी न स्तः। इति नेह निषेधः। तिबादीनामनार्द्धधातुकत्वात्। तोतोर्ति। हलिवेति दीर्घः।
तोतूर्तः। तोतूर्वति। तोथोर्ति। दोदोर्ति। दोध्योर्ति। मुर्छा। मोमोर्ति। मोमूर्तः। मोमूर्छतीत्यादि।
ऽर्द्धधातुक इति विषयसप्तमी। तेन यङि विवक्षिते ऽजेर्वी वेवीयते। अस्य यङ्लुक्
नास्ति। लुका ऽपहारे विषयत्वासंभवेन वीभावस्याप्रवृत्तेः॥ ॥इति यङ्लुगन्तप्रक्रि
या॥ ॥सुप आत्मनः क्यच्॥ इषिकर्मण एषितुः संबंधिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्य
यो वा स्यात्। धात्ववयवत्वात् सुब्लुक्। क्यचि च। अस्य ईः स्यात्। आत्मनः पुत्रमिच्छति पुत्री

यति। वांतो यि प्रत्यये। गव्यति। नाव्यति। लोपः शाकल्यस्येति तु न। अपदांतत्वात्। तथा
हि। नः क्ये। क्यचि क्यङि च नांतमेव पदं स्यान्नान्यत्। सन्निपातपरिभाषया क्यचो यस्य लो
पो न। गव्यां च कारः। गव्यिता। नाव्यां च कारः। नाव्यिता। लोपः। राजीयति। प्रत्ययोत्तरपदयो
श्च। त्वद्यति। मद्यति। एकार्थयोरित्येव। युष्मद्यति। अस्मद्यति। हलि च। गीर्यति। पूर्यति। धा
तोरित्येव। नेह। दिवमिच्छति दिव्यति। इहपुरमिच्छति पुर्यतीति मा भवेत्। क्तं प्रत्युदाहरणं वि
त्यं। हल्जिशेः साम्यात्। दीव्यतीति दीर्घस्तु प्रावः प्रामादिक एव। अदस्यति। दाङ्कृतः। कर्त्री
यति। क्यच्छ्वो श्वा। गार्गीयति। वाच्यति। अकृत्सार्वधातुकयोर्दीर्घः। कवीयति। समिध्यति। क्यस्य विभा

वा। हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्द्धधातुके। आदेः परस्य। अतो लोपः। तस्य स्था
निवत्वाल्लघूपधगुणो न। समिधिता। समिध्यिता। मांतप्रकृतिकसुबंतादव्ययाच्च क्य
च्न। किमिच्छति। इदमिच्छति। स्वरिच्छति। अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु।
क्यजंता निपात्यंते। अशनायति। उदन्यति। धनायति। बुभुक्षादौ किं। अशनीयति। उ
दकीयति। धनीयति। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। एषां क्यचि असुगाग
मः स्यात्। अश्ववृषयोर्मैथुनेच्छायां। अश्वस्यति वडवा। वृषस्यति गौः। क्षीरलवणयो
र्लालसायां। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः। सर्वप्रातिपदिकात्क्यचि लालसायां।

सुगस्तु कौ। दधिस्यति। दध्यस्यति। मधुस्यति। मध्वस्यति। काम्यश्चाऽऽत्मविषये काम्यश्च
स्यात्। पुत्रमात्मन इच्छति पुत्रकाम्यति। पुत्रकाम्यिता। इदं यस्य इच्छति लोपो नाऽनर्थ
कत्वात्। यस्येति संघातग्रहणमित्युक्तं। यशस्काम्यति। सर्पिष्काम्यति। मांताव्ययेभ्योऽप्य
यं स्यादेव। किं काम्यति। स्वः काम्यति। उपमानादाचारे। उपमानात्कर्मणः सुबंतादाचारेऽर्थे
क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रं। विष्णूयति द्विजं। अधिकरणाच्चेति वक्तव्यं।
प्रासादीयति कुट्यां। कुटीयति प्रासादे। कर्तुः क्यङ् सलोपश्च। उपमानात्कर्तुः सुबंतादा
चारे क्यङ् स्यात्। सांतस्य तु कर्तृवाचकस्य लोपो वा स्यात्। क्यङ्ङे सुस्तेः पक्षे वा क्यं। सांतस्य

सोपस्तु क्यङ्सन्नियोगशिष्टः । स व्यवस्थितः । उक्तं सोऽप्सरसो नित्यमितरेषां विभाष-
या । हंस इवाचरति हंसायते । उक्तः शब्दो वृत्तिविषये तद्वति । उजायते । अप्सरायते । यशा-
यते । यशस्यते । विद्वायते । विद्वस्यते । त्वद्यते । मद्यते । अनेकार्थत्वे तु युष्मद्यते । अस्मद्य-
ते । क्यङ्मानिनोश्च । कुमारीवाचरति । कुमारायते । हरिणीवाचरति हरिणायते । गुर्वीव गु-
रूयते । सपत्नीव सपत्नायते । सपतीयते । सपत्नीयते । युवतिरिव युवायते । पट्वीमृद्व्या-
विव पट्वीमृदूयते । न कोपधायाः । पाचिकायते । आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वा-
यहल्णत्वकाड़धि । अवगल्भादयः फ्वापजंताः । क्विसंनियोगे नानुदात्तत्वमनुनासिकत्वं

वाद् प्रत्ययस्य प्रतिज्ञायते सेन तङ्। अवगच्छते। ज्ञीबते। हेडते। न्तपूर्वादप्यनेकाच्
आम्। एतद्वार्त्तिकारंभसामर्थ्यात्। नवावगच्छते इत्यादिसिद्धिस्तत्फलं। केवलानामेवावा
देषिद्वन्ति संभवात्। धातूनामनेकार्थत्वात्। अवगच्छांचक्रे। ज्ञीबांचक्रे। हेडांचक्रे। वार्त्तिके
वेत्सुपसर्गविशिष्टपाठात्केवलाद्दुपसर्गान्तरविशिष्टाद्वचपदे वेति माधवादयः। तद्गृंति लू
वितं। सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः। पूर्ववार्त्तिकं तु अनुबंधासंगार्थं तत्र क्विबन्तपते।
प्रातिपदिकग्रहणादिह सुप इति न संबध्यते। तेन पदकार्यं न। कृष्ण इवाचरति कृष्णति। स्वतो
गुण इति स्वपासहपरस्पं। अश्ववदाचरति अश्वति। अतः। अंति। प्रत्ययग्रहणमपनीय अने

कावदस्तु तेनाम्भ्रा । अत्तुः । उः । द्वित्वं । अतो गुणे । अत आदे इति दीर्घः । एरनेकाचो । वृद्धिः । अ
तु साहित्यत्वातो लोप इटि चेत्यालोपः । माभेवावरति माभाति । लिंगविशिष्टपरिभाषया ए
कादेशस्य पर्वांतत्वाद्वावृद्धिः । माभानावकारात् । वृद्धिः । अमाभात् । अत्र ह्रस्वादिलोपो नाउः । सा
ह्रवर्याद्वापोपि स्यादेवलोपविधानात् । ह्रस्वको । अमाभासीत् । कविरिवाकवयति । आशीर्लि
ङि । कवीयात् । सिवि वृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नाम
धातोर्न वृद्धिरिति केयटादयः । अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति । अकवा
यीत् । श्रिरिवाश्रयति । विवाया विव्यतुः । अवयीत् । अवायीत् । श्रीरिव । श्रयति । श्रि श्राय । श्रि

स्वियतुः । पितेव । पितर इति । ऽसाक्षिवि । इङः । वित्रियात् । भूरिवा । भवति । ऽअत्र गातिस्थेति सु
वोधुरिति भवते र इति वन भवति । ऽपाश्रियमक्तत्वेन धातुपाठस्थस्यैव तन्त्रग्रहणं तत् । ऽअ
भावी त्वात्सु भाव । इडुरिवाऽवति । ए शीति वङ्कः । ऽअडावीत् । ऽअनुनासिकस्य क्विझलोः
क्ङितीति । ऽअनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङितीति । इदमिवावरति इदम
ति । राजेव । राजानति । पंथा इव । पथीनति । मथीनति । सुभुक्षीणति । द्यौरिव देवतीति माध
वः । ऽअत्र झटिघवतीत्सुचितं । क इव । कति । वकावितिहरदत्तः । माधवस्तु णत्वोपावितिव
वनात्रणत्विवृद्धिं बाधित्वा तो लोपात्वक इति रूपमाह । स्व इव । सस्यौ । सस्व । यत्तु स्वामा

सस्वांवकारेतितदनाकरमेवा।भ्रष्टशादिभ्योनुब्यवेलोपस्यहलः।ऽभूततद्भावविषये
भ्योभ्रष्टशादिभ्योभवत्यर्थेक्यङ् स्याद्धलंतानामेषांलोपश्च।ऽभ्रष्टशोभ्रष्टशोभवतिभ्रष्टशाय
ते।अच्वेरितिपर्युदासबलात्।ऽभूततद्भावइतिलब्धं।तेनेहन।कदिवाभ्रष्टशाभवंति।येराज्ञो
भ्रष्टशाः नक्ष आद्यः स्तेदिवांकभवंतीत्यर्थः।सुमनस्।ऽसस्यसलोपः।सुमनायते।बुराद्यै
संग्रामयुद्धइतिपठ्यतेतत्रसंग्रामेतिप्रातिपदिकं।तस्मात्तत्करोतीतिणिचुसिद्धः।तसंनि
योगेनानुबंधआसज्यते।युद्धेयोयंग्रामशब्दइत्युक्तेपिसामर्थ्यात्संग्रामशब्देलब्धेविशि राम
ष्टपाठोज्ञापयतिउपसर्गसमानाकारंपूर्वपदंधातुसंज्ञाप्रयोजकेप्रत्ययेविकीर्बिते १३८

पपक्रियते इति। तेन मनस्प्रष्टात्मागट्। स्वमनायते। उन्मनायते। उदमनायते। ए
वंवावा गअ्रतत्त्वागच्छिचेत्पादावप्य वेत्यस्य पपक्तूरणं बोध्यं। ज्ञापकं व सजातीय
विषयं। तेन यत्रोपसर्गस्वरूपं सकलं रूपते नत्वादेशेनापहृतं तत्रैव पपक्तृतिः। एवं व
ःसाम्रटः उदः। ईदवावर्य उपायित्वा। नत्र उन्मनाप्य अवगत्येति वन्नप्य प। ज्ञापक
स्य विशेषविषयत्वे षाष्ठवार्त्तिकं तज्ज्ञाप्यं व प्रमाणं। तथाहि। उस्योमाङ्क्ष्वाटः प्रतिषेधः।
उसि उमांङो स्वपरयोः आटः पररूपं नेत्यर्थः। उस्यामै उत् अस्त्री यतः अंकारीयतः अ
ढीयतः आटश्चेति वचनेन पुनर्वृद्धिविधानादिदं सिद्धमिति षष्ठे स्थितं। ओहितादिङा

ज्भ्यः क्यष् । लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात् । वा क्यषः । क्यषन्तात्परस्मैपदं वा स्यात् ।
लोहितायति । लोहितायते । अत्राच्वेरित्यनुवर्त्याभूततद्भावविषयत्वं ज्ञेयं । तच्च लोहितश-
ब्दस्यैव विशेषणं । न तु डाचोऽसंभवात् । नाप्यादिशब्दग्राह्याणां । तस्य प्रत्याख्यानात् । तथा
च वार्त्तिकं । लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति । न चैवं काम्यच्द्वक्यषोपि कका-
रः श्रूयेत । उच्चारणसामर्थ्यादिति वाच्यं । तस्यापि भाष्ये प्रत्याख्यानात् । पटपटायति । प-
टपटायते । कृभ्वस्तियोगं विनापीह डाच् । डाजन्तात् क्यषो विधानसामर्थ्यात् । यत्तु लोहि-
तश्यामदुःखानि हर्षगर्वसुखानि च । मूर्छा निद्रा कृपा धूमाः करुणा नित्यचर्मणी । इति

पट्टिश्यामादिभ्यो विकल्पविषयद्वयमुदाहरंति तत्राघ्य वार्त्तिकविरुद्धं। तस्मात्तेभ्यः कण्डे-
वाश्यामायते। दुःखायते। दुःखादयो वृत्तिविषयेत इति वर्त्तंते। लिंगविशिष्टपरिभाष-
या। लोहिनीशब्दादपि क्यष्। लोहिनीयति। लोहिनीयते। कष्टाय क्रमणे। चतुर्थ्यंतात्क-
ष्टशब्दादुत्साहेर्थे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते। पापं कर्त्तुमुत्सहत इत्यर्थः। सत्र
कक्षकष्टकृच्छ्रगहनेभ्यः कण्व विकीर्षायामिति वक्तव्यं। कण्वं पापं। सत्रादयो वृत्तिविष
ये पापार्थाः। तेभ्यो द्वितीयांतेभ्यः विकीर्षायां क्यङ्। पापं विकीर्षतीत्यस्वपदविग्रहः। सत्रा
यते। कक्षायत इत्यादि। कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः। रोमंथतपोभ्यां कर्मभ्यां

क्रमेण वर्त्तमानायां वरणे चार्थे क्यङ् स्यात्। रोमन्थं वर्त्तयति। रोमन्थायते। हनुचलन इति
वक्तव्यं। चर्वितस्य पुनश्चर्वणे इत्यर्थः। नेह। कीटो रोमन्थं वर्त्तयति। अपानप्रदेशा-
न्निःसृतं द्रव्यमिह रोमन्थः तद्वमतीत्यर्थः। इति कैयटः। वर्त्तुलं करोतीत्यर्थ इति न्यासका-
रहरदत्तौ। तपसः परस्मैपदं च। तपश्चरति। तपस्यति। बाष्पोष्मभ्यामुद्वमने। आभ्यां क-
र्मभ्यां क्यङ् स्यात्। बाष्पमुद्वमति बाष्पायते। ऊष्मायते। फेनाच्चेति वाच्यं। फेनायते। शब्द-
वैरकलहाभ्रकण्वमेघेभ्यः करणे। एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति
शब्दायते। पक्षे तत्करोतीति णिजपीष्यत इति न्यासः। शब्दयति। सुदिनदुर्दिननीहारे

भ्य स्वा सुदिनायते। सुखादिभ्यः कर्त्तृवेदनायां। सुखादिभ्यः कर्मभ्यो वेदनायामर्थेक्य
ङ् स्याद्वेदनाकर्त्तुर्देवचे सुखादानि स्युः। सुखं वेदयते सुखायते। कर्तृग्रहणं किं। परस्य
सुखं वेदयते। नमोवरिवश्चित्रङः क्यच्। करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्या
यामाश्चर्ये च। नमस्यति देवान्। पूजयतीत्यर्थः। वरिवस्यति गुरून् शुश्रूषत इत्यर्थः। वि
त्रीयते विस्मयत इत्यर्थः। विस्मापयत इत्यन्ये। पुच्छभांडचीवराण्णिङ्। पुच्छादुदसने व्यस
ने पर्यसने च। विविधं विरुद्धं वा क्षेपणं व्यसनं। उत्पुच्छयते। विपुच्छयते। परिपुच्छयते। भां
डात्समाचयने। संभांडयते। भांडानि समाचिनोति राशीकरोतीत्यर्थः। समवभांडत्त। ची

वरादर्जने परिधाने वा। संचीवरयते भिक्षुः। चीवराण्यर्जयति परिधत्ते वेत्यर्थः। मुण्डमिश्र
श्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्। मुण्डं करोति मुण्डयति। व्र
ताद्भोजने तन्निवृत्तौ च। पयः शूद्रान्नं वा व्रतयति। वस्त्रात् समाच्छादने। संवस्त्रयति। हल्या
दिभ्यो ग्रहणे। हलिकल्योरदन्तत्वं च निपात्यते। हलिं कलिं वा गृह्णाति। हलयति। कलयति।
महद्धलं हलिः। परत्वाद्वृद्धौ सत्यामपीष्टवद्भावेनागेव लुप्यते। अतः सन्वद्भावदीर्घौ न।
अजहलत्। अचकलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं के
शा इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यपरे। मुण्डादयः सत्यापेत्यत्रैव पठितुं युक्ताः।

प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योपि णिजर्थं। मुंडयति माण
वकं। मिश्रयत्यन्नं। श्लक्ष्णयति वस्त्रं। लवणयति व्यंजनमिति। इष्टवत्कज्ययोरित्वार्थं स
त्यस्य आपुगर्थं। केषांचित्तु अपंचार्थं सत्यं करोत्याचष्टे वा सत्यापयति। अर्थवेदयोर
प्यापुग्वक्तव्यः। अर्थापयति। वेदापयति। पाशं विमुंचति विपाशयति। रूपं पश्यति रूप
यति। वीणयोपगायति उपवीणयति। तूलेनानुकुष्णाति अनुतूलयति तूलेण ग्रंथं तूलेना
नुघट्टयतीत्यर्थः। श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभियाति अभिषेणयति। उप
सर्गात्सुनोतीति षः। अभ्यषेणयत्। प्राक्सितादिति षः। अभिषिषेणयिषति। लोमादिभ्या

सेनवेति षः । लोमान्यनुमार्ष्टि अनुलोमयति । त्वचसंवरणे । घः । त्वचं गृह्णाति त्व
चयति । वर्मणा संनह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते चूर्णय
ति । इष्ठवदित्यतिदेशात्पुंवद्भावादयः । एनीमाचष्टे एतयति । दरदमाचष्टे दारदयति । पृ
थुं प्रथयति । वदो सत्यां पूर्ववादिलोपः । अपिप्रथत् । अपप्रथत् । मृदुं म्रदयति । अ
मिम्रदत् । भृशं कृशं दृढं । भ्रशयति । क्रशयति । द्रढयति । अबभ्रशत् । अचक्रशत् । अ
ददृढत् । परिव्रढयति । पर्यवव्रढत् । कढिमाख्यत् । अजिढत् । ढत्वात् नाम सिद्धत्वात्
हतिशब्दस्य द्वित्वं । पूर्वत्रासिद्धीयमद्वित्वे इति त्वनित्यमित्युक्तेः । ढि इत्यस्य द्वित्वमित्य

न्ये। अड्ढित्। ऊढमाख्यत्। अजढत्। अड्ढत्। उः पुयण्जिति वर्गप्रत्याहारग्रहे लिंगा
द्भिन्त्वे कार्ये णववऽऽदेशो नेति ऊनयता युक्तो। प्रकृत्यैकाच्। वृद्धिपुगौ। स्वापयति। त्वां मां
वावष्टे त्वापयति। मापयति। मपर्यंतस्य त्वमौ। पररूपात्सर्वं नित्यत्वाट्टिलोपः। वृद्धिः।
पुक्। त्वादयति। मादयति। इति तु न्याय्यं। अंतरंगत्वात्पररूपे कृते प्रकृत्यैकाजिति प्रकृ
तिभावात्। न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यं। भाष्यस्य प्रेष्ठाद्युदाहर
णविशेषेऽन्यथा सिद्धिपरत्वात्। युवां मावां वा युष्मयति। अस्मयति। घानमावष्टेश्मा
वयति। नस्तद्धित इति टिलोपः। प्रकृतिभावस्तु न। येन नाप्राप्तिन्यायेन टेरित्यस्यैव बा

यक्तो हि सः। न त्वोऽस्य संप्रसारणं। अन्येतु नस्तद्धित इति नेहसिद्धिदृश्यते। इष्टनि तस्या
इष्टत्वात्। अल्लिष्ठ इत्यादौ परत्वादेरित्यस्यैव प्रवृत्तेः। तेन श्नुनयतीति रूपमाहुः॥ श्वयि
समावष्टे विश्वयति। अंगवृत्तपरिभाषया संप्रसारणं नेत्येके। संप्रसारणे पूर्वत्वा
वादेशेन विश्वयतीत्यन्ये। नित्यत्वाट्टिलोपात्प्राक् संप्रसारणं। अंतरंगत्वात्पूर्वरूपं टि
लोपः। विश्वयति इत्यपरे। उदंचमाचष्टे उदचयति। उदेचिवत्। प्रत्यंचं। प्रतीचयति। प्रत्य
चिचत्। समि इको सवर्णे इति प्रकृतिभावपक्षे प्रति अचिचत्। सम्यंचमाचष्टे समीच
यति। सम्यचिचत्। समि अचिचत्। तिर्यंचमाचष्टे तिराययति। अंचेष्टिलोपेनाप

सम्यं ब्रमावष्टे स्थापयति।२

ह्रादे पि बहिरंगत्वे नास्ति ह्रस्वा नित्य रत्तत्वि हिः। अस्तिद्रवद्रत्रेति वित्रोत्युक्तन्यायेन प्रमथ
हितोपो ऽस्तिह्रः। अतः पुनः ष्टितोपोनः। अंगवृत्तपरिभाषया वा। वडिः। अड्डोपित्वादुपधाह्र
दा स्वोनः। अतितिथिन्। अससस्थापयत्। विषध्यं ब्रमावष्टे। अविविषद्रायत्। देवध्यं वां। अदिदेवद्रा
श्वद्रापयति यत्। अदध्यं वां। आददद्रापयत्। अदमुयध्वं। अदमुध्मापयति। अददमुध्मापयत्। अमुमुयध्वं। अ
मुमुध्मापयति। वङ्। आमुमुमुध्मापयत्। भुवं। भावयति। अबीभवत्। भुवं। अबुभवत्। श्रि
यं। अशिश्रयत्। गां। अजूगवत्। रायं। अरारयत्। नावं। अनूनवत्। स्वप्नं। स्वापयत्। स्वः
स्वयति। अससस्वत्। असिस्वत्। बहून्। भावयति। बहयतीत्यन्ये। स्त्रग्विणं। स्त्रजयति। संज्ञा

पूर्वकत्वान्न वृद्धिः। श्रीमतीं श्रीमंतं वाऽऽचष्टे श्राययति। पयस्विनीं। पयसयति। दृढ्। टिलो
पो नातदपवादस्य उकः। अवदत्वात्। स्थूलं। स्थवयति। दूरं। दवयति। कथं तर्हि दूरयत्य
वनते विवस्वतीति। दूरमततिऽऽचयते वा दूरात्। दूरांतं कुर्वतीत्यर्थः। युवानं। यवयति। कनय
ति। युवाल्पयोरिति वा कन्। ऽऽन्तिकं। नेदयति। बाढं। साध्ययति। प्रशस्यं। प्रशस्ययति। ह्र
स्वो नाऽपसर्गस्य प्रकृतौ। वृद्धं। ज्यापयति। वर्षयति। प्रियं। प्रापयति। स्थिरं। स्थाप
यति। स्फिरं। स्फापयति। उरुं। वरयति। वारयति। बहुलं। बंहयति। गुरुं। गरयति। तृप्रं। त्र
पयति। दीर्घं। द्राघयति। वृंदारकं। वृंदयति॥ ॥इति नामधातुप्रक्रिया॥ ॥

कंड्वादिभ्यो यक्। एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे। धातुभ्यः किं। प्रातिपदिकेभ्यो मा भू-
त्। द्विधा हि कंड्वादयः। धातवः प्रातिपदिकानि च। कंडूञ् गात्रविघर्षणे। कंडूयति। कंडूय-
ते। मंतु अपराधे। रोष इत्येके। मंतूयति। वंद्रस्तु भितमाहा। मंतूयते। वल्गु पूजामाधुर्य-
योः। वल्गूयति। असु उपतापे। असू। असूञ् इत्येके। असूयति। असूयति। असूयते। ले-
ट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च। दीप्तावित्येके। लेट्यति। लोट्यति। लेटिता। लेलादीसो। इर-
स् इरज् इरञ् ईर्ष्यायां। इरस्यति। इरज्यति। हलि चेति दीर्घः। ईर्यति। ईर्यते। उषस् प्रभाती-
भावे। वेद धौर्त्ये स्वप्ने च। मेधा आशुग्रहणे। मेधायति। कुषुभ क्षेपे। कुषुभ्यति। मगधप

रिवेष्टने।नीवदास्य इत्यन्ये।तंतस् पंपस् दुःखे।सुख दुःख तत्क्रियायां।सुख्यति।दुःख्य
ति।सुखं दुःखं वानुभवतीत्यर्थः।सपर पूजायां।अरर आराकर्मणि।भिषज् चिकित्सायां।
भिष्णज् उपसेवायां।इषुध शरधारणे।वरण वरणे गतौ।चुरण चौर्ये।तुरण त्वरायां।भु
रण धारणपोषणयोः।गद्गद वाक्स्खलने।एला केला खेला विलासे।इलेत्यन्ये।लेखा स्ख
लने वा।अदंतोयमित्यन्ये।लेख्यति।लिट अल्पकुत्सनयोः।लिट्यति।लाट जीवने।हृणीङ्
रोषणे लज्जायां च।महीङ् पूजायां।महीयते।पूजां लभत इत्यर्थः।रेखा श्लाघासादनयोः।द्र
वस् परितापपरिचरणयोः।तिरस् अंतर्द्धौ।अगद नीरोगत्वे।उरस् बलार्थे।उरस्यति।

बंजवान्भवतीत्यर्थः। नरणगतौ। पपस्त्प्रस्तौ। संभ्रस्पस्त्प्रभ्रत भावे। अंबरसंबरसं
भरणे। आलुतिगणोयं॥ ॥इति कंड्वादयः॥ ॥कंडूयतेः सन्। सन्यङोर्द्वितिप्रथमस्यैका
चो द्वित्वे प्राप्ते। कंड्वादेस्तृतीयस्येति वाच्यं। कंडूयियिषति। कयजं ता सन्। यथेष्टं नामधा
तुषु। आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः। अजादेस्त्वाद्यतरस्य। पुपुत्रीयिष
ति। पुतित्रीयिषति। पुत्रीयियिषति। अशिश्वीयिषति। अश्वीयियिषति। नदराणां संयु
क्तानामवः परस्यैव द्वित्वनिषेधः। इंद्रीयतेः सन्। द्रीश्च यिशश्चयोरन्यतरस्य द्वित्वं। इंदि
द्रीयिषति। बिबंद्रीयिषति। बन्दिद्रीयिषति। बंद्रीयियिषति। प्रियमाख्यातुमावश्यकाणां दे

रयितुं वेक्ष्यति। विश्रापयिषति। श्रापिपयिषति। श्रापयियिषति। ऊर्णु। विवारयिषति। वारि
रयिषति। वारयियिषति। बाढं। क्लिशा ध्ययिषति इत्यादि रूपत्रयं। षत्वं तु नास्ति। यङ्लुकि सन्
एयं तासन्॥ बोभूयियिषति। यङ्लुकि णिच्। सनन्तात् णिच्। बोभूययिषयति॥ ॥इति प्रत्य
यमाला। अनुदात्तङित आत्मनेपदं। आस्ते। शेते। भावकर्मणोः। बभूवे। अनुबभूवे। क
र्तरि कर्मव्यतिहारे। क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अन्यस्य यो
ग्यं लवनं करोतीत्यर्थः। श्नसोरल्लोपः। व्यतिस्ते। व्यतिषाते। व्यतिषते। तासस्त्योर्लोपः।
व्यतिसे। धि च। व्यतिध्वे। हएति। व्यतिहे। व्यत्यसे। व्यत्यासाते। व्यतिषीत। व्यतिराते। ऊ। व्य

ति भाते। लू। व्यतिलुने। न गतिहिंसार्थेभ्यः। व्यतिगच्छंति। व्यतिघ्नंति। प्रतिषेधे हसादी
नामुपसंख्यानं। हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसंति। व्यतिजल्पंति। हरतेर
प्रतिषेधः। संप्रहरंते राजानः। इतरेतरान्योन्योपपदाच्च। परस्परोपपदाच्चेति वक्तव्यं।
इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनंति। नेर्विशः। निविशते। परिव्यवेभ्यः
क्रियः। अकर्त्रभिप्रायार्थमिदं। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। विपराभ्यां जेः।
विजयते। पराजयते। आङो दोनास्यविहरणे। आङ्पूर्वो ददाति मुखविकासनादन्यत्रा
र्थे वर्तमान आत्मनेपदं स्यात्। विद्यामादत्ते। अनास्येति किं। मुखं व्याददाति। आस्यग्र

हरणमविवक्षितं। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदीकूलं व्याददातीति प
रांगकर्मकान्निषेधः। व्याददते पिपीलिकाः पतंगस्य मुखं। क्रीडोऽनुसंपरिभ्यश्च। आङ
ङः। अनुक्रीडते। संक्रीडते। परिक्रीडते। आक्रीडते। अनोः कर्मप्रवचनीयान्नात्पस
र्गेण समासाहचर्यात्। माणवकमनुक्रीडति। तेन सहेत्यर्थः। तृतीयार्थे इत्यनोः कर्म
प्रवचनीयत्वं। समोऽकूजने। संक्रीडते। कूजने तु। संक्रीडति चक्रं। आगमेः क्षमायां। एवं
तस्येदं यद्ग्रहणं। आगमयस्व तावत्। मा त्वरिष्ठा इत्यर्थः। शिक्षेर्जिज्ञासायां। धनुषि शि
क्षते। धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। आशिषि नाथः। आशिष्येवेति नि

यमार्थं वार्त्तिके मित्युक्तं। सर्पिषो नाथते। सर्पिर्मे स्यादित्याशास्त इत्यर्थः। कथं नाथसे कि
मुपतिं न भूभृतामिति। नाधसइति पाठः। हरतेर्गतताच्छील्ये। गतं प्रकारः। पैतृकमश्वा
अनुहरंते। मातृकं गावः। पितुर्मातुश्चागतं प्रकारं सततं परिशीलयन्तीत्यर्थः। ताच्छील्ये
किं। मातुरनुहरति। किरते हर्षजीविकाकुलायकरणेष्विति वाच्यं। हर्षादयो विषयाः। तत्र हर्षो
विक्षेपस्य कारणं। इतरे फले। अपाच्चतुष्पाच्छकुनिष्वालेखने। अपात्किरतेः सुट् स्यात्।
सुडपि हर्षादिष्वेव वक्तव्यः। अपस्किरते वृषो हृष्टः। कुक्कुटो भक्षार्थी। श्वा आश्रयार्थी वा
हर्षादिष्विति किं। अपकिरति कुसुमं। इह तु सुटो न। हर्षादिमात्रविवक्षायां यदपि तद्

आघ्नस्तथापि सुडभावे नेष्यत इत्याहुः। गन्धोपक्षेप इति। आङि नुप्रच्छ्योः। आनुते। आपृच्छते। श
प उपालंभे। आक्रोशार्थात्स्वरितेतोऽकर्तृकेपि फले शपथरूपेर्थे आत्मनेपदं वक्तव्यमित्य
र्थः। कृष्णाय शपते। समवप्रविभ्यः स्थः। संतिष्ठते। स्थाघ्वोरिच्च। समस्थित। समस्थिषातां। अ
वतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः प्रतिज्ञायामुपसंख्यानं। शब्दं नित्यमातिष्ठते। नित्यत्वे
न प्रतिजानीत इत्यर्थः। प्रकाशनस्थेयाख्ययोश्च। गोपी कृष्णाय तिष्ठते। आशयं प्रकाशयती
त्यर्थः। संशय्य कर्णादिषु तिष्ठते यः। कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः। उदोनूर्ध्वकर्मणि। मु
क्तावुत्तिष्ठते। अनूर्ध्वेति किं। पीठादुत्तिष्ठति। ईहायामेव। नेह। ग्रामाच्छतमुत्तिष्ठति। उपान्मंत्र

त्रकरणे। आग्नेय्याग्नीध्रमुपतिष्ठते। मंत्रकरणे किं। भर्त्तारमुपतिष्ठति यौवनेनात्र पादे
वपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यं। आदित्यमुपतिष्ठते। कथं तर्हि स्तुत्यं
स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति। देवतात्वारोपात्। नृपस्य देवतां मत्वा वा। गंगा
यमुनामुपतिष्ठते। उपश्लिष्यतीत्यर्थः। रथिकानुपतिष्ठते। मित्रीकरोतीत्यर्थः। पंथाः
स्रुघ्नमुपतिष्ठते। उपतिष्ठति वा। लिप्सयोपगच्छतीत्यर्थः। अकर्मकाच्च। उपात्तिष्ठतेरकर्म
कादात्मनेपदं स्यात्। भोजनकाले उपतिष्ठते। सन्निहितो भवतीत्यर्थः। उद्विभ्यां तपः। अक
र्मकादित्येव। उत्तपते। वितपते। दीप्यत इत्यर्थः। स्वांगकर्मकाच्चेति वक्तव्यं। स्वमंगं स्वांगं। नतु

वा लिप्सायामिति वक्तव्यं। भिक्षुकः प्रभुमुपतिष्ठते। २

द्रवमिति परिभाषितं। उत्तपते वितपते पाणिं। नेह। सुवर्णमुत्तपति। संतापयति विला
पयति वेत्यर्थः। चैत्रो मैत्रस्य पाणिमुत्तपति। संतापयतीत्यर्थः। आङो यमहनः। आयच्छते।
आहते। अकर्मकात्स्वांगकर्मकादित्येव। नेह। परस्य शिरः आहंति। कथं। आजघ्ने विष
मविलोचनस्य वक्ष इति भारविः। आहध्वमा रघूत्तममिति भट्टिश्च प्रमाद एवायमिति
भागवृत्तिः। आप्येत्यध्याहारो वा। ल्यब्लोपे पंचमीति तु ल्यबंतं विनैव तदर्थावगतिर्यत्र
तद्विषयं। प्रेतुमित्यादि तुमुन्नंताध्याहारे वास्तु। समीपमेत्येति वा। आत्मनेपदेष्वन्य
तरस्यां। हनो वध आदेशो वा। लुङि। आवधिष्ट। आवधिषातां। हनः सिच्। कित्स्यात्। समु

नासिकलोपः।ऽआहत।ऽआहसातां।ऽआहसत।यमो गंधने।सिच्किस्यात्।गंधनं सूचनं
परदोषाविष्करणं।उदायत।गंधने किं।उदायंस्त पादं।ऽआकृष्टवानित्यर्थः।समो गम्यृ
च्छिभ्यां।ऽअकर्मकाभ्यामित्येव।संगच्छते।वा गमः।गमः परौ झलादी लिङ्सिचौ वा कितौ
स्तः।संगंसीष्ट।संगसीष्ट।समगत।समगंस्त।समृच्छिष्यते।ऽअकर्मकाभ्यां किं।ग्रामं
संगच्छति।विदिप्रच्छिस्वरतीनामुपसंख्यानं।वेत्तेरेव ग्रहणं।संवित्ते।संविदाते।वेत्तेर्वि
भाषा।वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्।संविद्रते।संविदते।संपृच्छते।संस्वरते।
ऽअर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यं।ऽअर्त्तीति द्वयोर्ग्रहणं।ऽअङ्विध्यौ लियन्ते देवेस्तु तौ।मासम

ता। मासम्रषातां। मासम्रषतेति। समार्त्त। समार्षातां। समार्षतेति वभ्वादेः। इयर्तेस्तु मासम
रतां। मासमरेतां। मासमरंतेति। समारत। समारेतां। समारंतेति वा। संस्कृते। संपश्यते। अक
र्मकादित्येव। अतपत्वरश्मांसीति। तुगपि। संस्कृमहे इति। मुरादिप्रयोगः प्रामादिक इत्याहुः।
॥ उपाध्याहरेवा। इति कथपयश्च इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्म
तेति चेत्। स्मृत्या। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽक
र्मिका क्रिया। वहति भारं। नदी वहति। स्यंदतेरित्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा। मेघो व
र्षति। कर्मणोऽविवक्षातो यथा। हितान्नयः संस्कृते स किं प्रभुः। उपसर्गादस्यत्यूह्योर्वेति

वाच्ये। ऽअकर्मकादिति निवृत्तं। वंध्यं निरस्यति। निरस्यते। समूहति। समूहते। उपसर्गादू
स्यत्यूहतेः। यादोक्तिरिति। ब्रह्म समुह्यात्। ऽअग्निं समुह्य। नि समुपविभ्यो ह्वः। निह्वयते। स्प
र्द्धायामाङः। कृष्णश्चाणूरमाह्वयते। स्पर्द्धायां किं। पुत्रमाह्वयति। गंधनावक्षेपणसेवन
साहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। गंधनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सू
चनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। ऽअवक्षेपणं भर्त्सनं। श्येनो वर्त्तिकामुदाकुरुते। भर्त्स
यतीत्यर्थः। हरिमुपकुरुते। सेवत इत्यर्थः। परदारान्प्रकुरुते। तेषु सहसा प्रवर्त्तते। एधो
दकस्योपस्कुरुते। गुणमाधत्ते। गाथाः प्रकुरुते। प्रकथयति। शतं प्रकुरुते। धर्मार्थं वि

नियुंक्ते।एवंकिं।पदंकरोति।-अधेः प्रहसने। प्रहसनं क्षमाभिभवश्च। पहमर्षणेऽभिभ
वे चेति पाठान्तरम्।शत्रुमधिकुरुते।सहते इत्यर्थः।-अभिभवतीति वा।वेः शब्दकर्मणः।स्वरान्वि
कुरुते।उच्चारयतीत्यर्थः।शब्दः कर्मणः किं।चित्तं विकरोति कामः।-अकर्मकाच्च।वेः कृञ इत्ये
वा।छात्रा विकुर्वते।विकारं लभंते।संमाननोत्संजननाचार्यकरणज्ञानभृतिविगणनव्यये
षु नियः।-अत्रोत्संजनज्ञानविगणनव्ययाः नयतेर्वाच्याः।इतरे प्रयोगोपाधयः।तथाहि।शा
स्त्रे नयते।शास्त्रस्थं सिद्धांतं शिष्येभ्यः प्रापयतीत्यर्थः।तेन च शिष्यसंमाननं फलितं।उत्संज
नो दंडमुन्नयते।उत्क्षिपतीत्यर्थः।माणवकमुपनयते।विधिना-आत्मसमीपं प्रापयति।उप

नयनपूर्वकेणाध्यापनेन हि उपनेतरि॰ आचार्यत्वं क्रियते। ज्ञाने। तत्त्वं नयते। निश्चिनोतीत्यर्थः।
कर्मकरानुपनयते। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणनं। ऋणादेर्निर्यातनं। करं
विनयते। राज्ञे देयं भागं परिशोधयतीत्यर्थः। शतं विनयते। धर्मार्थं विनियुङ्क्त इत्यर्थः। कर्तृ
स्थे चाशरीरे कर्मणि। नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्या
त्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते। अपगमयति। तत्फलस्य चित्तप्र
सादस्य कर्तृगत्वात् स्वरितञित इत्येव सिद्धे नियमार्थमिदं। तेनेह न। गडुं विनयति। कथं त
र्हि। विगणय्य नयन्ति पौरुषमिति। कर्तृगामित्वाविवक्षायां भविष्यति। इति सर्गतापनेषु

क्रमः। वृत्तिरप्रतिबंधः। अस्य विक्रमते बुद्धिर्न प्रतिहन्यत इत्यर्थः। सर्ग उत्साहः। अध्ययनाय क्र
मते। उत्सहते। क्रमंतेऽस्मिन्शास्त्राणि। स्फीतानि भवंतीत्यर्थः। उपपराभ्यां। वृत्त्यादिष्वाभ्या
मेव क्रमेर्नत्वपसर्गांतरपूर्वात्। उपक्रमते। पराक्रमते। नेह। संक्रामति। आङ उद्गमने।
आक्रमते सूर्यः। उदयत इत्यर्थः। ज्योतिरुद्गमन इति वाच्यं। नेह। आक्रामति धूमो हर्म्य
तलात्। वेः पादविहरणे। साधु विक्रमते वाजी। पादविहरणे किं। विक्रामति संधिः। द्विधा
भवति स्फुटतीत्यर्थः। प्रोपाभ्यां समर्थाभ्यां। समर्थौ तुल्यार्थौ। शकंध्वादित्वात्पररू
पं। प्रारंभेऽनयोस्तुल्यार्थता। प्रक्रमते। उपक्रमते। समर्थाभ्यां किं। प्रक्रामति। गच्छती

त्यर्थः। उपक्रामति। आगच्छतीत्यर्थः। अनुपसर्गाद्वा। क्रामति। क्रमते। उप प्राप्तविभाषेयं।
वृत्त्यादिषु नित्यमेव। अपह्नवे ज्ञः। शतमपजानीते। अपजपतीत्यर्थः। अकर्मकाच्च। सर्पि
षो जानीते। सर्पिषा उपायेन प्रवर्त्तत इत्यर्थः। संप्रतिभ्यामनाध्याने। शतं संजानीते। अ
वेक्षत इत्यर्थः। शतं प्रतिजानीते। अंगीकरोतीत्यर्थः। अनाध्यान इति योगो विभज्यते।
तत्सामर्थ्यादकर्मकाच्चेति प्राप्तिर्निवार्यते। मातरं मातुर्वा संजानाति। कर्मणः शेषत्व
विवक्षायां षष्ठी। भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः। उपसंभाषोपमंत्रणे
धातोर्वाच्ये। इतरे प्रयोगोपाधयः। भासने वदते। भासमानो ब्रवीतीत्यर्थः। उपसंभाषोपसां

स्वनं। भृत्यानुपवदते। सांत्वयतीत्यर्थः। ज्ञाने। शास्त्रे वदते। यत्ने। क्षेत्रे वदते। विमतौ। क्षेत्रे
विवदंते। उपमंत्रणमुपछंदनं। उपवदते। प्रार्थयत इत्यर्थः। व्यक्तवाचां समुच्चारणे। मनुष्या
दीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्। संप्रवदंते ब्राह्मणाः। नेह। संप्रवदंति खगाः। अनो
रकर्मकात्। व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कला
पस्य। अकर्मकात्किं। उक्तमनुवदति। व्यक्तवाचां किं। अनुवदति वीणा। विभाषा विप्रलापे।
विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्। विप्रवदंते विप्रवदंति वा वैद्याः। अवाद्ग्रः।
अवगिरते। गृणातिस्त्ववपूर्वो न प्रयुज्यत एवेति भाष्यं। समः प्रतिज्ञाने। शब्दं नित्यं संगि

रते। प्रतीजानीत इत्यर्थः। प्रतिज्ञाने किं। संजिरति ग्रासं। उदश्चरः सकर्मकात्। धर्ममुच्च
रते। उल्लंघ्य गच्छतीत्यर्थः। सकर्मकात्किं। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः। समस्तृ
तीयायुक्तात्। रथेन संचरते। दाणश्च सा चेच्चतुर्थ्यर्थे। संपूर्वाद्दाणस्तृतीयांतेन युक्तादु
क्तं स्यात्तृतीया चेच्चतुर्थ्यर्थे। दास्याः संयच्छते। पूर्वसूत्रे सम इति षष्ठी। तेन सूत्रद्वयमि
दं व्यवहितेपि प्रवर्त्तते। रथेन समुदाचरते। दास्याः संप्रयच्छते। उपाद्यमः स्वकरणे। स्व
करणं स्वीकारः। भार्यामुपयच्छते। विभाषोपयमने। यमः सिच् किद्वा स्याद्विवाहे। रामः
सीतामुपायत। उपायंस्त वा। उदवोढेत्यर्थः। गंधनांगे उपयमे तु पूर्वविप्रतिषेधा

न्नित्यं कित्वं। ज्ञाश्रुस्मृदृशां सनः। सन्नंतानामेषां प्राग्वत्। धर्मं जिज्ञासते। शुश्रूषते।
सुस्मूर्षते। दिदृक्षते। नानोर्ज्ञः। पुत्रमनुजिज्ञासति। पूर्ववत्सूत्रस्यैवायं निषेधः। अनंतरस्ये ने
ति न्यायात्। तेनेह न। सर्पिषोनुजिज्ञासते। सर्पिषा प्रवर्त्तितुमिच्छतीत्यर्थः। पूर्ववत्सन
इति तङ्। अकर्मकाच्चेति केवलाद्विधानात्। प्रत्याङ्भ्यां श्रुवः। आभ्यां सन्नंताच्छ्रुवस्तं
न स्यात्। प्रतिशुश्रूषति। आशुश्रूषति। कर्मप्रवचनीयात्स्यादेव। देवदत्तं प्रतिशुश्रू
षते। शदेः शितः। म्रियतेर्लुङ्लिङोश्च। व्याख्यातं। पूर्ववत्सनः। सनः पूर्वो यो धातुस्ते
न तुल्यं सन्नंतादप्यात्मनेपदं स्यात्। एदिधिषते। शिशयिषते। निविविक्षते। पूर्वव

त्सि। बुभुक्षति। आदेरित्यादिसूत्रद्वये सनो नेत्यनुवर्त्त्य वाक्यभेदेन व्याख्येयं। तेनेह न। शि
शासति। बुभूर्षति। ॥ आम्प्रत्ययवत्कृञोनुप्रयोगस्य। एधांचक्रे। प्रोपाभ्यां युजेरयज्ञपा
त्रेषु। प्रयुङ्क्ते। उपयुङ्क्ते। स्वराद्यन्तोपसर्गादिति वक्तव्यं। उद्युङ्क्ते। वियुङ्क्ते। ॥ अयज्ञपात्रेषु किं।
द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति। समः क्ष्णुवः। संक्ष्णुते शस्त्रं। भुजो नवने। उदनं भुङ्क्ते। ॥ अभ्य
वहरतीत्यर्थः। बुभुजे पृथिवीपालः पृथिवीमेव केवलां। वृद्धो जनो दुःखशतानि भुङ्क्ते।
इहोपभोगे भुजेरर्थः। ॥ अनवने किं। महीं भुनक्ति। णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने।
ण्यन्तादात्मनेपदं स्यात् अणौ या क्रिया सैव चेण्यन्तेनोच्यते अणौ यत्कर्म कारकं स चेण्णौ कर्त्ता

स्यान्नत्वाध्याने। णिचश्चेति सिद्धेः कर्त्रभिप्रायार्थमिदं। कर्त्रभिप्राये तु विभाषोपपदे
नेति विकल्प्येः णावकर्मकादिति परस्मैपदे च परत्वात्प्रासे पूर्वविप्रतिषेधेनेदमेवेष्य
ते। कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणं। तथाहि। पश्यन्ति भवं भक्ताः। वाह्यपता
न विषयं कुर्वन्तीत्यर्थः। प्रेरणे सत्याजे पश्यति भवः। विषयो भवतीत्यर्थः। ततो हेतुमत्ति न्।
दर्शयन्ति भवं भक्ताः। पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां। दर्शयते भवः। इह प्रथमा
तृतीययोरवस्थयोर्द्वितीयाचतुर्थ्योश्च चतुर्थ्योर्थः। तत्र तृतीयकक्षायां न तङ्। क्रियासा
ध्येप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात्। चतुर्थ्यां तु तङ्। द्वितीयामादाय क्रियासा

न्यात्। प्रथमायां कर्मणो भवस्येह कर्तृत्वाद्य। एवमारोहयते हस्ती स्वयमुदाहरणं।
आरोहंति हस्तिनं हस्तिपकाः। न्यग्भावयंतीत्यर्थः। ततः आरोहति हस्ती। न्यग्भवतीत्य-
र्थः। ततोणिच्। आरोहयंति। आरोहंतीत्यर्थः। ततः आरोहयते। न्यग्भवतीत्यर्थः। यद्वा
प्रयंत्या रोहंतीति प्रथमकक्ष्यायामागतः। ततः कर्मण एव हेतुत्वारोपाणिच्। दर्शयति
भवः। आरोहयति हस्ती। पश्यत। आरोहतस्वं प्रेरयतीत्यर्थः। ततोणिच्। ण्यंतस्य क-
र्तृभ्यां वक्ष्यमाणयोर्द्वयोरपि प्रेरणयोरत्यागे दर्शयते। आरोहयते हस्त्युदाहरणं। अर्थः
प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्ष्यायां न तङ्। समानक्रियात्वाभावाण्यंतस्याधिक्य

त्वात्। ~स्मनाध्याने किं। स्मरति वनगुल्मं कोकिलः। स्मारयति वनगुल्मः। उत्कंठापूर्वक
स्मृतौ विषयो भवतीत्यर्थः। भास्यो हेतुभये। व्याख्यातं। गृधिवंच्वोः प्रलंभने। प्रतारके
र्थे एवं ताभ्यामाभ्यां प्राग्वत्। माणवकं गर्द्धयते। वंचयते वा। प्रलंभने किं। श्वानं गर्द्धयति।
अभिकांक्षामस्योत्पादयतीत्यर्थः। अहिं वंचयति। वर्जयतीत्यर्थः। लियः संमाननशाली
नीकरणयोश्च। व्याख्यातं। मिथ्योपपदात्कृञोऽभ्यासे। णिच इत्येव। पदं मिथ्याकारयते।
स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात्किं। पदं सुष्ठुकारयति। अभ्यासे किं।
सकृत्पदं मिथ्याकारयति। स्वरितञितः कर्त्रभिप्राये क्रियाफले। यजते। सुनुते। वृत्तिं

वस्त्रमायच्छते। ऽग्रंथेकिं। उपच्छतिवेदं। ऽभिगंतुमुपमंकरोतीत्यर्थः। २

तिकिं। सलिलेजोऽयजंतिस्तुन्वंति। ऽपपाद्दः। न्यायमपवदते। कर्त्रभिप्रायइत्येवा। ऽपपव
दति। लिवस्त्राकारयते। समुदङ्भ्योयमोऽग्रंथे। ऽग्रंथेइतिछेदः। व्रीहीसंयच्छते। भार
मुपयच्छतो। कर्त्रभिप्रायइत्येवा। ऽनुपसर्गाज्ज्ञः। गांजानीते। ऽनुपसर्गात्किं। स्वर्गंलोक
नप्रजानाति। कथंतर्हि भक्त्रिः। इच्छंन्त्यपः पूर्वमवाज्ञुलोवेततोनुजज्ञेगमनंस्तुतस्येति।
कर्मणिलिङ्ग्रूपेऽणेतिविपरिणमः। विभाषोपपदेनप्रतीयमाने। स्वरितञितइत्यादि
पंचसूत्र्यामात्मनेपदंविहितंतस्मीपोच्चारितेनपदेनक्रियाफलस्यकर्तृगामित्वेद्योति
तेवास्यात्। स्वंयज्ञंयजति। यजतेवा। स्वंकटंकरोति। कुरुतेवा। स्वंपुत्रमपवदति। ऽपव

दते वा। स्वं यज्ञं कारयति। कारयते वा। स्वं व्रीहिं संयच्छति। संयच्छते वा। स्वां गां जानाति। जानी
ते वा। इत्यात्मनेपदं। शेषात्कर्त्तरि परस्मैपदं॥ अनुपराभ्यां कृञः। कर्त्तृगेपि फले
गंधनादौ च परस्मैपदार्थमिदं॥ अनुकरोति। पराकरोति। कर्त्तरीत्येव। भावकर्मणोर्मा
भूत्। न चैवमपि कर्मकर्त्तरि प्रसंगः। कार्यातिदेशपक्षस्य मुख्यतया तत्र कर्मवत्कर्म
णेत्यात्मनेपदेन परेणास्य बाधात्। शास्त्रातिदेशपक्षे तु कर्त्तरि कर्मेत्यतः शेषादित्य
तश्च कर्तृग्रहणद्वयमनुवर्त्य कर्त्तैव यः कर्त्ता न तु कर्मकर्त्ता तत्रेति व्याख्येयं॥ अभिप्रत्य
तिभ्यः क्षिपः। क्षिप प्रेरणे स्वरितेत्॥ अभिक्षिपति। प्राद्वहः। प्रवहति। परेर्मृषः। परिमृ

व्यति। योजादिकस्यपरि मर्षति। इहपरे इति योगं विभज्य वहेरपीति केचित्। व्याङ्प
रिभ्यो रमः। विरमति। उपाच्च। यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। अंतर्भावितण्य
र्थोयं। विभाषाऽकर्मकात्। उपाद्रमेरकर्मकात्परस्मैपदं वा। उपरमति। उपरमते वा। नि
वर्त्तत इत्यर्थः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः। एभ्यो ण्यंतेभ्यः परस्मैपदं स्यात्। णि
चश्चेत्यस्यापवादः। बोधयति मन्त्रं। योधयति काष्ठानि। नाशयति दुःखं। जनयति सुखं। अ
ध्यापयति। प्रावयति। प्रापयतीत्यर्थः। द्रावयति। विलापयतीत्यर्थः। स्रावयति। स्यंदयती
त्यर्थः। निगरणचलनार्थेभ्यश्च। निगारयति। आशयति। भोजयति। चलयति। कंपयति।

ऽदेः प्रतिषेधः। आदयते देवदत्तेन। गतिबुद्धीति कर्मत्वमादिखाद्योर्नेति प्रतिषिद्धं। नि
गरणं चलनेति सूत्रेण प्राप्तस्यैवायं निषेधः। शेषादिति कर्त्रभिप्राये परस्मैपदं स्या
द्वा। आदयत्यन्नं बटुना। अणावकर्मकाच्चित्तवत्कर्तृकात्। ण्यन्तात्परस्मैपदं स्यात्। शे
ते कृष्णः तं गोपी शाययति। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। एभ्यो
ण्यन्तेभ्यः परस्मैपदं न। पिबतिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाऽकर्मकाः। नृतिश्च
लनार्थोपि। तेन सूत्रद्वयेन प्राप्तिः। पाययते। दमयते। आयामयते। आयासयते। परिमो
हयते। रोचयते। नर्तयते। वादयते। वासयते। धेटउपसंख्यानं। धापयेते शिशुमेकं स

मीवीः॥ ऽप्रकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव। वस्मान्नाय यतिपयः। दमयंतीकम
नीयतामदं। भिक्षावासयति। वाक्यपषः। लोहितायति। लोहितायते। पुरुषो लुङि। ऽप्लुत
त्। ऽपघोतिष्ट। वृद्भ्यः स्यसनोः। वर्त्स्यति। वर्त्तिष्यते। लुटि च क्लृपः। कल्प्तासि। कल्पितासे।
कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। विकल्प्सति। विकल्पिषते। विक्लृप्सते॥ ॥इति पदव्यव
स्था॥ ॥अथ भावकर्मणोर्लडादयः। भावकर्मणोस्तिङि तङ्। सार्वधातुके यक्। धातोर्य
क्प्रत्ययः स्याद्भावकर्मवाचिनि सार्वधातुके परे। भावो भावना। उत्पादना। क्रिया। सा च धा
तुत्वेन सकर्मकधातुवाच्या भावार्थकलकारेण नूद्यते। युष्मदस्मद्भ्यां सामानाधिकरण्या

सि॰कौ॰उ॰ति॰

१५९

भावास्य प्रथमपुरुषः। तिङ्वाच्यभावनाया असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि। किं
त्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात्। अनभिहिते कर्त्तरि तृतीया। त्वयाम
याऽन्यैश्च भूयते। बभूवे। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चि
ण्वदिट्च। उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु परेषु भावक
र्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तद
भावेन। इहार्द्धधातुक इत्यधिकृतसीयुटो विशेषणं नेतरेषामव्यभिचारात्। चिण्वद्भा
वाद्वृद्धिः। भाविता। भविता। भाविष्यते। भविष्यते। भूयतां। अभूयत। भूयेत। भाविषीष्ट।

राम

१५९

भविषीष्ट। भविष्ट। भावकर्मणोः। च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे। अभावि। अभा
विष्यत। अभविष्यत। तिङोक्तत्वात्कर्मणि न द्वितीया। अनुभूयते आनन्दश्चैत्रेण त्वया मया
वा। अनुभूयेते। अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषा
तां। अन्वभभविषातां। णिलोपः। भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे। इह
तशब्दस्य एक्षिदूदण्लेव कृते। हण्णीतिहत्वं न। तासिसीसि इह व्यर्थाद्स्ते इपि ष्यतिहे इत्यादौ सा
र्धातुके एवं एतिह त्वप्रवृत्तेरित्याहुः। भाविता। चिण्वदिट आभीयत्वेनासिद्धत्वात् णिलोपः।
पक्षे भावयिता। भाविष्यते। भावयिष्यते। भाव्यतां। अभाव्यत। भाव्येत। भाविषीष्ट। भाव

पिपीष्ट। अभावि। अभाविषातां। अभावयिषातां। बुभूष्यते। बुभूषांचक्रे। बुभूषिता।
बुभूषिष्यते। बोभूय्यते। यङो लुगंतात्तु। बोभूयते। बोभवांचक्रे। बोभविता। बोभाविता।
ऽकृत्सार्वेति दीर्घः। स्तूयते विष्णुः। तुष्टुवे। स्ताविता। स्तोता। स्ताविष्यते। स्तोष्यते। अस्तावि।
अस्ताविषातां। अस्तोषातां। गुणोर्तीति गुणः। अर्यते। स्मर्यते। सस्मरे। परत्वान्नित्यत्वा
च्च गुणे रपरे कृते ऽजंतत्वाभावेप्युपदेशग्रहणाच्चिण्वदिट्। आरिता। अर्ता। स्मारिता। स्मर्ता। गु
णोर्तीत्यत्र नित्यग्रहणानुवृत्तेः कृतेनेह गुणः। संस्क्रियते। अनिदितामिति नलोपः। स्र
स्यते। इदितस्तु। नंद्यते। संप्रसारणं। इज्यते। अयष्टिज्ञिति। शय्यते। तनोतेर्यकि। आकारोंता

देशो वा स्यात्। तायते। तन्यते। ये विभाषा। जायते जन्यते। तपो नुतापे च। तपस्तेः चिण् न स्यात् क
र्मकर्त्तरि अनुतापे च। अन्वतप्त पापेन। पापं कर्त्तृ। तेनाभ्याहत इत्यर्थः। कर्मणि तु। यद्वा पा
पेन पुंसा कर्त्रा। अशोचि। पुमांस्तेतीत्वं। दीयते। धीयते। आदेर इत्यत्र स्थितीति कर्मधारया
दिसंज्ञकश्च कारदे निषेधः। एतः आदि स्थित्वाभावात्तस्मिन्नात्वं। जग्ले। आतो युक् चिण् कृ
तोः। आदन्तानां युगागमः स्यात् चिणि ञ्णिति कृति च। दायिता। दाता। दायिषीष्ट। दासीष्ट। अदा
यि। अदायिषातां। अदिषातां। अधायिषातां। अधिषातां। अग्लायिषातां। अग्लासातां।
हन्यते। अविण्णोदिस्थितेर्हनस्तो ना। हो हन्तेरिति कुत्वं। घानिता। हन्ता। घानिष्यते। हनिष्य

ते।ऽआशीर्लिङि. वध्यादेशस्यापवादत्वाद्वय एव भवः।ऽआर्द्धधातुके सीयुडिति विहितत्वात्।
घानिषीष्ट। वक्षे वधिषीष्ट।ऽअघानि।ऽअघानिषातां।ऽअहसातां। वक्षे वधादेशः।ऽअवधि।
ऽअवधिषातां।ऽअघानिष्यत।ऽअहनिष्यत। नवस्यादिषु विएवदित्यतिदेशाद्वधादेशः स्या
दिति वाच्यं।ऽअंगस्येत्यधिकारादंगस्यैवातिदेशात्।ग्रहस्तते। विएवदितो नदीर्घत्वं।प्रकृ
तस्य वजादिलक्षणस्यैव देग्रहो लिटीत्यनेन दीर्घविधानात्।ग्राहिता।ग्रहीता।ग्रा
हिष्यते।ग्रहीष्यते।ग्राहिषीष्ट।ग्रहीषीष्ट।ऽअग्राहि।ऽअग्राहिषातां।ऽअग्रहीषातां।दृश्यते।
ऽअदर्शि।ऽअदर्शिषातां।क्षिवः क्विल्वादन्नः।ऽअदक्षातां।गिरते लुङि. धमि वत्तदधिकं श

२ तां न प्राहि । विश्वदिशो दीर्घो नेत्युक्तं । अगारिध्वं । द्वितीये लिटि वृतो वेति वा दीर्घः । अगरीध्वं । अ-
गरिध्वं । एषां त्रयाणां ण त्वं । ढत्वं । द्वित्व त्रयं चेति पंचवैकल्पिकानि । दत्वं षत्ववतिः । जि ३ । सि चो-
रिति विकल्पादि ३ भावे ज्ञ्वेति कित्वं । दत्वं । दपर त्वं । हलि चेति दीर्घः । दएः षी ध्वमिति नित्यं
ढत्वं । अगीढ्वं । ढवमानां द्वित्वविकल्पे अष्टौ । ३ क्षषत्ववत्या सहसंकलनेन ३ त्वासंख्येति । दृढ्
दीर्घश्चि एवदिदृ ण त्वढत्वे द्वित्वत्रिकं तथा । दत्यष्टानां विकल्पेन वतुर्भिर्द्विकं भूतं । हेतुमत्ये
तोत्कर्मलिः । यकू । णि जोपः । दम्यते मोहेमुकुंदेना विसमुजोदीर्घो न्यतरस्यां । चिलपरे
ए मुलू परे णौ मितामुपधाया दीर्घो वास्यात् । प्रकृतो मितां ह्रस्व एव तु न विकल्पितः । एपता

सि॰ कौ॰ त॰ ति॰

१६२

स्तो ह्रस्वविकल्पासिद्धेः। दीर्घविध्यौ हि ह्लि वो जो पोन स्थानिवदिति दीर्घः सिध्यति। ह्रस्वविधौ
तु स्थानिवत्त्वं दुर्वारं। भाष्ये तु पूर्वत्रासिद्धेन स्थानिवदित्यत्र षभ्यद्विर्वचनसवर्णानुस्वारदी
र्घजश्चरः प्रत्याख्याताः। णौ चितिजाति पदे निर्देशः। शामिष्यते। शमयिष्यते। यङंताल्लिचूर्णं
शाम्यते। शंशमिता। शं शामिता। शं शमयिता। यङ्लुगंतात्सिद्ध्याप्येवं। भाष्यमते तु यङंताच्चिएव
दिदि दीर्घो नास्तीति विशेषः। एवं तत्वाभावे। शाम्यते मुनिना। नोदात्तोपदेशस्य मांतस्या ना
चमेः। उपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च। अशामि। अदमि। उदात्तोपदेशस्येति किं। शम
अगामि। मांतस्य किं। अवादि। अनाचमेः किं। आचामि। अनाचमिकमिवमीनामिति वक्तव्यं। १६२

विणिःऽपापादयद्दतिणि ड॰भावेऽअकामि।णि ड॰णि वोट्ष्येवं।ऽअवामि।वध्यहिं सायां।हलंतः।
जनिवध्योरिति न वृद्धिः।ऽअवधि।जाग्रोऽविविसलुङि॰ स्विस्तुक्तेर्न गुणः।ऽअजागारि।भंजे
श्व विणि।नजोपो वास्यात्।ऽअभाजि।ऽअभंजि।विभाषा विलम्भु जोः।लभेर्नु मागमो वास्या
त्।ऽअलंभि।ऽअलाभि।व्यवस्थित विकल्पात्प्रादेर्नित्यं नुम्।प्रालंभि।द्विकर्मकाणां तु।गौणे
कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहां।बुद्धिभक्ष्यार्थयोः शब्दकर्मकाणां निजेच्छया।प्रयोज्यक
र्मण्यन्येषां ण्यंतानां लादयो मताः।गौर्दुह्यते पयः।ऽअजा ग्रामं नीयते ह्रियते कृष्यते उह्यते।बो
ध्यते माणवकं धर्मः।माणवको धर्ममिति वा।देवदत्तो ग्रामं गम्यते।ऽअकर्मकाणां कालादि

कर्मकाणां कर्मणि भावे च लकारः स्यते। मासो मासं वाऽऽस्यते देवदत्तेन। णिजंतात्तु
प्रयोज्ये प्रत्ययः। मासमास्यते माणवकः॥ ॥इति भावकर्मप्रक्रिया॥ ॥यदा सौकर्या
तिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकांतराण्यपि कर्तृसंज्ञां लभंते। स्व
व्यापारे स्वतंत्रत्वात्। तेन पूर्वं करणत्वादि सत्त्वेपि संप्रति कर्तृत्वात्कर्त्तरि लकारः। सा
ध्वसिश्छिनत्ति। काष्ठानि पचंति। स्थाली पचति। कर्मणस्तु कर्तृत्वविवक्षायां प्राक्सकर्म
का अपि प्रायेण कर्मकाः। तेभ्यो भावे कर्त्तरि च लकाराः। पच्यते उदनेन। भिद्यते काष्ठे
न। कर्त्तरि तु। कर्मवत्कर्मणा तुल्यक्रियः॥ कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मव

स्यात्। कार्यातिदेशोयं। तेनयगात्मनेपद विण्विण्वदिटः स्युः। कर्त्तुरभिहितत्वात्प्रथ
माप्रयच्यते उदनः। भिद्यतेकाष्ठं। अपाचि। अभेदि। ननुभावेलकारेकर्त्तुर्द्वितीयास्यादस्मा
दतिदेशादितिचेन्न। लकारवाच्यएवकर्त्ताकर्मवत्। लिङ्याशिष्यङ्। तिद्विलकारकाद्
इत्यनुवृत्तेः। भावेप्रत्ययेवकर्त्तुर्लकारेणानुपस्थितेः। अतएवकृत्यक्तखलर्थाः कर्मकर्त्तरि
नभवंति। किंतुभावेएव। भेत्तव्यंकुसूलेन। नानुपचिभिदोः कर्मस्था क्रियाविक्लित्तिर्द्विधा
भवनंच। सैवेदानींकर्तृस्थानतुतत्तुल्या। सत्यंकर्मत्वकर्तृत्वावस्थाभेदोपाधिकंतत्समा
नाधिकरणक्रियायाभेदमाश्रित्यव्यवहारः। कर्मणेतिकिं। करणाधिकरणाभ्यांतुल्य

क्रियेपूर्वोक्ते साध्यसिद्धिरित्यादौ माभूत्। किं वा कर्तृस्थक्रियेभ्यो माभूत्। गच्छति ग्रामः।
आरोहति स्त्री। अधिगच्छति शास्त्रार्थः स्मरति अध्यापति वा यत्र कर्मणि क्रियाकृतो विशे
षो दृश्यते। यथा पक्वेषु तंडुलेषु यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्था क्रिया नेतरत्र। नहि
पक्वापक्वतंडुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्प
त्तिश्च कर्मस्था। तेन कारिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ज्ञानेच्छादिवद्य
त्नस्य कर्तृस्थत्वात्। एतेनानुव्यवस्यमानेऽर्थे इति व्याख्यातं। कर्तृस्थत्वेन यभावाच्च। नि
कृते उज्ञोपेव रूपसिद्धेः। ताच्छील्यादावयं चानश्। न त्वात्मनेपदं। सकर्मकाणां प्रतिप

पोवक्तव्यः। अन्योन्यं स्पृशतः। अजा ग्रामं नयति। दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यं। न
दुहस्नुनमां यक्चिणौ। एषां कर्मकर्त्तरि यक्चिणौ न स्तः। दुहेरनेन यक एव निषेधः। चिण्‌ तु वि
कल्पिष्यते। शप्‌ त्वलुक्‌। गौः पयो दुग्धे। अवः कर्मकर्त्तरि। अजनात्‌ ज्ञेश्चि एवास्यात्‌ कर्मकर्त्तरि
तङि परे। अकारि। अकृत। दुहस्त्वात्‌ धा। अदोहि। पक्षे क्सः। लुग्वेति पक्षे लुक्‌। अदुग्ध। अनु
स्नुता उदुम्बरः फलं पच्यते। सृजियुज्योः श्यंस्तु। अनयोः सकर्मकयोः कर्त्ता बहुलं कर्मवत्‌ यग
पवादश्च श्यन्‌ वाच्य इत्यर्थः। सृजेः श्रद्धोपपन्ने कर्त्तर्येवेति वाच्यं। सृज्यते स्रजं भक्तः। श्रद्धया नि
ष्पादयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगं। भूषा कर्म किरादि सनां वान्यत्रात्मने

सि॰ कौ॰ उ॰ ति॰

१६५

पदान्तरं। भूषावाचिनां किरादीनां सन्नंतानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः। अ
लंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अगीर्ष्ट। आद्रियते। आ
दृत। किरादिस्तुदाद्यंतर्गणः। विकीर्यते कटः। अविकीर्ष्ट। भूषायाः कर्तृस्थत्वेपि करोति क्रि
यापेक्षमिह कर्मस्थक्रियत्वं। न रुधः। अस्मात्तत्रे च्चिण् न। अवारुद्ध गौः। कर्मकर्तरीत्ये
व। अवारोधि गौर्गोपेन। तपस्तपः कर्मकस्यैव। कर्त्ता कर्मवत्स्यात्। विध्यर्थमिदं। एवका
रस्तु व्यर्थ एवेति वृत्त्यनुसारिणः। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। तपोनुतापे चेति
चिण्निषेधात्सिद्धं। अतप्त तपः कर्मकस्येति किं। उत्तपति सुवर्णं सुवर्णकारः। न दुहस्नुनमां

राम

१६५

यक्षिणो।त्रस्तुते।ग्रास्नाविष्टा।ग्रास्नोष्टानमते दंडः।ऽऽत्मनं स्नाःऽन्तर्भावितण्यर्थोत्र नमिः।य
क्षिणेः प्रतिषेधे हेतुमति णिश्रिद्रुस्रुभ्यामुपसंख्यानं।कारयते।ऽनीकरत्।उच्छ्रयते दंडः।उद
श्रिश्रियत।विरव दिट्तुस्यादेव।कारिष्यते।उच्छ्रायिष्यते।भूते कथा।ऽनोवत।भारद्वाजीयाः प
ठंति।णिश्रंथिग्रंथिब्रूञ्भ्यात्मनेपदाकर्मकाणामुपसंख्यानं।पुच्छमुदस्यति उत्पुच्छयते गोः।ऽऽ
न्तर्भावितण्यर्थतायां।उत्पुच्छयते गां।पुनः कर्तृत्वविवक्षायां।उत्पुच्छयते गोः।उदपुपुच्छत।य
क्षिणेः प्रतिषेधात् शप्वत्।श्रंथिग्रंथ्यो राध्ववीयत्वान्निजभावपक्षे ग्रहणं।श्रंथति ग्रंथं।
श्रंथति मेखलां देवदत्तः।ग्रंथते ग्रंथः।ऽश्रंथिष्ट।श्रंथते।ऽश्रंथिष्ट।कैयादिकयोस्तु।श्रथ्ना

ते गृह्णीते स्वयमेव। विकुर्वते सैंधवाः। वल्गंतीत्यर्थः। वैः शब्दे कर्मण्येऽकर्मका इति तङ्। अंतर्भा
वितण्यर्थस्य पुनः प्रेषणे त्यागे विकुर्वते सैंधवाः। व्यकारिष्ट। व्यकारिषातां। व्यकारिषत। व्यकृ
त। व्यकृषातां। व्यकृषत। कुषिरंजोः प्राचां श्यन् परस्मैपदं च। अनयोः कर्मकर्त्तरि न यक् किं
तु श्यन् परस्मैपदं चात्मनेपदापवादः। कुष्यति। कुष्यते पादः। रज्यति। रज्यते वस्त्रं। यगवि
षये तु नास्य प्रवृत्तिः। कोषिषीष्ट। रंक्षीष्ट।। ।। इति कर्मकर्तृप्रक्रिया।। ।। अभिज्ञावच
ने लृट्। स्मरति बोधिनि उपपदे भूतानद्यतने धातोर्लृट् स्यात्। लङो पवादः। स्मरसि कृ
ष्ण गोकुले वत्स्यामः। एवं बुध्यसे। चेतयसे। इत्यादि योगेपि। तेषामपि प्रकरणाद्विशेषेन

स्मृतौ वृत्तिसंभवात् । न यदि । यद्योगे भूतं । नाभिजानासि कश्मीरे यद्वने ऽभुञ्ज्महि ॥ ॥
विभाषा साकांक्षे । भूतविषये लृट् स्यात् लक्ष्यलक्षणभावेन साकांक्षश्चेद्धात्वर्थः । स्म
रसि कृष्ण वने वत्स्यामः तत्र गाश्चारयिष्यामः । वासो लक्षणं चारणं लक्ष्यं । पक्षे लङ् । यद्
योगेऽपि न यदीति बाधित्वा परत्वाद्विकल्पः । परोक्षे लिट् । वकारा ऽत्तमपुरुषे चित्तवि
क्षेपादिना पारोक्ष्यं । सुप्तोऽहं किल विललाप । बहु जगद पुरस्तात्तस्य मत्ता किलाहं । अत्यन्ता
पह्नवे लिड् वक्तव्यः । कलिंगेष्ववात्सीः । नाहं कलिंगाञ्जगाम । हशश्वतोर्लङ् च । अनयो रूप
पदयोर्लिड्विषये लङ् स्याच्चाल्लिट् । इति हाकरोच्चकार वा । शश्वदकरोच्चकार वा । प्रश्ने

सि॰कौ॰उ॰ति॰

१६१

वासन्नकालोऽप्रष्टव्यः प्रश्नः। आसन्नकाले पृच्छ्यमाने प्रश्ने लिड्विषये लङ्लिटौ स्तः।
ऽगच्छत्किं। जगाम किं। अनासन्नेतुकं संजघानकिं। लट् स्मे। लिटोऽपवादः। यजति स्म
युधिष्ठिरः। अपरोक्षे च। भूतानद्यतने लट् स्यात् स्मयोगे। एवं स्म पिता ब्रवीति। ननौ पृ
ष्टप्रतिवचने। अनद्यतनपरोक्ष इति निवृत्तं। भूते लट् स्यात्। अकार्षीः किं। ननु क
रोमि भोः। नन्वोर्विभाषा। अकार्षीः किं। न करोमि। नाकार्षं। अहं नु करोमि। अहं न्वका
र्षं। पुरि लुङ् चास्मे। अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्त्तते। पुराशब्दयोगे भूतानद्यत राम
ने विभाषा लुङ् चाल्लट् न तु स्मयोगे। पक्षे यथाप्राप्तं। वसन्तीह पुरा छात्राः। अवा १६१

स्तुः।ऽवसन्।ऊषुर्वा।ऽस्मे किं। यजति स्म पुरा। भविष्यतीत्यनुवर्त्तमाने। यावत्पुरा
निपातयोर्लट्। यावद्भुङ्क्ते। पुरा भुङ्क्ते। निपातावेतौ निश्चयं द्योतयतः। निपातयोः किं। याव
द्दास्यते तावद्भोक्ष्यते। करणभूतया पुरा यास्यति। विभाषा कदाकर्ह्योः। भविष्यति लट् स्यात्।
कदा कर्हि वा भुंक्ते। भोक्ष्यते। भोक्ता। वृ किंवृत्ते लिप्सायां। भविष्यति लड्वा स्यात्। कं कतरं कत
मं वा भोजयसि भोजयिष्यसि भोजयितासि वा। लिप्सायां किं। कः पाटलिपुत्रं गमिष्यति।
लिप्स्यमानसिद्धौ च। लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा
स्यात्। यो ऽन्नं ददाति। दास्यति। दाता वा स स्वर्गं याति। यास्यति। याता वा। लोडर्थलक्षणे च।

लोडर्थः प्रैषादि लक्ष्यते येन तस्मिन्नर्थे वर्त्तमानाद्धातोर्भविष्यति लड्वा स्यात्। कृष्णश्चेद्भुं
क्ते त्वं गाश्चारय। पक्षे लृट् लटौ। लिङ् चोर्द्ध्वमौहूर्त्तिके। ऊर्द्ध्वं मुहूर्त्ताद्भव ऊर्द्ध्वमौहूर्त्तिकः। निपा
तनात्समासः उत्तरपदवृद्धिश्च। ऊर्द्ध्वमौहूर्त्तिके भविष्यति लोडर्थलक्षणे वर्त्तमानाद्धातो
र्लिङ् लटौ वा स्तः। मुहूर्त्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति। आगमिष्यति। आगं
ता वा अथ त्वं छंदोऽधीष्व। वर्त्तमानसामीप्ये वर्त्तमानवद्वा। समीपमेव सामीप्यं स्वार्थे ष्य
ञ्। वर्त्तमाने लडित्यारभ्य उणादयो बहुलमिति यावद्येनोपाधिना प्रत्यया उक्तास्तेत राम
थैव वर्त्तमानसमीपे भूते भविष्यति च वा स्युः। कदागतोसि। अयमागच्छामि। अयमा

गमं। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा॥ आशंसायां भूतवच्च॥ वर्त्तमानसामीप्य
इति नानुवर्त्तते। भविष्यति काले भूतवद्वर्त्तमानवच्च प्रत्यया वा स्युः॥ आशंसायां। देवश्चे
द्वर्षीत्। वर्षति। वर्षिष्यति वा। धान्यमवाप्स्म। वपामः। वप्स्यामो वा। सामान्यातिदेशे विशे
षानतिदेशः। तेन लङ्लिटौ न॥ क्षिप्रवचने लृट्॥ क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्या
त्। वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा आयास्यति। शीघ्रं वप्स्यामः। नेति वक्तव्ये लृड्ग्रह
णं लुटोपि विषये यथा स्यात्। श्वः शीघ्रं वप्स्यामः॥ आशंसावचने लिङ्॥ आशंसावा
चिन्युपपदे भविष्यति लिङ् स्यान्न भूतवत्। गुरुश्चेदुपेयादाशंसेऽधीयीय॥ आशंसे

क्षिप्रमधीयीय। नानद्यतनवत्क्रियाप्रबंधसामीप्ययोः। क्रियायाः सातत्ये सामीप्ये च
लङ्लृटौ न। यावज्जीवमन्नमदात् दास्यति वा। सामीप्यं तुल्यजातीयेनाव्यवधानं। येयं
पौर्णमास्यतिक्रांता तस्यामग्नीनाधित। सोमेनायष्ट। येयममावास्याऽऽगामिनी तस्याम
ग्नीनाधास्यते। सोमेन यक्ष्यते। भविष्यति मर्यादावचनेऽवरस्मिन्। भविष्यति काले
मर्यादोक्ताववरस्मिन्प्रविभागे नानद्यतनवत्। योयमध्वा गंतव्य आपाटलिपुत्रात्तस्य
यदवरं कौशांब्याः तत्र सक्तून्पास्यामः। कालविभागे चानहोरात्राणां। पूर्वसूत्रं सर्वम
नुवर्तते। अहोरात्रसंबंधिनि विभागे प्रतिषेधार्थमिदं। योगविभाग उत्तरार्थः। योयं

संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे। अनहोरात्रा
णां किं। योयं मास आगामी तस्य योऽवरः पंचदशरात्रः तत्राध्येतास्महे। परस्मिन्वि
भाषा। अवरस्मिन्न वर्ज्ये पूर्वसूत्रद्वयमनुवर्त्तते। अत्राप्य विभाषेयं। योयं संवत्सर
आगामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे। अध्येतास्महे। लिङ्नि
मित्ते लृङ् क्रियातिपत्तौ। भविष्यतीत्येव। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्। भू
ते च। पूर्वसूत्रं संपूर्णमनुवर्त्तते। वोताप्योः। वा उताप्योरिति छेदः। उताप्योरित्यतः प्राग्भूते
लिङ्निमित्ते लृङ्वेत्यपि क्रियते। पूर्वसूत्रं तु उताप्योरित्यादौ प्रवर्त्तत इति विवेकः। गर्हायां।

लडपिजात्वोः। आभ्यां योगे लट् स्यात् कालत्रये गर्हायां। लुङादीन्परत्वाद्वयं बाधते। अ
पिजायां त्यजसि जातु गणिकामादत्से गर्हितमेतत्। विभाषा कथमि लिङ् च। गर्हायामि
त्येव। कालत्रये लिङ् वा लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकाराः। अत्र
भविष्यति नित्यं लृङ्। भ्रतेवा। कथं नाम तत्र भवान् धर्मं त्यक्ष्यत्। किं वृत्ते लिङ् लृ
टौ। गर्हायामित्येव। विभाषा तु नानुवर्तते। कः कतरः कतमो वा हरिं निंदेत्। निंदिष्य
ति वा। लृङ् प्राग्वत्। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। गर्हायामिति निवृत्तं। अनवक्लृ
प्तिरसंभावना। अमर्षोऽक्षमा। असंभावयामि न मर्षये वा भवान् हरिं निंदेत् निंदे

ष्यति वा। कः कतरः कतमो वा हरिं निंदेत् निंदिष्यति वा। ऌट् प्राग्वत्। किं किलास्त्य
र्थेषु ऌट्। अनवक्लृप्त्यमर्षयोरित्येतद्गर्हायां चेति यावदनुवर्त्तते। किं किलेति समु
दायः क्रोधद्योतकः उपपदं। अस्त्यर्थाः अस्ति भवति विद्यतयः। लिङोपवादः। न श्रद्दधे
न मर्षये वा किं किल त्वं शूद्रान्नं भोक्ष्यसे। अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि। अ
त्र ऌट्। ना। जातुयदोर्लिङ्। यदायद्योरुपसंख्यानं। ऌटोपवादः। जातु यद्यदा यदि वा त्वा
दृशो हरिं निंदेत् नावकल्पयामि न मर्षयामि। ऌट् प्राग्वत्। यच्चयत्रयोः। यच्च यत्र वा
त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि। गर्हायां च। अनवक्लृप्त्यमर्षयोरिति निवृत्तं। य

श्चयत्रयोर्योगे गर्हायां लिङ् एव स्यात्। यच्च यत्र वा त्वं शूद्रं याजयेः। अन्याय्यं तत्। चित्री
करणे च। यच्च यत्र वा त्वं शूद्रं याजयेः। आश्चर्यमेतत्। शेषे लृडयदौ। यच्चयत्राभ्याम
न्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात्। आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति।
अयदौ किं। आश्चर्यं यदि सोऽधीयीत। उताप्योः समर्थयोर्लिङ्। बाढमित्यर्थेऽनयोस्तुल्या
र्थता। उत अपि वा हन्याद् घ्नं हरिः। समर्थयोः किं। उत दण्डः पतिष्यति। अपि धास्यति द्वा
रं। प्रश्नः प्रच्छादनं च गम्यते। इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेपि नित्यो लृङ्। का
मप्रवेदनेऽकच्चिति। स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु कच्चिति। कामो मे

भुंजीत भवान्। अकच्छितीति किं। कच्छिज्जीवति। संभावनेऽलमिति चेत्सिद्धाऽप्रयोगे। अलमर्थो
त्रप्रोक्तिः। संभावनमिति च प्रथमया सप्तम्या च विपरिणम्यते। संभावनेऽर्थे लिङ् स्यात् तच्चे
संभावनमलमिति। अलमिति सिद्धाऽप्रयोगे सति। अपि गिरिं शिरसा भिंद्यात्। सिद्धाप्रयोगे
किं। अलं कृष्णो हस्तिनं हनिष्यति। विभाषा धातौ संभावनवचनेऽयदि। पूर्वसूत्रमनुव
र्त्तते। संभावनार्थे धातावुपपदे तत्प्रत्यये लिङ् वा स्यान्न तु यच्छब्दे। पूर्वेण नित्ये प्राप्ते वचनं। सं
भावयामि भुंजीत भोक्ष्यते वा भवान्। अयदि किं। संभावयामि यद्भुंजीथास्त्वं। हेतुहेतुमतोर्लि
ङ्। वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। भविष्यत्येवेष्यते।

नेह। हंतीति पलायते। इच्छार्थेषु लिङ्लोटौ। इच्छामि भुंजीत। भुंक्तां वा भवान्। एवं कामये प्रार्थ
इत्यादियोगे बोध्यं। कामप्रवेदन इति वक्तव्यं। नेह। इच्छन् करोति। लिङ्। समानकर्तृकेषु इ
च्छार्थेषूपपदेषु लिङ् स्यात्। भुंजीयेतीच्छति। इच्छार्थेभ्यो विभाषा वर्त्तमाने। लिङ् स्यात् पक्षे ल
ट्। इच्छेत्। इच्छति। कामयेत। कामयते। विधिनिमंत्रणेति लिङ्। विधौ। यजेत। निमंत्रणे। इ
ह भुंजीत भवान्। आमंत्रणे। इहासीत। अधीष्टे। पुत्रमध्यापयेत् भवान्। संप्रश्ने। किं
नो वेदमधीयीय उत तर्कं। प्रार्थने। भो भोजनं लभेय। एवं लोट्। प्रैषातिसर्गप्राप्तकालेषु
कृत्याश्च। प्रैषो विधिः। अतिसर्गः कामचारानुज्ञा। भवता यष्टव्यं। भवान् यजतां। वका

रेण लोटोऽनुकर्षणं प्राप्तकालार्थं। लिङ्लोटावूर्द्धमौहूर्त्तिके। प्रैषादयोऽनुवर्त्तन्ते। मुहूर्त्तादूर्ध्वं य
जेत। यजतां। यष्टव्यं। स्मे लोट्। पूर्वसूत्रस्य विषये। लिङः कृत्यानां चापवादः। ऊर्द्ध्वं मुहू
र्त्ताद्यजतां स्म। अधीष्टे वा। स्मे उपपदेऽधीष्टे लोट् स्यात्। त्वं स्म अध्यापय। लिङ्यदि।
यच्छब्दे उपपदे कालसमयवेलासु च लिङ् स्यात्। कालः समयो वेला वा यद्भुञ्जीत भवान्।
अर्हे कृत्यतृचश्च। वाच्ये लिङ्। त्वं कन्यां वहेः। शकि लिङ् च। शक्तौ लिङ् स्याच्चात्कृत्याः। भारं त्वं व
हेः। माङि लुङ्। मा कार्षीः। कथं मा भवतु मा भविष्यतीति। नायं माङ् किन्तु माशब्दः। धातुसं
बन्धे प्रत्ययाः। धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः। तिङन्त

वाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः। वसन्ददर्श।
भूते लङ्।ऽतीतवासकर्तृककर्तृकं दर्शनमर्थः। सोमयाज्यस्य पुत्रो भविता। सोमे
न यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनं। क्रियासमभिहारे लोट्। लोटो हि स्वौ वा च त
ध्वमोः। पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्। तस्य च हि स्वौ स्तः। तिङामपवा
दः। तौ च हि स्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः। तिङ् संज्ञौ वा तध्वमोर्विषये तु
हि स्वौ वा स्तः। पुरुषैकवचनसंज्ञे तु नानयोरिति दिश्यते। हिस्वविधानसामर्थ्यात्ते
न सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि। आत्मनेपदिभ्यः स्वो भावक

र्मकर्तृषु। समुच्चयेऽन्यतरस्यां॥ अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्॥ य
थाविध्यनुप्रयोगः पूर्वस्मिन्॥ आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्र
योज्यः। समुच्चये सामान्यवचनस्य। समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्र
योगः स्यात्॥ अनुप्रयोगाद्यथायथं लङादयस्तिबादयश्च। ततः संख्याकालयोः पु
रुषविशेषार्थस्य चाभिव्यक्तिः। क्रियासमभिहारे द्वे वाच्ये। याहि याहीति याति। पुनः पु
नरतिशयेन वा यानं हि तस्यार्थः। एककर्तृकं वर्तमानं यानं यातीत्यस्य। इति शब्दस्व
भेदान्वये तात्पर्यं ग्राहयति। एवं यातः। यांति। यासि। याथः। याथ। पक्षे। यात यातेति

स्लिं०कौ०ऊ०ति०
१२४

यूयं याथ। याहि याहीत्ययासीत्। यास्यति वा। अधीष्वाधीष्वेत्यधीते। एवं विषये प
क्षेऽधीष्वमधीध्वमिति दयमधीध्वे। समुच्चयेतु। सक्तून् पिब धानाः खादेत्यभ्यवह
रति। अन्नं भुङ्क्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते। तध्वमोस्तु पिबत खादतेत्यभ्यवह
रथ। भुङ्ग्ध्वं। आस्वादध्वमित्यभ्यवहरध्वे। पक्षे हि स्वौ। अत्र समुच्चीयमानविशेषाणाम
नुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तून् पिबति। धानाः खादति। अन्नं भुङ्क्ते।
दाधिकमास्वादते। एतेन पुरा मवस्कंदन्नुनीहि नंदनं मुषाणरत्नानि हरामरांगनाः। वि
ग्रहं चक्रेन मुविद्विषा बलीयसेत्थमस्वास्थ्य महर्दिवं दिवः। इति व्याख्यातं। अवस्कंद

राम
१२४

नलवनादिरूपाभूतानपतनपरोक्षाएककर्तृकाऽस्यास्यक्रियेत्यर्थात्नाद
ह पुनःपुनःवस्कंदेत्यादिरर्थः इतितुव्याख्यानंभ्रममूलकमेव। द्वितीयस्तत्रै
क्रियासमभिहारेद्वत्यस्यानुवृत्तेः। लोडंतस्य द्वित्वापत्तेश्चापुरीमवस्कंदेत्यादिम
ध्यमपुरुषैकवचनमित्यपिकेषांचिद्भ्रमएव। पुरुषवचनसंज्ञेदद्धतु नेत्युक्तत्वात्॥
इतिलकारार्थप्रक्रिया॥ ॥इतिभट्टोजिदीक्षितविरचितायांसिद्धांतकौमुद्यांतिङं
तःसमाप्तः॥ संवत् १७९८ श्रावणशुक्ले १२ गुरौ दीक्षितबालकृष्णेनालेखि॥ श्री॥

१४६

अ६: पुस्तकं राम कृष्णपाठ श्रीयं
प॰ १७५ श्रीगणेशायनमः ॥